24

Vatsyayana's Kamasutra

कामशास्त्र.

No 24

वाराणस्यां भगवानलालेन लेखितेयं टीका सं १८२३

वात्स्यायनसूत्रवृत्तिः जौहरिया. भास्करनृसिंह शास्त्री

पा० श्रीगणे[शा]यनमः श्रीशिवायनमः श्रीगुरुचरणाभ्यांनमः श्रीलक्ष्म्यैनमः श्रीसरस्वत्यैनमः श्रीगोविंदायनमः श्रीः श्रीः श्रीः
१ कुंठिःप्रोद्दंडगंडस्थलयुगलिगलन्मूरिदानांबुधारामाधुर्यास्वादमत्तभ्रमरगलगलद्धंक्रियालंक्रियोमे दुर्घांभोराशिमध्यप्रचलरवि
स्लप्रौढदर्वीचयानामायोन्वाद्रिंगुंफान्विततनुनितरांकामशास्त्रार्थवक्रे १ श्रीसिंदूरस्थिरितावदंघ्रिभूपतौकांतिप्रतापान्वितेछत्रादिस्फुरि
तेकवीश्वरमनःसिंहासनाध्यासिनि धामोद्यन्मणिसोधतिश्रितजनः सेनाधिनाथस्ससौनिसंश्रीयुवराजतिक्षितिभुजोदासंततिस्यान्दुतं २
वसोपीवात्स्यायनामाथकामशास्त्रंयः चक्रेचक्रधरंतवंदेवंदारुवृंदमंदारं ३ धर्मार्थौपरिविलसन्मोसादभ्यहितःप्रवेःसकलज
गज्जनिहेतुःपुरुषार्थश्रेष्ठआत्मभूर्जयति ४ एकातपत्रंरतनीशविंबनितंबिनीराज्यमलिश्चवंदी लोकाश्रितावात्स्यायनसूत्रंजायसास्ससोभा
तिसकामराजः ५ आनंदानंदसंदोहसंदायकधुरंधरः स्मरराजोराजमखराजतेराजपूजितः ६ श्रीसर्वेश्वरशास्त्रिसद्गुरुमहाकारुण्यसाहा
य्यतःश्रीराजव्रजलालविद्वद्धिराट्संप्रेरणादेशितात् श्रीकाशीनरसिंहशास्त्रिकविनाकंदर्पचूडामणेः श्रीवात्स्यायनसूत्रवृत्तिरखिलप्रौ
ढप्रियालिख्यते ७ श्रीमन्भास्करवंशवारिधिविधुःषट्शास्त्रवेदस्मृतिश्रौतास्यागमकाव्यनाटकमुखप्रोल्लष्धविद्याप्रदान् धृत्वानूलिंगनय १
ज्वनस्तनस्तान्नत्वानृसिंहःसुधीः श्रीवात्स्यायनसूत्रवृत्तिमखिलश्रीसैकरोतिक्रमात् ८ विद्वांसःस्वीयवाक्याऽमृतरसलहरीन्नप्तचिताम्र

पीमांमत्प्रोक्तांसूत्रवृत्तिमद्यपरिदययाप्रेक्ष्यतुष्टाभवंतु गंगांगंगाधरोपित्रिभुवनशुभदामुद्वहन्नुत्तमांगेवापीपायोभिषेकान्नतजनकलिता
न्नैतिकिंनिद्रेतिसः ९ दोषान्विहायगुणलेशमपीहवृत्तौग्रहंतुनिखिलधियोनितरांगुणज्ञाः क्षौद्रंयथात्रपरलेपरिधयसर्वाःशुद्धास्ततोम
धुपिबंपतिपरंरसज्ञाः १० काहंपरिच्छिन्नमतिर्नितांतंक्वकामदेवस्यगुणाग्रगण्याः ग्रादिसंयेद्दोरिववत्सकस्यकुत्साममातः कविनोस्तकस्य
११ निस्समहाधनिकवेष्टितवन्ममायद्वात्स्यायनवृत्तिकरणाद्रणंतथापि श्रीकामदेवगुणसन्मणिसंघसंगाद्वृत्तिः स्रजैरिवगुणःप्रथितिंप्रयातु
१२ ग्रंथाःकियंतःकवयःकियंतोगुणाःकियंतोविततःकियंतः तथापिचेतोममकामसूत्रवृत्तिंविधेयंत्वरतेविधातुं १३ यथामृतितथैवमेमद
नसत्रवृत्तौमनःप्रवृत्तमधुनाभवेत्तदपिचित्रमेतन्ननत् अनेकमणिमौक्तिकप्रकरपूर्णरत्नाकरात्प्रगृह्यकतिचिन्मणीन्किमुनदर्शयंतेजनाः
१४ श्रीवात्स्यायनवीरभद्रमुखसद्ग्रंथाम्बुधौन्निधेर्युक्त्याख्यान्सपत्नांशकांश्चनसमानीयाहमत्रापिवा वृत्तिंकांचनकल्पयन्कविपदंप्राप्नोमिय
द्वस्तुविशुद्धसामधुकृत्सदंसुमनसःसारस्यसम्मेलनात् १५ श्रीमद्भद्रपदरामभद्रदययावाणीममास्यादपिप्रोद्यन्त्र्यावरसान्वितातिसरलाप्रासे
युंताविर्भवेत् वीणारोपितसद्गुणापिविरसाप्यंसंतमसन्नुतन्नक्वाणोर्वीदपितप्रभाववशतःसंतोषदात्रीनकिं १६ श्रीरंगबुधेस्वितरंगपरेहं
चंद्रानुवारनिकराइवमेघसंघात् प्रासारवद्गुदितियत्करुणाकटाक्षाद्वाचःस्फुरंतिपुरतोममसास्तुवाणी १७ पुरुषत्रयेत्रिधास्तिवदनेवक्षः

का॰ सू॰ स्थलेकेदेशयाएजव्रजनलाल· विभोर्मुखगः हृच्चितेषु सा विकासेसदा १८ रसगुणनाध्यायाः प्रकरणंसंख्याव्धिदृहृगाजुमिता सांप्रिसहस्रंश्लोका अ
२ धिकरणंसप्तकामशास्त्रमिन् १९ अर्थोधर्मप्रापकः सोपिहेतुः स्वर्गप्राप्तेःस्वर्गेनामेव कामः अनन्तासोनंदरूपात्मोक्षात् तानानंदः कामउच्यते पु
मर्थः २० ॐ धर्मार्थकामेभ्यो नमः अत्रभगवान्वात्स्यायनः ब्रह्मानंदाभिव्यंजकवृत्तिविशेषतयासमाधेरिव कामवसंनिपत्योपकारकत्वं स्यान्न॰
पानादेश्चसत्संगादेरिवतत्साधनतां आनंदाभिव्यंजकतयामोक्षादप्यभ्यर्हिततमतां चपश्यन्निष्प्रयोजनत्वामङ्गलकत्वाशिष्टपरिगृहीत
त्वादिदोषान्क्रमेणवारयन्विघ्ननिवर्तकंब्रह्मानंदानुसंधानलक्षणंमंगलंचशिष्यशिक्षायैप्रेक्षावत्प्रवृत्तयेऽनुबंधचतुष्टयंचसूचयन्सां
गंपरमपुरुषार्थंनिर्दिशति तत्र धर्मत्वमलौकिकप्रवर्तकत्वमितिभाट्टाः यागादिजन्यमपूर्वत्वमितिप्राभाकरादयः राजादिव्यावृत्तयेऽलौ॰
किकपदंप्रतिग्रहादिसाध्यत्वमर्थत्वं यद्यप्यर्थ्यतइतिव्युत्पत्त्यासर्वस्याप्यर्थत्वं प्रतीयते तथापि निर्मथ्याधिकरणन्यायेन योगाद्रूढेः प्रबलत्वात्
पंकजादिशब्दवद्योगरूढ्याद्रव्यादिपरत्वमेव कामत्वंचानंदाभिव्यंजकवृत्तिविशेषत्वं योगादिजन्यावृत्तये विशेषपदं निरूपकत्वं विभक्त्यर्थः अ
पकृष्टत्वं शकारकृतानंनमः शब्दार्थः अलौकिकप्रवर्तनादिनिष्ठविषयताऽवच्छिन्नप्रतिग्रहादिजन्यधर्मविशेषावच्छिन्नविषयतावच्छिन्नकर
णजन्यवृत्तिविशेषनिष्ठविषयतावच्छिन्नोत्कर्षनिरूपितापकर्षनिष्ठप्रकारतानिरूपितस्वनिष्ठविशेष्यतानिरूपितविषयिताशालिज्ञानाश्र २

यः आचार्येहृतिवाक्यार्थः धर्मादित्रितयार्थेहमस्सर्वरूपः अपकृष्टत्वं चात्रार्थित्वं आत्रालंबनविभावाद्यो विषयः प्रयोजनं चानंदाभिव्यंजकवृत्तिवि
शेषः कामः तत्कामोऽधिकारी प्रतिपाद्यप्रतिपादकभावः संबंधः एतेन ब्रह्मानंदानुसंधानलक्षणं मंगलं च कृतं तदुक्तं श्रुतौ को ह्येवान्यात्कः प्रा॰
ण्यात् यदेष आकाश आनंदो न स्यात् एष ह्येवानंदयाति अन्योऽन्तर आत्मानंदमयः तेनैष पूर्णः तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः प्रमोद उत
रः पक्षः आनंद आत्मा आशिष्ठो दृढिष्ठो बलिष्ठः तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् स एको मानुष आनंदः एतस्यैवानंदस्यान्यानि भूतानि
मात्रामुपजीवंति आनंदो ब्रह्मेति व्यजानात् स्मृतौ च आनंदमयोऽभ्यासात् आनंदः सुप्रमोद इत्यादिः वसंततिलके भाणे इदानीं सकलसुखसाक्षा
त्कारक्षमं लक्ष्मीश प्रभृतिभिः सदासेवितं सर्वातिशायि तन्मोक्षं परमं सुखं निर्वाणं हिमहत्सौख्यं अभिनवयौवनमदललितकामिनीनितंबसदकू
लमोक्षमाविसौख्यमेवाभिधीयते अस्येव स्वसंवेद्यपरमानंदस्वरूपस्य तत्सुखस्य मोक्षसुखत्वं प्रतिपाद्यते तत्रानंगोपासनमंतरेण न घटत इ
ति धर्मार्थयोर्दृष्टादृष्टद्वारा परमपुरुषार्थशेषत्वसूचनार्थं पूर्वनिर्देशः ननु आत्मानमुपासीतभगवंतं सदा ध्यायीतेत्यादि उपासनायाइवकाम॰
स्यतत्साधनस्य वा सेव्यत्वे प्रमाणाभावान्नेदं शास्त्रमादरणीयमित्यत आह शास्त्रे प्रकृतत्वात् शास्तीति शास्त्रं वेदः वेदत्वं चालौकिकपर्यवसन्नत्वं निर
पेक्षशब्दत्वमित्यपरे विध्यर्थवादमंत्रनामधेयात्मकत्वमित्यन्ये तेष्विन्द्रप्रकृतत्वात्विहितत्वात् आदरणीयमिति शेषः तथा च श्रुतिः ब्रह्मचारी भूत्वा

वा: स:
३

गृहीभवेत् आचार्याय प्रियं धनमाहृत्य प्रजातंतुं मा व्यवच्छेत्सीः नापुत्रस्य लोकोस्ति इत्यस्यां पुत्रानापेहि त्रिभिः ऋणवा जायते ब्रह्मचर्येण ऋषि
भ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इत्यादिः स्मृतिश्च मिताक्षरायां याज्ञवल्क्यः अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् मनुः ऋणत्रयमपाकृत्य
मनो मोक्षे निवेशयेत् भागवतेपि तृतीयस्कंधे कर्दमोपाख्याने सप्तमस्कंधे धर्मार्थकामशास्त्राण्यध्येतव्यानीति प्रह्लादचरित्रे दशमस्कंधे सां
दीपनमहर्षिनिकटे श्रीकृष्णश्चतुःषष्टिकलाः प्रशिक्षयदित्यादिः एवं महाभारतेपि तथा च विधिनिषेधात्मकश्रुतिस्मृतीतिहाससिद्धत्वाद
दरणीयमिति भावः एवमपि शिष्यपरिग्रहीतत्वादननुष्ठानलक्षणाप्रामाण्यमाशंक्याह तत्समयावबोधकेभ्यश्चाचार्येभ्यः तत्संवद्धात् तेषां
धर्मादीनां समया अनुष्ठापका वेदाः तान्नानाशाखाप्रकरणगतानर्थतोनुभाव्य शतसहस्राध्यायैः सम्यगवबोधयंतीति समयावबोधकाः
प्रजापतिप्रमुखाः स्वयमाचरणादित्यादिलक्षणलक्षिताः तेभ्यः तैर्विहितत्वात् सेवितव्यमिति शेषः तथा च सर्वशिष्टपरिग्रहीतत्वान्नाननुष्ठान
नुष्ठानलक्षणाप्रामाण्यमिति भावः स्वग्रंथप्रयोजनं प्रकृतस्य प्राधान्यं च सूचयन् संप्रदायप्रवर्तकांस्तद्ग्रंथांश्च निर्दिशति प्रजापतिर्हि प्रजाः
सृष्ट्वा तासां स्थितिनिबंधनं त्रिवर्गस्य शासनमध्यायानां शतसहस्रेणाग्रे प्रोवाच प्रजानां पतिः प्रजापतिः अनेन सकलप्रजाभिरेतदाज्ञायां वर्तित ३
व्यमिति सूचितं प्रकर्षेणाविच्छिन्नं जायंते स्थूलोपाधिं हस्तादिभोगायतनं गृह्णंतीति प्रजाः ताश्च जरायुजादिभेदेन चतुर्विधाः जरायुभ्यो जाता ब्रा

ह्मणादयः अंडेभ्यो जायंत इत्यंडजाः पक्ष्यादयः स्वेदजा यूकादयः उद्भिज्जा लतागुल्मादयः ताः सृष्ट्वा संकल्पमात्रेण निर्माय तत्संबंधिनी स्थितिः सुखेन
ह्रियते निबध्यते धर्मादिविधिना प्रतिपाद्यते अनेनेति स्थितिनिबंधनं तच्च धर्मादिप्रतिपादकवेदवाक्यं तत् शतसहस्रसंख्याकाध्यायपरिमितग्रंथेन स
म्यक् प्रकटीचकार तस्यैकदेशं स्वायंभुवो मनुर्धर्माधिकारिकं पृथक् चकार एवं प्रजापतिः नानाशाखागतवेदवाक्यानि वर्गप्रतिपादकानि संग्रथ्य त
देकदेशं मंदानुग्रहाय स्वयंभूस्मनुरूपेण धर्मोधिक्रियते प्रतिपाद्यते अनेनेति धर्माधिकारिकं धर्ममात्रप्रतिपादकं ततः संक्षिप्य प्रकटीचकार बृहस्पति
रर्थाधिकारिकं तदाज्ञया बृहस्पतिर्देवगुरुरर्थमात्रावबोधकं मंदानुग्रहाय संक्षेपेण विशदीचकार एवं प्रजापतिरंगभूतार्थधर्मांशमनुरूपेण
स्थितस्य तृतीयं स्मरं लोके प्रवर्तयितुं तस्यानन्यसाध्यतया परमेश्वरं प्रार्थयामास तेनानुग्रहलब्धसर्वैश्वर्यः प्रमथगणः श्रीनंदिकेश्वरस्त
दाज्ञया परमपुरुषार्थेन तं मोक्षशास्त्रं चकारेत्याह महादेवानुचरश्च नंदी सहस्रेणाध्यायानां पृथक् कामसूत्रं प्रोवाच दीव्यते द्योतयति जगदिति च
देवः महांश्चासौ देवश्चेति महादेवः त्रिविधपरिच्छेदशून्यः ब्रह्मानंदरूपः परमेश्वरः तस्यानुचरः परमभक्तः तत्प्रसादलब्धसर्वैश्वर्यः नंदयति ब्रह्मानं
दं प्रापयसे तच्छास्त्रप्रवर्तनेन प्रजा इति नंदी एतेन ईश्वरानुग्रहमंतरेण न कस्यापि तज्ज्ञानमस्तीति सूचितं स च सर्वेतः अध्यायानां सहस्रेण प्रधानपुरुषा
र्थतया धनविभागवानेकार्थसूचकं कामशास्त्रं प्रोवाच तदेव तु पंचभिरध्यायशतैः औद्दालकिः श्वेतकेतुः संचिक्षेप केवलसल्लप्रयात्नानां क्रमयुगज

वा०सू० न्मनो पुरुषाणामुपकारायश्रीनंदिकेश्वरप्रणीतमेव कामशास्त्रं रजोभिभूतसत्त्वानां त्रेतायुगसंभवानां तेषांमंदमतीनामनुग्रहायउद्दालकपुत्रःश्वेत
४ केतुश्छांदोग्यषष्ठाध्यायप्रतिपादितां निर्गुणब्रह्मविद्यां पितुः सकाशाल्लब्ध्वा तत्रारुच्या ब्रह्मानंदाभिव्यंजकपरमपुरुषार्थप्रतिपादकमिदमेव पंचश
ताध्यायैः शास्त्रसंकोचेनाकरोत् तदेवपुनरध्यर्धेनाध्यायशतेन साधारणसंप्रयोगिककन्यासंप्रयुक्तकभार्याधिकारिकपारदारिकवैशिकौपनिषदि
कैः सप्तभिरधिकरणैर्बाभ्रव्यः पांचालः संचिक्षेप एवं त्रेतायुगे औद्दालकिप्रतिपादितमेव शास्त्रं पंचालदेशोद्भवोबाभ्रव्याख्योमहर्षिः केकयराज
सकाशाद्वैश्वानरविद्यां प्राप्य तत्रास्वारस्यात्तमोभिभूतरजः प्रधानानां द्वापरसंभूतानां ततोऽपि मंदप्रज्ञानाम् पर्यनुकंपया च साधारणादिवक्ष्यमाण
लक्षणैः सप्तभिरधिकरणैस्ततोऽपि ग्रंथतः संक्षिप्य निर्ममे तस्यैकदेशं षष्ठं वैशिकमधिकरणं पाटलिपुत्रिकाणां गणिकानां नियोगाद्दत्तकः पृथक्
चकार एवं युगत्रये महर्षिभिस्तत्तत्कालकृतस्यास्यैकदेशं साधारणादिसप्ताधिकरणेषु षष्ठसंख्यापूरकं वैशिकाख्यमधिकरणं पाटलीपुत्राख्यप्रख्या
तनगरस्थानामगणितगुणानां गणिकानामुपरि नियोगात् कृपावशात् प्रार्थितार्थदातृत्वाद्दत्तकनाममहर्षिर्विभावादिभेदेन विशदी
चकार तत्प्रसंगाच्चारायणः साधारणमधिकरणं पृथक् प्रोवाच तासां वारांगनानां प्रसंगाद्दुपरिकरुणावशात् चारयति अनुष्ठापयति पुरुषमि- ४
तिचारं शास्त्रं तस्याध्यापयितृत्वेनायनं आश्रयः पुरुषविशेषश्चारायणनामा ऋषिः साधारणाख्यमधिकरणं पार्थक्येन प्रणिनाय ५ सुवर्णना

भः सांप्रयोगिकं सुवर्णं ब्रह्मांडं नाभौ कुक्षौ यस्य स सुवर्णनाभः परमेश्वरः तदवतारस्तन्नामा महर्षिः सांप्रयोगिकाख्यं द्वितीयमधिकरणं चक्रे घो
टकमुखः कन्यासंप्रयुक्तकं हयग्रीवावतारो घोटमुखनामा महर्षिः कन्यासंप्रयुक्तकं वक्ष्यमाणलक्षणं तृतीयमधिकरणमकरोत् गोनर्दीयो भा
र्याधिकारिकं गोनर्दयति भारनिर्हरणेनाह्लादयतीति गोनर्दीयः परमेश्वरः तदवतारोऽन्यो महर्षिः भार्याधिकारिकमकार्षीत् गोणिकापुत्रः पार
दारिकं पृथुरिवविधमानायत्तवराहदंष्ट्राग्रेऽगणिकागोरूपालिकागोणिकायत्तवराहोद्धृताभूः तत्पुत्रः शिवाज्ञातोऽङ्गारकः तदवतारः क
श्चनाचार्यः पारदारिकं पंचमं चकार कुचुमार औपनिषदिकं कुचुमारः कुंभस्थिं च वले प्राप्तो तिरश्चितुमिति कुचुः मारयतिदृष्टानिति मारः सोऽसौ स च
परमेश्वरः तदवतारो मारागमपारंगतः कश्चन विपश्चित् औपनिषदिकं सप्तमं प्रकरणं प्रकटीचक्रे एवं बहुभिराचार्यैस्तच्छास्त्रं खंडशः प्रणीतमु-
त्सन्नकल्पमभवत् पूर्वोक्तशास्त्रैकदेशप्रभृतिभिः कैश्चिदाचार्यैरेकैकांशप्रणयनेन कैश्चिदतिविस्तारकरणेन मंदमतिभिः साकल्येनदुरधि
गममेतच्छास्त्रमीषदुत्सन्नमुत्सन्नकल्पं सम्यक् शास्त्रार्थानधिगमात् किंचिदधिगमश्च नष्टप्रायमभूत् एवं संप्रदायस्योध्यर्थे दत्तकाद्याचार्यो
न् तद्ग्रंथांश्च निर्दिश्य स प्रवृत्तो हेतुं सूचयन् तेषामेकैकदेशविषयत्वेनातिविस्तृतत्वेन चस्फुटतां स्वग्रंथस्य शब्दतः संक्षिप्तत्वेन कृत्स्नार्थयोगाच्च
त्वेन च प्राशस्त्यं सूचयन् चिकीर्षितं प्रतिजानीते तत्र दत्तकादिभिः प्रणीतानां शास्त्रावयवानामेकदेशत्वान्महदिति च बाभ्रवीयस्यदुरध्ये

यत्नात्संक्षिप्य सर्वमल्पेन ग्रंथेन कामसूत्रमिदं प्रणीतं तत्र प्रजापतिप्रणीतं नन्दिकारण्येत्यादिभिः प्रणीतमेतच्छास्त्रं च शब्देन संक्षिप्तं कृत्वा
र्थप्रतिपादकं प्राधान्येन कामतत्साधनापनेकार्थसत्त्वकं बुद्धिस्थं कामशास्त्रं भगवता वात्स्यायनाचार्येण प्रतन्यत इति संबंधः बुध्युल्लिखित
त्वेन भूतार्थकक्तप्रत्ययप्रयोगः ननु बाभ्रवीयादिकृतशास्त्रैरेवेष्टसिद्धेः किमनेन न तन्ग्रंथ ग्रंथानां तेषां सत्त्वमिष्यतेऽत्र प्रधानत्वापर
पुरुषविषयत्वेन नमः प्रधानानामिदानीं तन्नानेद्यैर्यत्नान्नैवमिसारमहद्भिश्च बाभ्रवीयस्य दुरध्येयत्वादिति महद्भिश्चेति चकारेण तु शब्द
कादित्यादिकं समुच्चितं अथ तर्हि आधुनिकदत्तकादिप्रणीतैः शास्त्रैरिष्टसिद्धिरिति संसत्तेषामेकैकदेशविषयत्वेन कृत्स्नविषयत्वाभावान्न प्र
क्षावत्प्रवृत्तिसहितत्वात्तत्वादत्तकादिभिः प्रणीतानां शास्त्रावयवानामेकदेशत्वादिति शास्त्रस्यावयवादेवावयवा एकदेशाः साधारणादयः तत्प्रतिपा
दकान्यपि शास्त्राणि शास्त्रावयवाः तेषां दत्तकादिप्रणीतानामेकैकावयवप्रतिपादकत्वान्नैवेष्टसिद्धिरिति भावः कामशास्त्रीयसूत्राणां नरसिंहा
र्येविनिर्मितौ उपोद्घातप्रकरणं वृत्तौ संपूर्णतामगात् भास्करनृसिंहकृतिनाम्नि कृतिनामानंदसंपदभिवृद्धौ श्री उत्तरसूत्रवृत्तौ साधारणमत्र तन्न
तेविशदे एवं प्रेक्षावत्प्रवृत्त्यर्थमस्य शास्त्रस्यानुबंधचतुष्टयं समस्तं तोशिष्टपरिग्रहीतिसंप्रदायशुद्धिं च प्रवृत्तिनिमित्तं चोक्त्वा शिष्यं बुद्धिवैश
यायकर्तव्य कृत्स्नशास्त्रोपयोगित्वेन साधारणत्वं प्रथममधिकरणं विशदयन् तत्रस्य पंचाध्यायान् क्रमेण निर्दिशति तस्यायं प्रकरणाधिकरण

समुद्देशः इत्यादिना प्रकरणानि चाधिकरणानि च प्रकरणाधिकरणानि प्रकरणपदमध्यायानामुपलक्षणं तेषां सम्यगुद्देशनं समुद्देशः नाम्ना व
स्तुसंकीर्तनेन तस्य वक्ष्यमाणशास्त्रस्य अयं बुद्धिस्थः प्रकरणाध्यायाधिकरणनिर्देशो भवतीति शेषः शास्त्रसंग्रहः शास्त्रपदेन शास्त्रप्रतिपाद्य प्र
मेयाणां द्योतलक्ष्येतेतेषां संग्रहः संक्षेपेण प्रतिपादनं क्रियत इति शेषः सूत्रद्वयेनैकाध्यायनिर्देशः प्रतिपाद्यभेदाद्यो भेदः अयमर्थः स प्राधिक
रणात्मकस्यास्य शास्त्रस्य सर्वोपकारिपदार्थप्रतिपादकतया साधारणाख्यं प्रथममधिकरणं तत्र च पंचाध्यायाः तत्र एतावंत्यधिकरणानि ए
तावंति प्रकरणानि तावंतोऽध्यायाः एते प्रमाणादयः प्रतिपाद्या इति संग्रहेणानिर्देशकः प्रथमाध्याय इति त्रिवर्गप्रतिपत्तिः त्रयाणां वर्गस्त्रिवर्गः
धर्मार्थकामाः तस्य स्वरूपं प्रमाणं साधनं च प्रतिपाद्यते तापत्ये तेनेनेति प्रतिपाद्य इति चतुर्थसत्ता तत्सर्वे द्वितीयाध्यायप्रतिपाद्यमिसर्थः विद्यास
मुद्देशः विद्या वक्ष्यमाणाः गीतवाद्यादयः तदधिकारित्वकालतत्साधनत्वस्वरूपप्रतिपादकस्तृतीयाध्यायः नागरिकवृत्तं नगरे भवाः नागरिकाः
तेषां वृत्तमिव वृत्तं वर्तनं उद्देश्यान्नपानादिसेपादनं चतुर्थाध्यायप्रतिपाद्य नायकसहायदूतीकर्मविमर्शः नायिकाश्च नायकाश्च नायकाः पुमान् स्त्रिये
त्येकशेषः सहायादूत्यादयः कर्मवाद्यनृत्यालेख्यमणिभूमिकाकर्मशयनरचनमाल्यग्रथनादिरूपं एतेषां स्वरूपं प्रयोजनं च पंचमाध्यायप्रतिपाद्यं
पाद्यं एवं साधारणाधिकरणे पंचभिरध्यायैः प्रकरणादिसमुद्देशः क्रियत इति प्रतिज्ञायतमेवाहध्यायाः पंच ७ प्रथमाधिकरणेऽध्यायाः पंच एक

देशार्थमात्रप्रतिपादकवाक्यसमुदायो ऽध्ययनविषयत्वादध्यायशब्दार्थः ॥ अधिकरणविचारः प्रथमाधिकरणे प्रकरणानि पंच प्रस्तुनैकदेशमात्रप
र्यवसन्नत्वं प्रकरणशब्दार्थः ॥ अथ सांप्रयोगिकाख्यद्वितीयेधिकरणे दशभिरध्यायैः सप्तदशभिः प्रकरणैश्च प्रतिपाद्यमर्थं संक्षेपेण निर्दिश
ति प्रमाणकालभावेभ्यो रतावस्थापनं प्रीतिविशेषाः प्रमाणानि च कालाश्च भावाश्चेति प्रमाणकालभावाः प्रमाणानि शशमृगीत्वादीनि कालाः
शीघ्रमांद्यादयः भावाः अनुरक्तो ऽहमस्येत्यभिमानादयः एभ्यो जाता निरतानि रहःशयनाद्युपरतान्यन्तानि तेषामवस्थापनसंपादनप्रकाराः प्रीति
विशेषाः रागरसाद्यपरपर्यायाः एते प्रथमाध्यायप्रतिपाद्या इति शेषः एवं संक्षिपेण प्रथमाध्यायप्रतिपादितार्थमेव नवभिरध्यायैः प्रतन्यते तानि
वननवभिः सूत्रैर्निर्दिशति ॥ आलिंगनविचाराः इत्यादिना ५ ॥ आलिंगनानि स्पृष्टकादीनि तेषां विचाराः प्रकाराः द्वितीयाध्यायप्रतिपाद्याः चुंबनविकल्पाः
चुंबनानि ललाटकपोलादिस्थानेषु मुखेन सशब्दस्पर्शनानि तेषां विकल्पाः जातिगणपुरुषादिभेदेन नानाप्रकाराः तृतीयाध्यायप्रतिपाद्याः नख
रदनाज्जातयो दशनच्छेद्यविधयः नखाश्च रदनाश्च तेषां जातयः देशभेदेन मृदुत्वक्लिष्टत्वादयः चतुर्थाध्यायप्रतिपाद्याः दशनशब्देन खा
नामप्युपलक्षणं तैश्छेद्याः कक्षोन्तादिप्रदेशाः विषयः मयूरपदादिप्रकाराः देश्याउपचाराः देशेषु वाल्हीकादिषु भवाः देश्याः प्रणयनाः तासां यो ६
ग्याउपचाराः पंचमाध्यायप्रतिपाद्याः संवेशनप्रकाराः श्चित्ररतानि संवेशनं शयनं तस्य प्रकाराः पार्श्वशयानादयः चित्ररतानि माजोरवाणहा

धानं ब्राह्मणप्राजापत्यादिप्रकाराः संबंधानां उच्चनीचादिसंबंधानां निर्णयः परिहारः तृतीयाधिकरणे प्रथमाध्यायप्रतिपाद्यः कन्याविस्रं
भणं कन्यानां विवाहितदाराणां निशि विजने विस्रंभणं मृदूपायैर्वशीकरणं द्वितीयाध्यायप्रतिपाद्यं बालोपक्रमा इंगिताकारसूचनं बालस्यमा
तापित्रानियुक्तस्योपक्रमं तदुपक्रमाः कन्यासहितबालकर्तृकपुष्पापचयपुष्पग्रथनमध्यमांगुलिग्रहणादयः तस्या इंगितस्याभि
प्रायस्याकारैर्नेत्रनिमीलनताम्बूलदानसंमुखसंवीक्षणादिभिः सूचनं तृतीयाध्यायप्रतिपाद्यं एकपुरुषाभियोगः प्रयोज्यस्योपावर्तनमभि
योगतश्च कन्यायाः प्रतिपत्तिः एकेन पुरुषेणाभियोगः अभियोजनं गोष्ठीवर्धनोदकसेचनसहशयनादिरूपः कार्यः प्रयोज्यस्योक्तरूप
स्य सकाशात्स्वानुरक्तायाः प्राप्तियाउपावर्तनं इतिवृत्तिः अभियोगतः अभियोगैः सार्वविभक्तिकस्तसिः इंगिताकारप्रदर्शनैः अलाभे मातृ
धात्र्यादिभिः प्रतिपत्तिः स्वाधीनता चतुर्थाध्यायप्रतिपाद्यं विवाहयोगः गांधर्वादिविवाहप्रदर्शनं पंचमाध्यायप्रतिपाद्यं इति कन्यासंप्रयुक्तकं ॥
तृतीयमधिकरणं कन्यायाः संप्रयोगाः स्वाधीनोपायाः प्रतिपाद्यं तेस्मिन्निति कन्यासंप्रयुक्तकं न दारस्य तृतीयाधिकरणप्रतिपाद्यं समाप्तमिस
र्थः अस्मिन्नधिकरणे अध्यायाः पंच प्रकरणानि नव भवंतीति शेषः ॥ अथ चतुर्थाधिकरणे प्रथमाध्यायप्रतिपाद्यं निर्दिशति एकचारिणी ७
वृत्तं एकस्मिन्नप्रसावेव चरत्यानुकूल्येन नेष्टनीस एकचारिणी पतिव्रता तस्याः वृत्तं गुरुशुश्रूषादिकं प्रवासचर्या प्रसौ प्रवासं गते सति तस्या एव च॥

रिवंधविशेषाः षष्ठाध्यायप्रतिपाद्याः प्रहणनयोगास्तद्युक्ताश्च सीत्कृतोपक्रमाः प्रहणनेनानुवर्तनेन युज्यंत इति प्रहणनयोगाः प्रहणनस्या
नानि स्तनांतरजघनपार्श्वादीनि तद्युक्तानि उपक्रम्यंते क्रियंत इत्युपक्रमाः कृतअभिहितन्यायेन उपक्रम्यमाणानि सीत्कृतानि कूजितरुदितध्व
न्तानां वार्थशब्दप्रयोगादयः एते सप्तमाध्यायप्रतिपाद्याः पुरुषायितं पुरुषोपसृप्तानि पुरुषवदाचरितं पुरुषायितं भावे क्तः पुरुषस्य अममु
पलभ्य कुतूहलाद्वा साहाय्यकरणे पुरुषकर्तृकाणि नीवीविश्लेषणादीन्यष्टमाध्यायप्रतिपाद्यानि औपरिष्टकं निमित्तं पार्श्वेतोदष्ट्व हिः
संदंशाद्यष्टविधं वदने जघनकर्म नवमप्रतिपाद्यं रतारंभावसानिकं रतिविशेषाः प्रणयकलहः रतानां उपवेशनमाल्यालंबनपरिष्वंगादीनामारं
भउपक्रमः आवसानिकं रागमतिवात्स्यष्यविष्टयग्वहिर्गमनं रतविशेषाः श्रमापन्नोदायचंद्रिकासेवनारुंधतीनिरीक्षणादीनि प्रणयकल
हः प्रणयिषु तत्सूर्वेकसंज्ञापादिसमयेषु अप्रथाोत्सपत्नीनामग्रहणे कलहः रुदितवक्षोजप्रहणनमाल्यभूषणावमोक्षणभूशयनादिरूपः द
शमोध्यायप्रतिपाद्यः इति सांप्रयोगिकं द्वितीयमधिकरणं संप्रयोगाः रतानि प्रमाणकालादिजन्यानि रहःशय्याद्युपरतानि इत्थं प्रणयकलहां
तानामुपलक्षणं तानि प्रतिपाद्यं तेलक्षणपरीक्षाभ्यां निर्णीयंते स्मिन्निति सांप्रयोगिकाख्यं द्वितीयाधिकरणप्रतिपाद्यमिति पी समाप्तमित्यर्थः
अध्याया दश प्रकरणानि सप्तदश भवंतीति शेषः अथ तृतीयाधिकरणप्रक्रियावरणविधानं संबंधनिर्णयः वास्यकन्यापरिग्रहस्य विधिः वि

यी स्थंडिलशयनादिः प्रथमाध्यायप्रतिपाद्यः सपत्नीषु ज्येष्ठावृत्तं कनिष्ठावृत्तं पुनर्भूवृत्तं दुर्भगावृत्तमांतःपुरिकं पुरुषस्य बहूषु प्रतिपत्तिरि
ति सपत्नीषु सतीषु स्वयं ज्येष्ठया इतरासु वर्तनं भगिनीष्विव वर्तनादिकं कनिष्ठायाः ज्येष्ठासु तासु वृत्तं मातृवद्वर्तनं पुनर्भवति अन्यं प्राप्नोतीति
पुनर्भूस्तस्या वृत्तं तत्सखीशिश्रूषादिकं दुर्भगाया अपत्यरहिताया भर्तारि वर्तनं आंतःपुरिकं अंतःपुरे भवं राजस्त्रीवृत्तं पुरुषस्य नायकस्य ब
ह्वीषु तासु सतीषु यथायोग्यं वर्तनप्रकारः द्वितीयाध्यायप्रतिपाद्य इत्यर्थः भार्याधिकारिकं चतुर्थमधिकरणं अध्यायौ द्वौ प्रकरणान्यष्टौ ना-
यीमधिकृत्य प्रवृत्तं भार्याधिकारिकं तन्नामकं चतुर्थाधिकरणप्रतिपाद्यं समाप्तमित्यर्थः अथ पंचमाधिकरणे प्रथमाध्यायार्थं निर्दिशति स्त्री
पुरुषशीलावस्थापनं स्त्रियश्च पुरुषाश्च तेषां शीलस्य भावः तस्यावस्थापनं विविच्य कथनं क्रियत इत्यर्थः व्यावर्तनकारणानि व्यावर्तनं परावनु
रागः तत्कारणानि अप्रतिक्रांतवयस्त्वादीनि स्त्रीषु सिद्धाः पुरुषाः स्त्रीषु विषयेषु सिद्धाः सतोऽनुरक्ताः पुरुषाः कामसूत्रज्ञाः अयत्नसाध्या योषितः अयत्ने
न अप्रतियत्नं विना साध्याव श्यानि रमसाध्या योषितः इति प्रथमाध्यायप्रतिपाद्यं परिचयकारणानि परिचयेन नायिकासख्येकारणानि सहोद्यानगमना
दीनि अभियोगाः अभियुज्यंते वशीक्रियंते योषित एभिरित्यभियोगाः नायिकासमीपे नालमुखचुंबनादयः द्वितीयाध्यायप्रतिपाद्यं भावपरीक्षा भावः
नायिकायाः स्वानुरागस्तस्य परीक्षा निरीक्षणभ्रूविक्षेपादिज्ञापनहेतवः तृतीयाध्यायप्रतिपाद्य दूतीकर्माणि दूतः पत्रहारिणीप्रभृतयः तासां कर्मा

का॰सू॰
८

णि च नायकचातुर्यकथनादीनि चतुर्थाध्यायप्रतिपाद्यं ईश्वरकामितं ईश्वरो राजा तस्य कामितं कामितस्त्रीनिश्रेयो पायाः पंचमाध्यायप्र
तिपाद्यं आन्तःपुरिकं आन्तःपुरिका राजपरिग्रहाः तासां विनोदाः दासीपुरुषवदलंकृत्य लाभिप्रायनिर्वर्तनादयः आरक्षितकं दाराणां पर
पुरुषेभ्यो रक्षणप्रकारः षष्ठाध्यायप्रतिपाद्यं अध्यायाः षट् प्रकरणानि दश अत्रैतिशेषः इति पारदारिकं पंचममधिकरणं अधिकरणप्रति
पाद्यनिर्देशः अथ षष्ठाध्यायप्रतिपाद्यं निर्दिशति गम्यचिंतागमनकारणानि उपावर्तनविधिः वेश्यानां स्वयं गम्यागम्यनायकविचारः गमनकार
णानि स्वकशाणिकाप्रलापनप्रेक्षणादीनि विधीयते अनुष्ठीयत इति विधिः उपावर्तनमेव विधिः तांबूलस्रगनुलेपनादिः प्रथमाध्यायप्रति
पाद्यं कांतानुवर्तनं कांताया एकचारिणा वृत्तमनुसृत्य नायकरंजनार्थं वर्तनं द्वितीयाध्यायविषयः अर्थागमोपाया निरक्तलिंगानि विरक्तप्रति
पत्तिर्निष्कासनप्रकाराः अर्थस्य आगमनायकसकाशाल्लाभः तत्रोपायाभ्यन्तलाभप्रतिपादनादयः विरक्तस्य स्वरूपाणि लिंगानि ज्ञानसाधनानि मुख
वैवर्ण्यादीनि विरक्तस्य निर्धनस्य प्रतिपत्तिः तत् ज्ञानसाधनानि निष्कासनप्रकाराः निर्धननायकस्य निष्कासने स्वगृहान्निर्यापणे प्रकारा उपाया
नखक्षतजुगुप्सादयः तृतीयाध्यायप्रतिपाद्यं विशीर्णप्रतिसंधानं विशीर्णस्य स्वस्यां विरागादन्यत्र गतस्य धनिकस्य प्रति संधानं स्वस्यामनु ८
रागोत्पादनं पीठमर्दादिभिः चतुर्थाध्यायप्रक्रिया लाभविशेषः लाभे नानानायकेभ्यो द्रव्यलाभे तुल्ये पिशुगपद्गम्यत्वे बहुकालरागित्वादि

भिः गमने विशेषः पंचमाध्यायप्रमेयं अर्थानर्थानुबंधसंशयविचारः अर्थो धर्मोदयः अनर्थो अधर्मोदयः अनुबंधो अनुनिष्पादिनः संशयः
संदेहः एषां विचारः वेश्याविशेषाश्च वेश्यानां विशेषा अवांतरभेदाः षष्ठाध्यायगोचरः अध्यायाः षट् प्रकरणानि द्वादश इति वैशिकाख्य
षष्ठाधिकरणप्रतिपाद्यनिर्देशः अथ सप्तमाधिकरणप्रतिपाद्यं निर्दिशति सुभगकरणं वशीकरणं वृष्याश्च योगाः सुभगा रूपगुणवयोयुक्ताः
क्रियंते एभिरिति सुभगकरणानि वशीक्रियंते नायिका एभिरिति वशीकरणानि वक्ष्यमाणलक्षणांजनादीनि नितांतविके वचनं वृष्याः प्रीतिजन
काः युज्यंत इति योगाः साधनानि प्रथमाध्यायप्रतिपाद्यं नष्टरागप्रत्यानयनं वृद्धिविधयश्चित्राश्च योगाः नष्टस्य उपायैर्नाशितस्य रागस्य प्रत्या
नयनं पुनः संपादनं रागस्य नाशे संपादने चोपायाः वृद्धीरतिवृद्धिर्विधीयते एभिरिति वृद्धिविधयो रसविशेषाः चित्राः वस्तुनिवस्त्वंतरबुद्धिकराः
योगाः साधनानि अनुक्तसमुच्चयार्थश्चकारः तच्च निर्दुष्टत्वादितदेतः द्वितीयाध्यायप्रतिपाद्यं इत्यौपनिषदिकं सप्तममधिकरणं अध्यायौ द्वौ प्र
करणानि षट् एवं षट्त्रिंशदध्यायाः चतुःषष्टिः प्रकरणानि अधिकरणानि सप्त सपादं श्लोकसहस्रमिति शास्त्रसंग्रहः शास्त्रस्य कृत्स्नशास्त्र-
स्य संग्रहः संग्राहकः प्रथमाध्यायः इति समाप्तः इत्यर्थः अस्योत्तरशास्त्रेण संगतिमाह संक्षेपमिममुक्त्वास्य विस्तरोऽतः प्रवक्ष्यते इष्टं हि विदु
षां लोके समासव्यासभाषणं संक्षेपं संपूर्णशास्त्रसंग्राहकं इमं प्रथमाध्यायमुक्त्वा अतः आकांक्षितत्वात् अस्य निर्दिष्टस्यैव विस्तरः प्रतन्यते

का॰सू॰ लक्षणपरीक्षाभ्यांवैशद्यंक्रियतइत्यर्थः अनेनप्रसंगसंगतिःसूचिताभवतिननुत्रिवर्गस्यलक्षणादिभिःप्रतिपादनेनैवार्थादुद्देशस्यापिसिद्धेः। किंच
१० थगुद्देशेनेत्याशंक्याशिष्यबुद्धिवैशद्यार्थंवादरायणादिभिःकृतत्वाच्चयुक्तमित्याह इदंहीति विदुषांव्यासादीनांसमासेनसंक्षेपेणव्यासेनवि
स्तारेणचप्रतिपाद्यस्यभावस्यकथनंदृष्टंहिदृष्टेनोऽप्यतइदंयुक्तमितिशेषः वादरायणोहितत्तुसमन्वयादित्यतेनसंक्षिप्यमेवईक्षतेरित्यादिकृत्स्न
शास्त्रेणविपुलीचकार सएव विस्तार्यैतन्महज्ज्ञानमृषिःसंक्षिप्यचाब्रवीत् इष्टंहिविदुषांलोकेसमासव्यासधारणमितिचभाषाभारतेऽप्या
दिपर्वणि एवंगौतमोऽपिप्रमाणप्रमेयेत्यादिनापदार्थानुद्दिश्यप्रमाकरणमित्यादिकृत्स्नशास्त्रेणस्पष्टीचकारेतद्वदितिभावः इतिश्रीवात्स्यायनी
येकामसूत्रेसाधारणेप्रथमेऽधिकरणेशास्त्रसंग्रहः प्रथमोऽध्यायः १ भास्करनृसिंहशास्त्रीशास्त्रिकामस्यसंग्रहाध्यायं व्याख्यायकृत्स्नशास्त्रव्या
ख्यातात्ख्यानसाहितीसारः एवंप्रथमाध्यायेकृत्स्नशास्त्रप्रतिपाद्यार्थंनिर्दिश्यद्वितीयाद्यध्यायेषुक्रमेणप्रतिपादयतिशतायुरित्यादिना शता
युर्वैपुरुषोविभज्यकालमन्योन्यानुबद्धंपरस्परस्यानुपघातकंत्रिवर्गंसेवेत शतायुःपुरुषःत्रिवर्गंसेवेतेत्यन्वयः शतपदंज्योतिःशास्त्राद्यवगत
कालोपलक्षणं आयुःप्राणधारणानुकूलोयत्नः त्रयाणांवर्गःत्रिवर्गः धर्मार्थकामाःसेवनसाधनैस्तत्संपादनंननुत्रयाणांयुगपत्संपादनास १०
भवादन्यतमस्यत्यागःस्यादित्यतआह परस्परस्यानुपघातकंएकेनइतरयोरभिभवोयथानस्यात्तथावास्येविद्यामित्येवंवक्ष्यमाणप्रकारेण–

कालंविभजेदित्यर्थः एवमपिबाल्येविद्यामभ्यस्यकेचित्कालमुदासीनोयदिआयुषःक्षणलेशोऽपिनलभ्यःस्वर्णकोटिभिरित्यभियुक्तोक्तिविरोध
इत्यतोऽन्योन्यानुबद्धमिति अविच्छेदेनपरस्परसेवनानुकूलंयथा तथाचकालंविभज्यत्रिवर्गंसेवेतेत्यर्थः तमेवकालंविभज्यदर्शयति बाल्येवि
द्याग्रहणादीनर्थान् कामंचयौवनेस्थाविरेधर्मंमोक्षंच बाल्येग्रहणधारणपाटवसमयेविद्याग्रहणादीनर्थान् सेवेतेतिसर्वत्रानुषज्यते
यौवनमिन्द्रियाणांपुष्टिसमयः कामंचेतिचकारात्तत्साधनपरिग्रहःस्थाविरइन्द्रियोपरतिकालेधर्मंमोक्षंचउपायानुष्ठानेनसंपादयेदित्यर्थः
यद्यपिधर्मस्यसन्निपत्योपकारतयाप्राक्संपादनमेवयुक्तं तथापिबाल्यसंपाद्यविद्यादेरप्युपकारकतयाभ्यन्तरएवस्थाविरेतदनुष्ठानमि
तिसूचयितुंतथाभिधानंअतएवज्योतिष्टोमेनस्वर्गकामोयजेतेत्यादावर्थोपस्थाऽपूर्वलाभइत्याहुर्भट्टपादाः मोक्षग्रहणंतुआनंदानुभवानपे
क्षाणांधर्मानुष्ठानाशक्तानामेवमोक्षेऽधिकारइतिसूचनार्थंअतएवांधपंग्वादीनामेवमोक्षमिच्छंतीत्याहुःशबरभाष्यकाराः नचैवमपिधर्मस्यप्र
वर्तनाद्रूपतयालिङ्गादिनिष्ठत्वेनदुःसंपाद्यत्वमितिशंक्यंसाधनानुष्ठापनेनतत्साध्यापूर्वसंपादनस्यैवतथात्वादितिदिक् ननुज्योतिः
शास्त्रादिनाकालनिर्णयाभावेकागतिरित्यतआह अनित्यत्वादायुषोयथोपपादंवासेवेत त्रिवर्गमित्यनुषज्यते आयुषःअनित्यत्वात् इयत्तानिर्ण
याभावेयुगपत्सेवनेनिमित्तत्वात्संचमीयथोपपादंयथायोग्यंकालंविभज्यप्राग्धर्मसेवासंगवेचार्थसेवाततः कामसेवेतिपाराशर्यमिताक्ष

का॰ सू॰ रागयुक्तो न्यास्त्रिवर्गं सेवेतेत्यर्थः ननुएकस्मिन्नेत्रितयानुष्ठानेप्रविष्टस्तुतब्रह्मचर्यो लक्षणं निषिद्धं हि दितियाज्ञवल्कास्मृतौ विद्याग्रहणरू
१० पार्थसेवनेब्रह्मचर्यविधानात्तद्विरोधइत्यतआह ब्रह्मचर्यमेवत्वाविद्याग्रहणादिति आविद्याग्रहणं विद्याग्रहणपर्यंतंब्रह्मचर्यमेवकुर्यादि
तिशेषः तथाचविद्याग्रहणव्यतिरिक्तार्थसंपादनएवयोगपद्योक्तेनतद्विरोधइतिभावः अतएवराजसेवासंगवद्रुत्याहमाधवः इतिशब्दः का
लविभागसमाप्तिसूचकः अथनिर्देशक्रमेणधर्मादीनांलक्षणान्याह अलौकिकत्वाद्दिसादिना तत्राविमुख्यत्वात्प्रवर्तमाख्यधर्मस्यलक्षणं
मावदाह अलौकिकत्वाददृष्टार्थत्वाद्प्रवृत्तानांशास्त्रात्प्रवर्तनं शास्त्रलिङ्गादितद्वृत्तित्वेसतिप्रवृत्त्यनुकूलसंप्रवर्तनाख्यधर्मत्वंइदमेवल
क्षणावाक्यंअन्यतरस्वरूपकथनं ननुनिसर्गसुंदरेफलेसाधनेस्वनएवप्रवृत्तेःकिंशास्त्रेणेत्यतआह अदृष्टार्थत्वादप्रवृत्तानामिति अदृष्टं तद
स्यार्थःफलेनादृष्टोऽदृष्टः चक्षुरादिजन्यज्ञानाविषयइत्यर्थः तथाचलष्यादिवत्प्रत्यक्षत्वान्नस्वतःप्रवृत्तिर्भोक्तरीतिभावः ननुफलसाधनता
ज्ञानाभावेपिजलताडनादाविवकेषांचित्प्रवृत्तिःकिंनस्यादतआह अलौकिकत्वादिति तत्साधनस्ययागादेर्जलादिवल्लोकासिद्धत्वान्नकेषामपि
प्रवृत्तिसंभवइतिभावः निवर्तनाख्यधर्मस्यलक्षणमाह लौकिकत्वात् दृष्टार्थत्वाच्चप्रवृत्तेभ्यश्चमांसभक्षणादिभ्यः शास्त्रादेवनिवारणंधर्मः अत्रा १०
पिशास्त्रमात्रवृत्तिनिवृत्त्यनुकूलव्यापारत्वमेवलक्षणंननुयागादाविवप्रवर्तकाभावेनद्रात्किंनिवर्तनेनेत्यतआह लौकिकत्वादित्यादियागादे

र्लोकाप्रसिद्धत्वात् फलस्यअदृष्टरूपत्वाच्च शास्त्रंविनाप्रवृत्त्यभावेपिमांसभक्षणादेस्तद्विपरीतत्वाद्रागादेवप्रवृत्तिसंभवइतिभावः अत्र रा ज्ञा
ज्ञादावनतिव्याप्तयेमात्रपदं सामान्यलक्षणंतत्क्रमेव एवंलक्षणमुक्त्वातज्ज्ञानसाधनमाह तंकुतेर्थमेत्तसमवायाच्चप्रतिपद्येत तंधर्मंश्रु
तेःयज्जेनेत्यादितः धर्मज्ञसमवायात्शिष्टाचारात् चकारात्कल्पसूत्रादिस्मृतिभ्यः प्रतिपद्येतज्जानीयात् अथार्थंलक्षयति विद्याभूमिहि
रण्यपशुभांडोपस्करमित्रादीनामर्जनमर्जितस्यरक्षणंरक्षितस्यविवर्धनमर्थः विद्याश्चतुःषष्टिकलावक्ष्यमाणाःअन्यादयःप्रसिद्धाःउपस्क
रःशय्यासनादिः अर्जनंस्वाम्यात्पादनंरक्षणंपरिपालनंवर्धनंतन्मूलेनद्रव्यांतरस्वाम्योत्स्वाम्योत्पादनंएतदन्यतमनिरूपितस्वाम्योत्पादनाद्य
न्यतमत्वमर्थलक्षणं तत्प्राप्त्युपायानाह तमध्यक्षप्रचाराद्वार्तासमयविद्भ्योवणिग्भ्यश्चेति अध्यक्षाराजपुरुषास्तेषांप्रचारात् सद्व्यवहारात् वा
र्तावाणिज्यंतत्समयविद्भ्यःतदुपायज्ञेभ्योवणिग्भ्यश्च तमर्थोपायंजानीयादितिशेषः सन्निपत्योपकारकारणांलक्षणमुक्त्वाआराद्उपकार
कारणंतदाह श्रोत्रेति सन्निपत्योपकारकत्वंविनावोपकरणद्वाराप्रधानोपकारित्वं आराद्उपकारकत्वंतुतेनप्रधानेजननीयेसारभिव्यक्तावुप
योगित्वंएतत्सूचनायैवपूर्वपूर्वत्रेतिकारः श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामात्मसंयुक्तेनमनसाधिष्ठितानांस्वेषुस्वेषुविषयेषुआनुकूल्यतःप्रवृत्तिः
कामःस्पर्शविशेषविषयत्वाभिमानिकसुखानुविद्धफलवत्यर्थप्रतीतिःप्राधान्यात्कामःनिरूपितत्वंषष्ठ्यर्थः विषयशब्दोविषयसंनिकर्षपरः ज

न्यत्वे सप्तम्यर्थे। आनुकूल्येन सः विषयत्वं पञ्चम्यर्थः प्रवृत्तिरनुभवः आत्मसहितमनःसंयुक्तश्रोत्रादीन्द्रियतमनिरूपिततत्तद्विषयसंयोगजन्यरसानु
भवत्वमंगकामस्य लक्षणं आनंदाभिव्यंजकत्वात् महानंदाभिव्यंजकमुख्यकामोपयोगितया चास्यांगकामत्वं मुख्येति व्यावृत्तिवारणाय जन्यां
तं मुख्यकामस्य लक्षणं चाचोंस्पर्शविशेष इत्यादि स्पर्शविशेष इंद्रियविशेषसंयोगः तद्विषये तदर्थे योऽभिमानः अहमनेनाभियुक्ता अहमेना
भियोक्ते सेवरूपः तज्जन्यः यस्तु खंदर्थः तदनुविद्धा तदनंतरभाविनी फलवती आनंदविषयिणी अर्थो अर्थ्या प्रतीतिरनुभवः अर्थात् इंद्रियवि
शेषसंयोगजन्येति गम्यते एवं च इंद्रियविशेषसंयोगजन्यवृत्तिविशेषत्वं मुख्यकामत्वमिति फलितं लक्षणं मुख्यत्वं च द्वानंदाभिव्यंजकत्वं स्प
र्शविशेषोद्देश्यकाभियोगाभिमानजन्यहर्षानंतरभाविरसविषयकवृत्तिः मुख्यकाम इति सूत्रार्थः तदुपायाद्यवबोधनसाधनान्याह तं काम
सूत्रान्नागरिकजनसमवायाच्च प्रतिपद्येत कालस्त्रातभेदेनात्तस्यानुष्ठाने मुख्यगौणभावोप्याह तेषां समवाये पूर्वः पूर्वो गरीयान् तेषां
धर्मादीनां समवाये समुदाये एकापेक्षाबुद्धिविषयत्वं समुदायशब्दार्थः पूर्वः पूर्वः पूर्वस्य पूर्वस्येति विप्सानुपूर्व्यः अर्थस्तु राज्ञस्तन्मूलत्वा
ल्लोकयात्राया वेश्यायाः कामश्चेति त्रिवर्गप्रतिपत्तिः अर्थस्त्विति तुशब्दात् ब्राह्मणस्य धर्म एवेति सूच्यते राज्ञः सेव्य इति शेषः राजपदं वैश्या ११
साद्युपलक्षणं तन्मूलत्वात् अर्थाधीनत्वात् लोकयात्रायाः लोकव्यवहारस्य वेश्यापदं शूद्रस्याप्युपलक्षणं चरत्वं धारणा अयं भावः तत्ती

यस्य मुख्यत्वेपि आमुष्मिकपरमत्तत्साधनतया यागादिरेव ब्राह्मणस्य प्राधान्येन इतरत् अप्राधान्येन राजादेस्तु प्रजापालनस्यैव मुख्यधर्मत्वात्
त्साधनत्वादर्थस्य स एव शूद्रस्य तत्तदनधिकारेण काम एव सेव्य इति त्रिवर्गप्रतिपत्तिः त्रिवर्गस्य स्वरूपं लक्षणं प्रतिपत्तिसाधनं चोक्तमित्यर्थः य
तु विरंभण्णोक्तं कामप्रतिपत्तिसाधनयोः एतत्सूत्रनागरिकजनसंघयोर्मध्ये तत्प्रतिपत्तौ पूर्वो गरिष्ठ इत्यर्थ इति तत् तेषां पूर्वः पूर्व इति सूत्रप
दस्वारस्यभंगात् उत्तरसूत्रसंदर्भविरोधाच्चोपेक्ष्यं ननु धर्मस्य शास्त्रैकसमभिगम्यतयाऽर्थस्य लौकिकत्वेपि तदुपायस्य तथात्वेन तच्छा
स्त्रसाफल्येपि कामस्य शास्त्रं तत्साधनावबोधविधुरतिर्यगादिसेवनतया किं शास्त्रेणेत्याशंक्यते धर्मस्यालौकिकत्वात्तदभिधायकं शास्त्रं युक्तं
उपायपूर्वकत्वाच्चार्थसिद्धेरुपायप्रतिपत्तिश्च शास्त्रात् तिर्यग्योनिष्वपि तु स्वयं प्रवृत्तत्वात्कामस्य नित्यत्वान्न शास्त्रेण कृत्यमस्तीत्याकारप्रतिपाद
कं च शास्त्रश्रुतिस्मृत्यादिकं युक्तं अर्थवत् अर्थसिद्धेः अर्थस्य लौकिकत्वेपि तत्सिद्धेस्तत्कामस्य उपायपूर्वकत्वात् संविभागादिसाध्यत्वात् उपाय
प्रतिपत्तिश्च उपायज्ञानं शास्त्रादेव भवतीति तच्छास्त्रं युक्तमिति शेषः कामस्य तु तु शब्दः पूर्ववैलक्षण्यसूचकः तिर्यगंच्चतिगच्छत्याहारायेषां ते
तिर्यंचो योमयः कारणं येषां ते तिर्यग्योनयो गवादयः अपिशब्दः कैमुत्यसूचनार्थः तेष्वपि स्वयं शास्त्रमंतरेण प्रवृत्तत्वात् सेव्यत्वप्रसिद्धत्वात् नि
त्यत्वात् कालाद्यनपेक्षत्वाच्च शास्त्रेणानेन कृत्यं नास्तीति केचनाचार्या धर्मादिप्रवर्तकाः मन्यंते तन्मतं दूषयति संप्रयोगः पराधीनत्वादुपायम

पेक्षत्वेन संप्रयोगः इंद्रियविशेषसंयोग उपायं साधनं पुरुषकर्तृकं अपेक्षत इत्यर्थः कुतः पराधीनत्वात् योषिदधीनत्वात् स्वस्येति शेषः सा चो
पायप्रतिपत्तिः कामसूत्रादिति वात्स्यायनः सा च संप्रयोगापेक्षिता उपायप्रतिपत्तिः साधनत्वात् तिर्यग्योनिषु पुनरनावृतत्वात् स्त्रीजातेश्च ऋ
तौ यावदर्थं प्रवृत्तेरबुद्धिपूर्वकत्वाच्च प्रवृत्तीनामनुपायः प्रत्ययः तिर्यग्योनिषु पश्वादिषु विषये शास्त्रं नेष्यत एवेति शेषः कुतः तेषामनावृतत्वा
त् शास्त्रानधिकृतत्वात् स्त्रीजातेः ब्राह्मणादिस्त्रीणां संवंधो विमत्यर्थः ऋतौ ऋतुकाल एव यावदर्थं यावदनुभवं प्रवृत्तेः ब्राह्मणादी
नां विहितत्वादिति शेषः तासां प्रवृत्तीनां अबुद्धिपूर्वकत्वात् इति छेदः सौत्रत्वात्परत्वं ऋतुस्नानं विना अप्रसंभवात् प्रत्ययः ऋतुकाल बो-
धः अनुपायः शास्त्रव्यतिरिक्तोपायरहितः अतः शास्त्रमर्थवदिति शेषः अयं भावः मनुष्याधिकारत्वाच्छास्त्रस्येति न्यायेन तदनधिकृतानां तिर
श्चां तद्दृष्टफलेऽपि ऋतौ स्त्रियमुपेयादिति नियमपरिसंख्यान्यतरात्मकविधिना ऋतावेव स्त्रीणां गम्यत्वेन तत् ज्ञानस्य शास्त्राधीनत्वात् इति वि
शेषस्य संप्रयोगसाध्यत्वेन तस्य च संप्रयोगस्याधीनत्वात् तस्योपायलभ्यत्वात् उपायानां च शास्त्रैकसमधिगम्यत्वाच्चातिशास्त्रसाफल्यमिति
नन्वामुष्मिकपरमपुरुषार्थसाधनतया धर्मादिरेव ब्राह्मणादेः प्राधान्येन सेव्य इत्युक्तमयुक्तं सिद्धमन्नं परित्यज्य साधिताशायेन प्रत्यक्षफलपरित्यागे १२.
न सांशयिकफलधर्मानुष्ठानानुपपत्तेरिति लोकायतिकशंकतेन धर्मांश्चरेदैष्यत्फलत्वात् सांशयिकत्वाच्च को ह्यबालिशो हस्तगतं परगतं कुर्या

त् वरमद्य कपोतो न श्वो मयूरः वरं सांशयिकान्निष्कादसांशयिकः कार्षापण इति लोकायतिकाः धर्मान् यागादीन् न चरेत् नाचरेत् समीप्सका
रीति शेषः कुतः एष्यत्फलत्वात् कालांतरभाविफलजनकत्वात् कालांतरफलजननस्यापि सांशयिकत्वात् संदिग्धत्वात् अबालिशः प्रेक्षावान्
हस्तगतं सिद्धफलं त्यक्त्वा परगतं कालांतरभावि संदिग्धफलं कर्म कः कुर्यात् न कोऽपीत्यर्थः इममेवार्थं दृष्टांतेन विशदयति द्वितीयेन श्वस्तन
रत्ने मयूरे लभ्यश्चेदपि अद्य वर्त्तमानकाले कपोतः लब्धश्चेद्वरं सांशयिकात् लाभालाभसंदिग्धात् निष्कात् दीनारात् असांशयिकः निश्चितः कार्षा
पणः षोडशपणसंघः वरमित्यर्थः तन्मतं दूषयति शास्त्रस्यानभिशंक्यत्वादभिचारानुव्याहारयोश्च क्वचित्फलदर्शनान्नक्षत्रसूर्यचंद्रताराग्र
हचक्रस्य लोकानुग्रहार्थं बुद्धिपूर्वकमिव प्रवृत्तेर्दर्शनात् वर्णाश्रमाचारस्थितिलक्षणत्वाच्च लोकयात्राया हस्तगतस्य बीजस्य भविष्यतः सस्यार्थे
त्यागदर्शनाच्चरेद्धर्मानिति वात्स्यायनः शास्त्रस्य श्रुतिप्रतिपाद्यफलसाधनत्वस्य अनभिशंक्यत्वात् संदेहाविषयत्वात् अभिचारः शत्रुक्षयः अनु
व्याहारः कर्मानंतरभाविन्यः शापादिः तयोः फलयोः क्वचित् श्येनकारीर्यादेः प्रत्यक्षत्वात् चकारो भिन्नक्रमः नक्षत्राण्यश्विन्यादीनि सूर्याचंद्रौ प्र
सिद्धौ ताराः तारकाः अंगारकादयः ग्रहा जीवादयः तेषां चक्रस्य समूहस्य एतत् युक्तकालस्य वा लोकानुग्रहार्थं प्रवृत्तेः उदयादिरूपेण परिवर्तनस्य बु
द्धिपूर्वकमिव बुध्यतेनेति बुद्धिः मीमांसेति सादिशास्त्रं तन्मूलकं ज्योतिःशास्त्रं च तत्पूर्वकमिव तत्प्रतिपादनं यथार्थमेव दर्शनात् प्रत्यक्षेणोजने

वा·प·
१३

दृष्टत्वाच्च धर्मोऽधर्मादिसनेनान्वयः वर्णाश्रमाश्चाचाराश्च तेषामाचर्येन इत्याचारो धर्मः तस्य स्थितिरनुष्ठानं तद्वत्फला लोकमर्यादायाः एषसे तु विध
रणादित्यादिश्रुतेः हस्तगतस्य कृषीवलहस्तस्य स्य बीजस्य यवादेः भविष्यत आगामिफलसाधनस्य सस्यादेरर्थे आवापादिदर्शनात् व्यस्यर्थः अयम
भिसंधिः धर्मादेः सांशयिकफलत्वं तावदसिद्धं आनादितया सर्वज्ञेश्वरप्रणीततया वा निर्दुष्टश्रुतिबोधितहेतुनश्वरेनाभिचरत्यज्ञ तत्कारीर्यां हि वि
कामाय जेनेत्यादिश्रुतिबोधितत्वष्ट्यादेः प्रससिद्धत्वेन भीषास्मादित्यादिश्रुतिमहत्त्वोत्तिः शास्त्रबोधितनियतकालग्नहोदयादेर्दृष्टत्वेन स
र्वत्र तन्निर्णयसंभवात् यदप्युक्तं भाविफलाय सिद्धफलत्यागो न युक्त इति तदपि न भाविमहाफलापेक्षया सिद्धफलत्यागस्य कृषीवलादौ दर्शनात्
वस्तुतो विहितधर्माननुष्ठाने लोकमर्यादोच्छेदापत्तिरज आमुष्मिकपरमकामसाधनतया ऐहिकार्थकामाभ्यां प्राधान्येन ब्राह्मणादिभिर्धर्म एव से
व्य इति तन्वेवमप्यर्थी गुर्वादिसेवादिनासंपाद्य इत्येतद्युक्तं अन्वयादिव्यभिचारात् किंतु अदृष्टमेवार्थो ऽसर्वत्र कारणं अत एव इंद्रः कदाचि
द्वृत्रं जघान कदाचिन्नेत्यादिश्रुतिस्मृतिप्रसिद्धिरिति सहायादृष्टकारणवादिशंकते नार्थोश्चरेत् प्रयत्नेनापि सेवितः नुष्ठीयमाना नैव
कदाचित्सुनानुष्ठीयमाना अपि पृष्टच्छया भवेयुस्तत्सर्वं कालकारितमितिकाल एव हि पुरुषार्थानर्थयोर्जयपराजययोः सुखदुःखयोश्च स्थाप १३
यति अर्थान् अर्थोपायान्नाचरेत् नानुतिष्ठेत् कुतः एते उपायाः यत्नतः प्रयत्नेन अनुष्ठीयमानाः क्रियमाणा अपि न फलायोपकुर्युः कदा

चिदननुष्ठीयमानाः साधनानुष्ठानरहिता अप्यर्थाय यदृच्छया स्वत एव भवेयुः तत्सर्वं साधनानपेक्षलाभादिकं कलयतीति सुसत्याकालोऽदृष्टं
तत्कृतमिति हि तोः काल एव हि हेतौ पुरुषाभिमतानभिमतयोः अर्थलाभालाभयोः तत्फलजयपराजययोः तत्फलसुखदुःखयोश्च स्थापयति
पुरुषं तद्धेतुं करोतीत्यर्थः उक्तार्थमेव निदर्शनेन स्पष्टयति कालेन बलिरिंद्रः कृतः कालेन व्यवरोपितः काल एव पुनरप्येनं करोतीति कालकारणि
कः कालेन अदृष्टेन बलिरिसुपलक्षणं नहुषस्यापि इंद्रः कृतः इंद्राधिपत्यं प्रापितः इंद्रश्च तस्य स्थानाच्च्यावितः असर्थो इत्यपते व्यवरोपितः इंद्रप
दात् च्यावितः बलिरित्यनुषज्यते एवं तस्य स्थानच्युतमिंद्रं कर्त्ता करोति तस्य स्थानस्थमिति शेषः कालस्यैव कारणत्ववादिनः कालकारणिकाः अदृ
ष्टस्य कारणत्वेऽपि तत्स्वार्थिनः पाकादौ प्रवृत्तिदर्शनेन अन्वयव्यतिरेकाभ्यां कार्यत्वावच्छिन्नं प्रति उपायगोचरत्वेनैरपि कारणत्वेन निश्चयेन विपक्षे सर्व
व्यवहारविलोपापत्त्या च बल्यादेरपि तदनुकूलप्रयत्नश्रुतेश्च अदृष्टवः दृष्टस्यापि हेतुत्वमावश्यकमिति भवति गुरुसेवादेस्तद्धेतुत्वमिति स
माधत्ते पुरुषकारपूर्वकत्वात्सर्वप्रवृत्तीनामुपायः प्रसयः सर्वप्रवृत्तीनां प्रवर्तयंति स्वेभ्यः पुरुषान् साधनइति प्रवृत्तयः फलानि तासां पुरुषका
रः पुरुषप्रयत्नः तत्पूर्वकत्वात् तत्साध्यत्वात् उपायः साधनं प्रसयः प्रसेतव्य एव गुरोः शास्त्रादिति शेषः एवमन्वयेनोपपाद्य व्यतिरेकेण तदुप
पादयति अवश्यंभाविनो व्यर्थेऽपायपदेकत्वान्न निष्कर्मणो भद्रमस्तीति नास्त्यापनः अवश्यंभाविनोऽपि अदृष्टजन्यस्यापि अर्थस्य फलस्य उ

पापफलैकत्वात् स्वल्पप्रयत्नविषयसेवाद्युपायजन्यत्वात् निष्कर्षेण निरुपायस्य न भद्रमस्ति फलं नास्ति अतोऽन्वयव्यतिरेकाभ्यामदृष्टमिव दृष्ट
मपि गुरुसेवादिकं अर्थोपार्जनहेतुरित्यर्थः ननु धर्मार्थयोरामुष्मिकफलसाधनतया विहिकानिष्टनिवर्तकतया च सेव्यत्वेपि कामस्य तदभावात्
प्रत्युतैहिकामुष्मिकानिष्टजनकत्वात् श्रुतिस्मृतिनिंदितत्वाच्च नायं सर्वथा सेव्य इति मंदमतिशंकामुद्घाटयति न कामांश्च रेदित्यादिना नकामांश्च
रेद्धर्मार्थयोरेव प्रधानयोरन्येषां च सत्तां प्रसन्नीकत्वात् अनर्थजनसंसर्गमसद्व्यवायम शोचमनायतिं चैव पुरुषसेवेत तन्नयंति तथा प्रमादं लाघवम
प्रत्ययमनात्मवत्तां च किंच बहवः कामवशगाः सगणा एव विनष्टाः श्रूयंते यथा दांडक्यो नाम भोजः कामाद्ब्राह्मणकन्यकामभिमन्यमानः सबं
धुराष्ट्रो विननाश देवराजश्चाहल्यां अतिबलकीचकौ द्रौपदीं रावणः सीतां एते चान्ये च बहवो दृश्यंते कामवशगा विनष्टा इत्यर्थचिंतकाः प्र
धानयोः विहिकामुष्मिकफलसाधनतया प्रशस्तयोर्धर्मार्थयोरेव सेव्यत्वं युक्तं कुतः कामादेः अन्येषां त्वभिन्नानां सतां सत्संगादीनां आमुष्मि
कादिफलसाधनानां प्रसन्नीकत्वात् विरोधित्वात् कामान् कामतत्साधनादीन् अन्तरेण न सेवेत विरोधित्वमेव प्रतिपादयति अनर्थजनेत्यादिना
अनर्थविशेषव्यवायः इंद्रियघातसंयोगः अशौचं अशुचिता आयतिरुत्तरकालफलं प्रमादोऽनवधानता लाघवं लघुत्वं अप्रत्ययोऽविवेकः अ १५
नात्मवत्ता सदपरिग्रहः उक्तार्थमेव नानाविधनिदर्शनप्रदर्शनेन विशदयति किंचेत्यादिना कामवशगाः कामलोलुपाः सगणाः सपरिवाराः

एकन्तु स्वमात्रं श्रूयंते भारतरामायणादाविति शेषः ब्राह्मणकन्यकां शुक्रसुतां अभिमन्यमान अभियोक्तुमिच्छुः इत्यादि सर्वत्रानुषज्यते अ
र्थचिंतकाः विरोधिलक्षणया अनर्थमात्रचिंतका मन्यंत इति शेषः कामस्यासेव्यत्वेन तत्साधनभूतयोर्धर्मार्थयोरपि निष्फलत्वे न्यसेव्यत्वापत्त्या
स्वर्गकामो यजेतेत्यादि श्रुतिस्मृतीनामप्रामाण्यापत्तेः शरीरमित्यादि भगवद्वचनेनाहारादिना शरीरस्थितिहेतुतया विरुद्धांशत्यागोपि स
र्वत्यागायोगादन्यथा सर्वस्यापि दोषग्रस्तत्वेन सर्वव्यवहारविलोपापत्तेरिति निदूषयति शरीरस्थितिहेतुत्वादाहारसधर्माणो हि कामाः फलभूता
श्च धर्मार्थयोः शरीरस्थितिः शरीररक्षणं आहारसधर्माणः अशनादिसदृशाः कामाः गृहीभवेदित्यादि श्रुतिस्मृतिविहिताः सेव्या इति शेषः धर्मा
र्थयोः फलभूताः इतोपि सेव्या इत्यर्थः दुष्टांशत्यागेनेतरसेव्यत्वं सदृष्टांतमुपपादयति वोढव्यं तु दोषेष्विव दोषयुक्तेषु सस्यादिष्विव दोष
वारणेन सेव्यत्वं वोढव्यमित्यर्थः तदेव विशदयति नहि भिक्षुकाः संतीति स्थाल्यो नाधिश्रीयंते नहि मृगाः संतीति यवा नोप्यंत इति वात्स्यायनः
स्थाल्यः ओदनपात्राणि अधिश्रयणं तेजःसंयोगः पाक्रिकाभावनिवृत्तये नदुष्टं अतएव प्रसज्य प्रतिषेधेन दुष्टमिति वा मनः फलोपघातका-
त्वं भिक्षुकाणां साधनोपघातकत्वं मृगाणामिति भेदः यद्यपि प्रमादीनां कामानंतरभावितया न फलतत्साधनोपघातकत्वमिति वैषम्यं तथापि
तादृशेपि पाकादौ यथाशक्ति दोषपरिहारेण प्रवृत्तावनुपघातकसुपरिहार्यदोषनिवर्तनेन विहितकामादौ प्रवृत्तिः कैमुत्यन्यायसिद्धेति भावः

वा॰सू॰ उक्तार्थं अभियुक्तोक्तिं संवादयति एवमर्थं चेत्यादिना एवमर्थं च कामं च धर्मं चोपाचरन्नरः इहामुत्र च निःशल्यमत्यन्तं सुखमश्नुते किंस्यात्तत्पर
१५ त्रेत्याशंका कार्ये यस्मिन्न जायते न चार्थघ्नं सुखं चेति शिष्टास्तत्र व्यवस्थिताः त्रयाणां साधनं यत्स्यात् द्वयोरेकस्य वा पुनः कार्यं तदपि कुर्वीत न
त्वेकार्थं द्विबाधकं एवं पूर्वोक्तप्राधान्यादिरूपेण निःशल्यं दोषविनाकृतं इदमर्थादीनां विशेषणं अत्यन्तं दुःखासंभिन्नं सुखं आयुष्मिकका
मं च शब्दः परस्परयोगसूचनार्थः धर्मस्वरूपं कथयन् तस्यार्थादिहेतुत्वमाह किंस्यादिति यस्य परलोके जन्यत्वं स तत्परः अर्थः किंनित्स्यात् किंचि
त्फलजनकत्वं स्यात् न वा इति धर्मद्वयप्रकाशिका यस्मिन् कार्ये यत्कार्यविशेष्यकाशंका संदेहः न जायते तेनेदृष्टफलविहितत्वेन परिह्रीयते न
चार्थघ्नं ऐहिकामुष्मिकार्थसाधनं सुखं तादृशं सुखसाधनं च इति हेतोः शिष्टाः स्वस्वशाखाध्येतारः स्वशाखाध्येतृत्वं शिष्टत्वं प्रमादाधीतवेदस्य
ज्ञानवदतिव्याप्तये स्वपदं अत एव न वेदप्रामाण्यं स्यात् किं वेदप्रामाण्यं स्यादित्यत्र व्यवस्थिताः तद्विषयकप्रवृत्तिमन्त इत्यर्थः एवं साध्येषु प्रवृत्ति
मुक्त्वा साधनेषु तामाह त्रयाणामिति त्रयाणां धर्मादीनां कार्यं कर्तुं योग्यं साधनं वेदाध्ययनादि द्वयोः अर्थकामयोः ज्योतिष्टोमादि एकस्य एकैक
स्य कल्पनीतिकामसूत्रादि द्विबाधकं धर्मार्थविरोधि एकार्थं ऐहिकसुखमात्रहेतु अविहितस्त्रीसेवनादि इति श्रीकामसूत्रवृत्तौ साधारणे प्र १५
थमेधिकरणे त्रिवर्गप्रतिपत्तिर्द्वितीयोध्यायः २ एवं त्रिवर्गं निरूप्य तदुपजीवकत्वसंगत्यानन्तरं विद्यास्तदध्ययनकालं चाह धर्मार्थांगविद्या

कालाननुपरोधयन् कामसूत्रं तदंगविद्याश्च पुरुषोऽधीयीत धर्मश्चार्थश्च धर्मार्थौ तयोरंगविद्याः अंगानां प्रयाजादीनां प्रयोगबोधका अंग
भूताविदंसेताभिरिति विद्याः कल्पसूत्रमीमांसादयो वार्हस्पत्यकात्यादयश्च अंगत्वं चात्र परोद्देशप्रवृत्तव्यापारविषयत्वं जैमिन्युक्तं बोध्यं ता
सामध्ययनकालान् अनुपरोधान् अनुपघ्नन् तत्कालेनाधीत्य कामसूत्रं कामतत्साधनप्रतिपादकशास्त्रं तदंगविद्याः तेन पुरुषार्थादौ प्रव
र्तयितव्ये उपयोगिविद्या वक्ष्यमाणगीतादिचतुःषष्टिकलाः कारित्वमिहांगत्वं पुरुषोऽधीयीत नागास्यष्यात्पूर्वमिति शेषः कामसूत्रमित्यादिपु
रुषपदवर्जमिहोत्तरसूत्रे चानुवर्तते प्राग्यौवनाच्च युवतिः युवतिः कन्या प्रत्ता च पत्युरभिप्रायात् प्रत्ता विवाहसंस्कृता अभिप्रायात् अभिप्रा
यादेव सर्वेषां सावधारणमिति न्यायात् ननु पुंसां धर्मार्थांगविद्यास्विवादृष्टार्थमध्ययनाधिकारेपि अनधीतशास्त्राणामपि योषितां संप्रयो
गदर्शनेन व्यभिचारान्नात्र योषितामधिकृतिरित्याशंक्यते योषितां शास्त्रग्रहणस्याभावादनर्थकमिह शास्त्रे स्त्रीशासनमित्याचार्याः ग॰सूत्रेऽनेने
तिग्रहणमध्ययनं तस्याभावादपि अभावेपि उपायप्रयोगदर्शनेन व्यतिरेकव्यभिचारादिति शेषः इह शास्त्रे कामशास्त्रे स्त्रीशासनं स्त्रीणामधि
कारप्रतिपादनं अनधीतव्याकरणादीनामपि व्यवहारदर्शनेन साधुशब्दादिप्रयोगेपि शास्त्राधिकृतिवत् एतत्प्रवीणव्यवहारदर्शनेना
नधीतानां संप्रयोगेपि न तत्रानधिकार इति समाधत्ते प्रयोगग्रहणं तासां प्रयोगस्य च शास्त्रपूर्वकत्वात् इति वात्स्यायनः प्रयुज्यन्त इति प्रयोगाउ

का॰सू॰ पायांतेषां ग्रहणं ज्ञानं प्रसंगमंतरेणां न तु स्वातंत्र्यादिति शेषः तु कस्मै हेतोः प्रयोगस्य उपायज्ञानस्य न तु ज्ञानमिति शेषः चोन धारणं शास्त्रमात्रपरं कृत्वा
१६ त् शास्त्रैकजन्यत्वादनुष्ठानेति सर्वः विपक्षबाधकमाह न केवलमित्यादिना न केवलमिहैव सर्वत्रैव हि लोके कतिचिदेव शास्त्रज्ञाः सर्वजनविषयश्च
संप्रयोगः प्रयोगस्य दूरस्थमपि शास्त्रमेव हेतुः अस्ति व्याकरणमित्यवैयाकरणा अपि याज्ञिका ऊहाकं नु सु साधुशब्दान् प्रयुंजते अस्ति ज्यो
तिषमिति पुण्याहेषु कर्म कुर्वंते तथाश्वारोहा हस्त्यारोहा अश्वगजान् अनधीतशास्त्रा अपि विनयंते तथास्ति राजेति दूरस्था अपि जनपदम
र्यादान्नातिवर्तंत इति तद्वदेतत् उक्तरीत्या इति शेषः किं तु सर्वत्रैव सर्वशास्त्रेष्वपि हि प्रसिद्धो कतिचिदेव केचिदेव सर्वजनस्तन्न दूरतः संप्रयो
जयति प्रवर्तयतीति संप्रयोगोधिकार उक्तः स न स्यादिति शेषः उक्तमेव सदृष्टांतं स्पष्टीकरोति प्रयोगस्येत्यादिना दूरस्थमपि अनधीतमपि हि सर्व
त्रानुवर्तंते विवेचयति साध्वसाधुशब्दानिति व्याकरणं अवैयाकरणा अनधीतव्याकरणाः याज्ञिका यज्ञप्रयोक्तारः ऊहाकं तु ष ऊहयोग्यमंत्रक
विकृतिषु कर्मसमवेतदेवतादिप्रकाशकशब्दांतरत्वमहत्वं साधुत्वं संस्कृतत्वं ज्योतिषं नक्षत्रकालादिप्रतिपादकं शास्त्रं इति हृतो रज्ञोपितज्ञ
वचनात् उदगयन शुक्लाहेषु कर्म उपनयनादि कुर्वंते कुर्वंते हि शास्त्रं अश्वादिशास्त्रं विनयंते शिक्षयंति जनपदास्तत्रस्थाः प्रमाणभावमाश्रं १६
तां प्रमाणमित्याह संस्थापिवल्नु शास्त्रप्रहितबुद्धयो गणिका राजपुत्र्यो महामात्रदुहितरश्च प्रहितानिपुणा दृष्टा इति शेषः अनेन सर्वाः स्त्रियः

एतच्छास्त्राधिकारिण्यः स्त्रीत्वाद्गणिकादिवत् इत्यनुमानं सूचितं एवं स्त्रीणामधिकारं प्रतिपाद्य व्यापकानाह तस्मादित्यादिना तस्माद्वैश्वासि
काज्जनपदाद्रहसि प्रयोगाच्छास्त्रमेकदेशं वा स्त्री गृह्णीयात् तस्मात् अधिकृतत्वात् वैश्वासिकात् विश्वस्यात् प्रयोजयस्य व्यापयतीति प्रयोगा
त् एकदेशं उपायबोधकं रहसि अध्यायेन अभ्यासप्रयोज्यांश्च चातुःषष्टिकान् स्वार्थं एकमुत्पन्ने अधीयत इति योगान् विद्याः आचार्यास्तु कन्या
नां प्रच्छन्नपुरुषसंयोगा सहसंवृद्धा धात्रेयिका तथाभूता च निरत्ययभाषणा सखी समानवयाश्च मातृष्वसा विस्रब्धा तत्स्थानीया वृद्धदासी पूर्वसंसृष्टा भि
क्षुकी स्वसा च विश्वासप्रयोगात् प्रच्छन्नपुरुषसंयोगा उपायैर्लब्धपुरुषसंबंधो सर्वत्रेदमनुषज्यते सा नं बधिता धात्री सुता निरत्ययभाषणं संततभाष
णा विश्वसनीय इति यावत् तादृशी सखी समानवयाः विस्रंभवती मातृष्वसा तत्स्थानीया तत्संकेतवती दासी पूर्वसंसृष्टा कंचित्कालं सहस्थिता पु
न इति योगः विश्वासवती स्वसा च एताः कन्यानामाचार्या भवंतीति शेषः एकश्चानुक्तसमुच्चायकः एवं अंगविद्यासहितकामशास्त्रस्याध्यय
नकालं तद्धिकारिणश्च निर्दिश्यांगविद्याः प्रदर्शयितुमाह गीतमित्यादिना तायथा ज्ञायते तथा उच्यत इति शेषः गीतं स्वरादिसंदोहः वाद्यं गीतिकाल
परिच्छेदकं मृदंगाद्यभिघातः नृत्तं साभिनयांगविक्षेपविशेषः नाट्यं गात्रविक्षेपविशेषः आलेख्यं चंदनादिना गंडस्थलादौ नानारचना वि
शेषकच्छेद्यं कल्पस्यादिना ललाटे भक्तयः तंडुलकुसुमबलिविकाराः तंडुलाश्च कुसुमानि च तैः बलिविकाराः कर्णभूषाविशेषरचनाः पु

वा॰सू॰ प्याप्तरकः पुष्पैः शय्यास्तरणं दशनवसनांगरागाः दशनवसनेऽधरोष्ठे गरागाः रंजकद्रव्यविशेषलापनं मणिभूमिकाकर्म कृत्रिमपुत्रिकानिर्मा

१७ णं शयनरचनं शय्याकल्पनचातुर्यं उदकवाद्यं उदकेन वादनं उदकघातः उदकेऽभिघातेन शब्दोत्पादनं चित्रयोगाश्चित्रकर्माणि माल्यग्रथन

विकल्पाः मालिकाहेतुपुष्पग्रथनचातुर्याणि शेखरापीडयोजना शेखरापीडे शिरोभूषणविशेषौ योजनता द्वचनाचातुर्यं नेपथ्यसंप्रयो

गाः अलंकरणकौशलानि कर्णपत्रभंगाः कर्णाभरणकल्पनाशिल्पानि गंधयुक्तिः वस्त्रादेर्गंधयोजनं भूषणयोजनं भूषणनिर्माणनै

पुणं ऐंद्रजालिकं अविद्यमानवस्तुप्रदर्शनं कुचुमारयोगाः कुचुमारोक्तवशीकरणविद्याः हस्तलाघवं पश्यतो हरणं चित्रशाक

पूपभक्ष्यविकारक्रियाः चित्ररसं यथा तथा शाकादिपाककौशलं पानकरसासवरागयोजना निपानके पेयद्रव्ये रसादिसंपादनं सूचीवा

नकर्माणि सूच्या प्रतिकृतिनिर्माणं सूत्रक्रीडा पांचालिकासंचारणं वीणाडमरुकवाद्यानि वीणादीनां वादनानि प्रहेलिका गूढाभिसंधिव

चनं विदग्धमुखमंडनोक्तलक्षणं प्रतिमाला अन्त्याक्षरभिन्नानारूपरचना दुर्वाचकयोगाः सर्वा वेधलेखनानि भागवते तु दुर्वचनयोगा इति दुर्व

चनाचतुरलेखः पुस्तकवाचनं वृत्तश्चास्यपठनं नाटकाख्यायिकादर्शनं नाटकाख्यायिके सांगे सादिप्रतापरुद्रीयोक्तलक्षणे काव्यसमस्यापू १७

रणं काव्यं रसादिमत्तत्संसमस्यापद्यैकदेशः पट्टिकावेत्रयानविकल्पाः पट्टिकाभिर्वेत्रैश्च वयनचातुर्यं तर्कुकर्माणि तुलादिना सूत्रनिर्मा

णानि तक्षणं तक्षकर्म वास्तुविद्या गृहनिर्माणं रूप्यरत्नपरीक्षा सदसद्विवेचनं धातुवादः ताम्रादेः सुवर्णीकरणक्रियादिवादः मणिराग

ज्ञानं मणिरागाः पद्मरागादयः आकरज्ञानं आकरस्तन्निधिः वृक्षायुर्वेदयोगाः वृक्षस्य शरीरस्याम्रादेर्वीजोपयोगि वैद्यशास्त्रज्ञानं मेषकुक्कुटला

वकयुद्धविधिः लावकः पक्षिविशेषः शुकशारिकाप्रलापनं प्रलापनं तद्द्वारा भाषणं उत्सादने केशमर्दने च कौशलं केशानां उत्सादनं समीकरणं म

र्दनं गंधतैलादिना मार्जनं अक्षरमुष्टिकाकथनं अक्षराणां अंगुलिविन्यासविशेषेण सूचनं म्लेच्छितकविकल्पाः स्वसंकेतितभाषाविशेषाः

देशभाषाविज्ञानं देशास्तत्तद्देशाः पुष्पशकटिका पुष्पैः शकटरचनं यंत्रमातृकाधारणमातृकासंवाच्यं यंत्रमत्स्यादिमातृका साध

नं धारणमातृका धारणे निरालंबनस्थितिः संवाच्यं सम्यक्ज्ञानं मानसी चिंता तत्ज्ञानं काव्यक्रिया काव्यनिर्माणं अभिधानकोशछंदो

विज्ञानं अभिदधते एकमर्थमिति अभिधानानि पर्यायपदानि तेषां कोशाद्य कोशग्रंथविशेषाः छंदांसि गायत्र्यादयः क्रियाविकल्पाः

नामाकार्यकरणचातुर्यं छलितकयोगाः छद्मना कर्मकरणं वस्तुगोपनानि सन्निहितवस्तुज्ञापनचातुर्याणि द्यूतविशेषाः अक्षक्रीड

नकौशलानि निमित्तज्ञानं आकर्षक्रीडा अपेक्षितस्य समीपानयनचतुरता बालक्रीडनकानि कंदुकादिखेलनानि सर्ववस्तुप्रतिकृतिनिर्मा

णं वैनयिकानां वैजयिकानां व्यायामिकीनां च विद्यानां ज्ञानं विशेषेण नयं सपेक्षितदेशं प्रापयंतीति वैनयिको जलप्लवनपादुकासिद्

यः वैजयिको विजयहेतुत्वा वित्तद्युतिकसिध्यादयः व्यायामिको मृगयाः इति कामसूत्राङ्गविद्याः पांचालिकी चतुःषष्टिस्तस्याः प्रयोगान
न्ववेक्ष्य सांप्रयोगिकेन स्थामः पांचालकी पंचालसंज्ञा चतुःषष्टिं चतुरधिकषष्टी विद्याः आलिंगनचुंबनदशननखच्छेद्यसंवेशनसीत्कृ
तपुरुषायितौपरिष्टकानामष्टधाविकल्पभेदादष्टावष्टकाश्चतुःषष्टिरिति वक्ष्यमाणाः तस्याश्चतुःषष्ट्याः प्रयोगानन्ववेक्ष विशदीकृत्य सा
वांतरभेदं तदात्मकत्वात्संप्रयोगस्य तदात्मकत्वात् तद्विद्याधीनत्वात् तत्र च स्थामहस्यर्थः उक्तानां चतुःषष्टिकलानां प्रयोजनं प्रतिपादयति
अभिरत्यादिना अभिरभ्युदिता वेश्या शीलरूपगुणान्विता लभते गणिकाशब्दं स्थानं च जनसंसदि पूजिता सा सदा राज्ञा गुणवद्भिश्च संस्तु
ता प्रार्थनीयाभिगम्या च लक्ष्यभूता च जायते योगज्ञा राजपुत्री च महामात्रसुता तथा सहस्रान्तःपुरमपि स्ववशे कुरुते पतिं तथा पतिवियोगे
च व्यसनं दारुणं गता देशान्तरेऽपि विद्याभिः सा सुखेनैव जीवति कलाग्रहणादेव सौभाग्यमुपजायते देशकालौ त्ववेक्ष्यासां प्रयोगः संभवेन्न वा
नरः कलासु कुशलो वाचालश्चाटुकारकः असंस्तुतोऽपि नारीणां चित्तमाश्वेव विंदति आभिः चतुःषष्टिकलाभिः अभ्युच्छ्रिता समन्विता शीलं स
त्स्वभावं रूपं सौंदर्यादि गुणाः वशीकरणचातुर्यादयः वेश्याजातिविशेषोऽप्यवाग्गणिकाशब्दं तद्वाच्यं तां स्थानं स्थितिं लक्ष्यभूता दर्शनीया यो १८
गज्ञा पूर्वोक्तकलावती चकारादन्यापि सहस्रमंतःपुराणि कलत्राणि यस्य तं तथा वशीकरणमिव देशान्तरे परसौस्थित्ये पातिशेषः सुखेन प्रति

तिकृत्यादिना जीवत्येव कलानां पूर्वोक्तानां ग्रहणादेव अभ्यासमात्रात् प्रयोगं विनापि सौभाग्यं पतिवाल्लभ्यं अपेक्ष्य अनुसृत्य आसां कलानां प्र
योगस्तु संभवतु वा मा वा असंस्तुतोऽपि अपरिचितोऽपि विंदत्येव वश्यायत्येव अतः सर्वैरध्येतव्या इति भावः इति साधारणे प्रथमेऽधिकरणे विद्यासमुद्दे
शः तृतीयोऽध्यायः ३ समुद्देशः लक्षणपरीक्षाभ्यां प्रतिपादकः इति श्रीवात्स्यायनसूत्रवृत्तौ साधारणे प्रथमेऽधिकरणेऽङ्गविद्यानिरूपणं नाम तृ
तीयोऽध्यायः ३ एवं तृतीयेऽध्याये विद्यास्तदधिकारिणश्च निरूप्याधुनोपजीवकत्वसंगत्या तासां प्रयोगास्तत्कालं चाह गृहीतविद्यः प्रतिग्रहजयक्रम
निर्वेशाधिगतैरर्थैरन्वयागतैरुभयैर्वा गार्हस्थ्यमधिगम्य नागरिकवृत्तं वर्तेत गृहीता अभ्यस्ता विद्या येन स तथा अधिगतैरधिगमलब्धैरन्वयागतैः कु
लक्रमागतैर्वा उभयैः पूर्वविधैर्वा अर्थैः क्रमेण ब्राह्मणस्य प्रतिग्रहः प्रस्तादिना सहितः ब्राह्मणादिः गार्हस्थ्यं कलत्रं नगरे भवा नागरिकाः तेषां वृत्तं च
रित्रं वर्तेत न कुर्यात् तदेव विशदयति नगरे इत्यादिना नगरे खर्वटे महति वा सज्जनाश्रये स्थानं यात्रायोगाद्वा नगरे नानाविलासा अथ राजधान्यां सज्जना
श्रये उक्तविद्यावज्जनवति महति खर्वटे ग्रामे यांतिसांकं त्रायं सा पञ्च इति यात्राः सखायः तेषां योगात् सहवासात् अन्यत्र वा स्थानं स्थितिं वर्तेनेत्यनुष
ज्यते तत्र भवनमासन्नोदकं वृक्षवाटिकावद् विभक्तकर्मकक्षं द्विवासगृहं कारयेत् तत्र उक्तान्यतमे देशे आसन्नोदकं सकलकलहं सविलसत्कम
लनार्पायुतं भवति विलासोपयोगी निभवनं वृक्षवाटिकावत् नदत्कोकिलभ्रमरमलयमारुतविलससुष्पवाटिकासहितं विभक्तकर्मकक्षं विभ॰

कानिव्यवस्थितानिक्रमोपाश्रयणासनभोजनविहारादीनियेषुतादृशानिकक्ष्यान्तराणिअन्तर्गृहाणियस्मिन् द्विवासगृहंमहागृहद्वयंवासैवचवा
सगृहेसुश्लक्ष्णं उभयोपधानंमध्येविनतंशुक्लोत्तरच्छदंवद्धवितानंशयनीयंस्यात् वासगृहेविलासिगृहेसुश्लक्ष्णंमृदुलमुभयोपधानंउभयत्र
शिरःपादयोः उपवर्हणयुतंमध्येविनतंमध्येउभयोपधानमध्यप्रदेशेविनतंनिम्नंशुक्लोत्तरच्छदंशुक्लंशुद्धंउत्तरच्छदंउपरिवस्त्रंयस्मिंतत् वद्धवि
तानंऊर्ध्वभागेलग्नवितानंउल्लोचोयस्मिन्तत् शयनीयंशय्याप्रतिशय्याच काशय्यासमीपेप्रास्तरणांतरं तस्यशिरोभागेकूर्चस्थानंवेदिकाच
तस्यशयनीयस्यशिरोभागेशिरोलग्नप्रदेशपरभागेकूर्चस्थानंसिंहासनंवेदिकाचवक्ष्यमाणद्रव्यपरिग्रहणीयंस्यादितिसर्वत्रानुषज्यते तत्ररात्रिशेष
मनुलेपनंमाल्यंसिक्थकरंडकं रात्रिःशेषायस्यादिनस्यतद्रात्रिशेषंयथाभवतितदाशय्यास्थानेअनुलेपनंतत्साधनंचंदनादिमाल्यंमालिका॰
सिक्थकरंडकंकस्तूरीकज्जलकराटकं सौगंधिकपुटिका सुगंधद्रव्यपेटिका मुखवासकं एलालवंगादिकं मातुलुंगत्वचः त्वक्प्रधानवी
जपूर्येतावृनिचस्यःचाप्यत्रापि भूमौपतद्ग्रहः समीपभुविभूषणपेटिका नागदंतावसक्तावीणा गजदंतालंकृतविपंचिका चित्रफलकंचि
त्रपट्टिका वर्तिकासमुद्गकः ध्रुमवर्तिकाधानी यत्किंचित्पुस्तकं काममूत्रपुस्तकं कुरंटकमालाश्च कुरंटककुसुममालिकाः नातिदूरेभूमौवृत्ता॰ १९
स्तरणं नातिदूरेसमीपेवृत्तास्तरणंप्रासनविशेषःसम रकमाकर्षफलकंद्यूतफलकंच मसूरोधान्यविशेषस्तत्सहितंआकर्षणफलकंली॰

लाशकं द्यूतफलकं प्रसक्रीडापीठकं तस्यबहिःक्रीडाशकुनिपंजराणितस्यकेलीगृहस्यबहिःप्रदेशेक्रीडासाधनशुककारिकाविहार
गृहं एकांतेतर्कुतक्षणस्थानमन्यासांचक्रीडानां तर्कुतक्षणेसूत्रतनूकरणक्रीडाविशेषोअन्यासांमृत्सगीतादीनांस्थानमितिसनुषज्यतेस्वा
स्तीर्णप्रेखादोलाचवृक्षवाटिकायांस्थंडिलपीठिकाचसकुसुमेतिभवनविन्यासः स्वास्तीर्णप्रेंखासकशिशुवेगादोलिकास्थंडिलपीठिका
समभूमिगफलकविशेषः इतिपूर्वोक्तःसर्वोविन्यासःविन्यसनीयः एवंनिवासस्यभवननिर्माणं तत्रसवस्तूनिचनिर्दिश्यप्रातरुत्थायकर्त्त
व्यमाह सप्रातरित्यादिना सप्रातरुत्थायकृतनियतकृत्योगृहीतदंतधावनोमात्रयानुलेपनंधूपंस्रजमितिगृहीत्वादत्वासिक्थकमलक्तकंचदृष्ट्वा
आदर्शेमुखंगृहीतमुखवासकतांबूलःकार्याण्यनुतिष्ठेत् प्रातःउषसिकृतनियतकृत्यःकृतंनियतकृत्यंत्रिवर्गचिंतादिस्मृत्युक्तकार्यंयेनइत्ये
कंकर्मगृहीतंकृतंइतिद्वितीयंमात्रयाकिंचित् अनुलेपनंहस्तादौधूपंसुगंधधूपंशिरोरुहेषुस्रजंवस्त्रांतइतितृतीयंसिक्थकंकस्तूरिकादि
ललाटेअलक्तकंपादयोः दत्वाधृत्वाइतिचतुर्थंआदर्शेदर्पणेइतिपंचमंसुखवासकंमुखवासकयुतंइतिषष्ठंकार्याणिउक्तानिवक्ष्यमाणा
निचकुर्यात् नित्यंस्नानं सुगंधतैलादिनाद्वितीयमुत्सादनंउत्सादनंकचभरशोधनं तृतीयःफेनकःचतुर्थमायुष्यं आयुष्यमायुष्यकर्मअलंका
रविशेषः पंचकेदशकंवाप्रसाधनमित्यहीनं प्रसाधनंयावज्जीवंइतिपूर्वोक्तंदशकंपंचकंवाःहीनं अविच्छिन्नंकार्यंअहीनेपक्षेदशकंहीनेपं

वा.सू. चकं वाकार्यमिति वीरभद्रः एवं प्रातःकृत्यमुक्त्वा मध्याह्नकृत्यमाह सातसाद्यासंवृत्तकस्यः स्वेदापनोदः प्रसंवृत्ते शृंगारस्यादिना प्रनावृत्ते कस्ये
२० यस्य तादृशो भवेत् तेन प्रावृतस्य सततभाविनः स्वेदस्यापनोदो भवति इदमन्यकृत्यस्याप्युपलक्षणं पूर्वापराह्णे भोजनं अन्हः पूर्वो भागः पू
र्वाह्णः पंचदशघटिकात्मकः अन्हः अपरो भागः अपराह्णः सायाह्न इत्यर्थः कुर्यादिति शेषः सायंचारायणस्य सायं रात्रावपि चारायणस्य मते भो
जनं कुर्यादित्यनुवर्तते अपराह्णकृत्यमाहः भोजनानन्तरं शुकसारिकाप्रलापनव्यापाराः भोजनानन्तरं भोजनश्रमापनुत्यनन्तरं लावकमेष
कुक्कुटयुद्धानि कारयेदिति शेषः तास्ताश्च कलाक्रीडाः कलाभिः पूर्वोक्ताभिः पीठमर्दविटविदूषकेषु चायत्ता व्यापाराः पीठमर्दादयो नर्मसचि
वाः दिवाशय्या च यत्तांबूलचर्वणादि समुच्चायकः गृहीतप्रसाधनस्यापराह्णे गोष्ठीविहाराः गोष्ठीविहाराः सरससल्लापाः प्रदोषे च संगीतकानि
कार्याणि तियथायोगं सर्वत्र संबध्यते गीतकं गानं तच्च मालवादि नितंबिनीचुंबितपद्मवक्त्रः समुल्लसत्कुंडलवान् प्रमत्तः संगीतशालां विशति
प्रदोषे मालाधरो मालवरागराज इति संगीतगंगाधरे स्वरमेलकलानिधिवचनात् तदंते च प्रसाधिते वासगृहे संचारितसुरभिधूपे ससहाय
स्य शय्यायामभिसारिकाणां प्रतीक्षणं तदंते संगीतांते ससहायस्य साप्तजनस्य शय्यायां तत्समीपे निषण्णस्येति शेषः अभिसारिकाणामिति २०
कर्मणि षष्ठी दूतीनां प्रेषणं च स्वयं वा गमनं चासीठमर्दादेः आगतानां च मनोहरैरालापैरुपचारैः ससहायस्योपक्रमाः उपक्रमाः वशीकरणादी

नि वर्षप्रमृष्टनेपथ्यानां दुर्दिनाभिसारिकाणां स्वयमेव पुनर्मंडनं दुर्दिने अभिसरणशीलानां नेपथ्यं कस्तूरीमकरिकादि मंडनं स्वयं नायक
आचरेदिति शेषः मित्रजनेन वा परिचारणमित्याहोरात्रिकं परिचारणं मंडनं कारयेत् आहोरात्रिकं नायकमात्रस्याहोरात्रकर्तव्यं घटानिबंधनं अ
न्योन्यसमहानुत्सवाद्यनुष्ठानं गोष्ठीसमवायः गोष्ठीभिरनुकूलालापैः समवायः समविद्याशीलविभानां परस्परीभिः सह स्थितिः समापान
कं समं उक्तैः समं आपानकं आसवादेः पानं उद्यानगमनं उक्ताभिः सहयानं समस्याः क्रीडाश्च प्रवर्तयेत् समस्याः काव्यादिसमस्याः प्रवर्तयेत्
क्रीडानश्यमाणाः एवं संभूयकर्तव्यानि निर्दिश्य विशदयति पक्षस्यादिना पक्षस्य मासस्य वा प्रतीते हनि सरस्वत्या भवने नियुक्तानां नित्यस
माजः पक्षस्य शुक्लस्य मासस्य चावसंतस्य संबंधिनि प्रतीते अनुकूले सरस्वत्याः नत्याणीतादेः भवने स्वनायां निर्ज्ञातानां कुशलानां समाजः भ आ
कार्यः कुशीलवाश्चागंतवः प्रेक्षणकमेषां दद्युः आगंतवः आगंतुकाः प्रेक्षणकं उपायनं द्वितीयेह्नि पूजा नियतं लभेरन् गायकादय इति शेषः त
तो यथाश्रद्धमेषां दर्शनमुत्सर्गो वा व्यसनोत्सवेषु परस्परस्यैककार्यता ततः पूजानंतरं यथाश्रद्धं निजेच्छया दर्शनं द्रष्टुं स्थापनं व्यसनोत्सवेष्वे क
वाक्ततापेषामेषामित्यन्वयः आगंतूनां च कृतसमवायानां पूजनमभ्युपपत्तिश्चेति गणधर्मः अभ्युपपत्तिरभिनंदनं गणधर्मः संभूयकर्तव्य ध
र्मः एतेन तं तं देवताविशेषमुद्दिश्य संभाषणास्थितयो विविधा व्याख्याताः एतेनोक्तप्रकारेणोद्दिश्य आगतानामिति शेषः घटाः संभूयक

का.सू. तैव्यविशेषाः वेश्याभवनेच सभायामन्यतमस्योदवसितेच समानविद्याशीलबुद्धिवित्तवयसां सह वेश्याभिरनुरूपैरालापैरासनबंधो गोष्ठी॰प्र
२१ लापैः निमितभक्तैः आसनबंधः एकत्रस्थितिः गोष्ठी गोष्ठीसमवायः तत्रचैषां काव्यसमस्याकलापसमस्या च तत्र समाजे काव्यसमस्या श्लो
कैकदेशस्य कथनं कलाः पूर्वोक्तविद्याः तासां समस्या एकदेशप्रदर्शनमेकेन तदन्येन पूरणं तस्यामुज्ज्वलालोककांताः पूज्याः प्रीतिसमाना
श्चहारिताः तस्यां सभायां प्रीतिसमानाः स्वस्वप्रीतिसमानाः हारिता मनोहारिण्यः परस्परभवनेषु चापानकानि तस्याः स्वस्य वा पानकानि पेया
निवस्यमाणद्रव्याणीति शेषः च:पौर्वापर्यस्तवकः तदेव विशदयति तत्रेति तत्र मधुमैरेयसुरासवान्विविधवल्कलसंभववनफलहरितक
टुकाम्लोपदंशान्वेश्याः पाययेयुरनुपिबेयुश्च तत्र परस्परभवने मधुपौष्पं मैरेयं देशविशेषात् स्वं सुरा पैष्टं आसवो लावंगः विविधवल्क
लसंभवः वृक्षत्वग्विशेषः वनफलं धात्र्यादि हरीतकीकटुकं तिक्तद्रव्यविशेषः एतेषां उपदंशान् लवणशाकविशेषान् इदमुद्यानविषयं
वक्ष्यतिचाचार्यः एतेनोद्यानगमनं व्याख्यातं एतेन वक्ष्यमाणप्रकारेण उद्यानगमनं उद्यानगमनं तत्र कर्तव्यं च व्याख्यातं व्याख्यातप्रायं भवति
तत्र पूर्वाह्ण एव स्वलंकृतां गास्तुरगाधिरूढा वेश्याभिः सह परिचारकैरनुगता गच्छेयुः तत्र वनविषये पूर्वाह्ण एवं भुक्तेति शेषः तुरगपदं रथादेर २१
प्युपलक्षणं वेश्यापदं पत्न्या अप्युपलक्षकं दैवसिकीं च यात्रां तत्रानुभूय कुक्कुटलावकमेषयुद्धयुतैः प्रेक्षाभिरनुकूलैश्चेष्टितैः कालं गम॰

यित्वापराह्णे गृहीतोद्यानोपभोगचिह्नास्तथैव च प्रत्याव्रजेयुः दैवसिकीं यात्रां वसंतोत्सवादिकं तत्र वनेऽनुभूय कुक्कुटादीनां युद्धयुतैर्लघोज्झितैः प्रे
क्षाभिः नृत्तादिनिरीक्षणैः चेष्टितैः लीलाचंक्रमणैः निमितभक्तैरेतैः चिह्नानि आम्रादिमंजर्यः तथैव तुरगारोहणादियुता एव प्रत्याव्रजेयुः पुनर्निव
र्तेयुः एतेन रचितोद्ग्राहोदकानां ग्रीष्मे जलक्रीडागमनं व्याख्यातं एतेन वक्ष्यमाणप्रकारेण उद्ग्राहाणि मकरादिरचितानि उदकानि येषु तानि रचि
तानि सोपानादीनि तेषां कर्मणि षष्ठी क्रीडार्थं गमनं क्रीडागमनं व्याख्यातं भवति पक्षरात्रिः पक्षस्य कृष्णपक्षस्य रात्रिः कौमुदीप्रचारः कौमुदीप्रचार यक्षरात्रि पाठान्तरम्
वति सुवसंतकः वासंतिकी वक्ष्यमाणक्रीडार्थेत्यास्या तादर्शयति सहकारभंजिका सहकारैराम्रकुसुमैः भंजिका परस्परं एवतंसनं अभ्यूष
खादिका अपक्वचणकादिभक्षणक्रीडाविशेषः बिसखादिका बिसानां मृणालानां खादिका भुक्तिः नवपत्रिका कृत्रिमविवाहलीला उदकक्ष्वेडि
का अन्योन्यं सुगंधजलसेकः पांचालानुयानं कृत्रिमपुत्रकलीला एकशाल्मली स्पृहयंतीव्रतं एकस्याः स्पृहरणी यायां शाल्मल्यां अधिरूढस्य क्री
डा यवचतुर्थी वैशाखशुक्लचतुर्थ्यां नायकानां परस्परं सुगंधयवचूर्णप्रक्षेपः तिपाश्वासेषु प्रसिद्धा आलोलचतुर्थी श्रावणशुक्लतृतीयायां
हिंदोलक्रीडा मदनोत्सवः मदनप्रतिकृतिपूजनं दमनभंजिका परस्परं सुगंधिविशेषावतंसनं होलाका अशो
कोत्तंसिका अशोककुसुमैः शिरोभूषणारचना पुष्पावचायिका पुष्पक्रीडा कदंबयुद्धानि कदंबैः कदंबवकुलैः युद्धं यथाबलमन्योन्यप्रहरणं चू

का॰ सू॰ तलतिकाचूतपल्लवावतंसनं इक्षुभंजिका इक्षुखंडभक्षणं तालाश्च माहिमन्यो देश्याश्च क्रीडा जनेभ्यो विशिष्टतरमाचारमाचरेयुरिति सेभय
२२ क्रीडा माहिमन्यः शक्त्यनुरूपाः देश्यास्तत्तद्देशप्रसिद्धाः जनेभ्यः कुशलजनेभ्योऽपि विशिष्टतरमधिकतरं आचारं आचरणीयं यथा भवति तथा आ
चरेयुः कार्येषु संभूय मिलित्वा बहुभिः कार्या क्रीडा इति समापा एकत्र चारिण्याश्च विभवसामर्थ्याद्गणिकाया नायिकायाश्च सखीभिर्नाग-
रिकैश्च सहचरितमनेन व्याख्यातं एकस्यां चरति विहरतीति एकचारिणी तस्य सखीभिः भार्याभिः नागरिकैश्च सखिभिः सहचरितं सह क्रीडनं ग
णिकायाः उक्तचतुःषष्टिकलाभिज्ञाया नायिकाया वारांगनाया सखीभिः नागरिकैः पुंभिश्च सह क्रीडनं चैव भवसामर्थ्यात् वैभवे सति अने
न पूर्वोक्तप्रकारेण व्याख्यातं ज्ञेयं एवं एकचारिण्यां वेश्यायां च प्रसेकक्रीडां संभूय क्रीडां चोक्त्वा योऽत्र नायकसंधायकास्तान् पूर्वं च शब्दसूचितान्
पीठमर्दादीन् सिंहावलोकनन्यायेन सलक्षणप्रयोजनं निर्दिशति अविभवस्तु शरीरमात्रो मल्लिकाफेनककाषायमात्रपरिच्छेदः पूज्याद्देशा
दागतः कलासु विचक्षणस्तदुपदेशेन गोष्ठ्यां वेशे च साधयेदात्मानमिति पीठमर्दः अविभवः नायकापेक्षया किंचिन्न्यूनविभवः तु प्रकरणं त
रलवकः शरीरमात्रः विविधालंकाररहितः मल्लिकाकुंद्दमालिकाफेनकं नेपथ्यविशेषः काषायं कुसुंभवस्त्रं एतदेव परिच्छेदः परिच्छिन्नस २३
न्याड्यावर्तयतीति परिच्छेदः अलंकारः स यस्य पूज्यात् देशात् नायकसमीपादागतः कलासु पूर्वोक्तासु विचक्षणः प्रवीणः यः तदुपदेशेन त

स्य नायकस्य वासेन नायिकासमीपं गत्वा गोष्ठ्यां तत्र सकथासंदर्भे वेशे तद्गृहप्रवेशने आत्मानं स्वमेव साधयेत् बहुमन्येत स पीठमर्दः स्व
र्थः भुक्तविभवस्तु तत्र स एव गुणवान् सकलत्रो गोष्ठ्यां वेशे च बहुमतस्तदुपजीवी च विटः भुक्तः भोगेन क्षपितः विभवो यस्य तत्र सः नायकस
मीपवर्ती गुणवान् पूर्वोक्तकलाभिज्ञः सकलत्रः सदारः बहुमतः कुशलः तदुपजीवितं नायकमुपहत्य जीवामीति वादी यश्चाः स विटः आलि
काद्विमान् एकदेशविद्यस्तु क्रीडनको विश्वास्यश्च विदूषको वैहासिको वा एकदेशविद्यस्तु संपूर्णकलानभिज्ञोऽपि क्रीडनकः क्रीडाकुशलः
विश्वास्यः नायकस्यातिविश्वसनीयः चान् तदुपजीवीयः स विदूषकः वैहासिकोऽपि एते वेश्यानां नागरकाणां च मंत्रिणः संधिविग्रहनियुक्ताः
एते पीठमर्दादयः वेश्यानां नागराणां नायकानां मंत्रिणः रहसि प्रियवक्तारः संधिविग्रहवियुक्ताः संधौ अपूर्वे नायकघटने विग्रहे प्रणयक
लहो सादने चास्युनः संधाने नियुक्ताः नियोज्या भवति गौणनियोज्यानाह एतैर्भिक्षुक्यः कलाविदग्धा मुंडावृषल्यो वृद्धगणिकाश्च व्याख्याताः
एतैः पीठमर्दादिभिः संध्यादि कार्यस्य कर्तव्यत्वकथनेन तिशेषः कलाविदग्धाः कलासु पूर्वोक्तासु विदग्धाः कुशलाः इदं सर्वत्र संबध्यते भि
क्षुकी भिक्षाव्याजेन संचारिण्यः मुंडा तापसवेषेण संचारिण्यो वृषल्यो दास्यः वा दन्त्याः व्याख्याताः नियोक्तत्वेन एवं नागरिकस्य मुक्त्वाग्रा
मवासिकस्य माह ग्रामवासी च बहुमतः सजातानि चक्षणान् कौतूहलिकान् प्रोत्साह्य नागरिकजनस्य वृत्तं वर्णयन् श्रद्धां जनयेत्तदेवानुकु

वीतस्नानमवाहीग्यामीणाः बहुमतस्वरूपं वेषादिनानुरूपं मतः चाचागारिकवृत्तामितुः सजातीयान् प्राज्ञान् नतोलुपादिमतः विचक्षणान् नर्मशीलिन्वत्तु
रान्कौतूहलिकान् श्रोतुंकुतूहला विषयान् जनान् प्रतिवृत्तं कर्तव्यव्यापारं वर्णयन् बोधयन् प्रात्सास्वथ्यर्थं प्राचरणविश्वासं तदेवनागरिक
वृत्तं अनुकुर्वीनग्राचरेत् गोष्ठी प्रवर्तयन् संगत्या मनुरंजयेत् कर्मसु साहाय्येन चानुगृह्णीयात् उपचारयेच्चेति नागरिकवृत्तं गोष्ठी नागरिकक
थां प्रवर्तयन् वर्णयन् संगत्या स्वसंगत्या अनुरंजयेत् अनुवृत्तात् कुर्यात् ततस्तान् कलाभिज्ञान् कृत्वा कर्मसु संभूय क्रीडासु च अस्यैनुगृ-
ह्णीयात् साहाय्येन उपचारयेत् संध्यादौ निमन्त्रयेत् चान्नापिका अपि नागरिकवृत्तवतीः कुर्यात् नागरिकवृत्तं इति समाप्तं सिंहावलो
कितन्यायेन पीठमर्दादीनां संध्यादौ प्रवृत्तानां कर्तव्यं गोष्ठीमायोज्याह नात्यंतं संस्कृतेनैव नात्यंतं देशभाषया कथां गोष्ठीषु कथयन् लो
के बहुमतो भवेत् केवलसंस्कृतभाषया केवलदेशभाषया वा गोष्ठीषु सतीषु कथायां कां चिद् वर्णयन् पुमान् बहूनां संमतो न भवेत् किं त्व भा
षांवर्णयन्निसर्पः या गोष्ठी लोकविद्विष्टा या च स्वैरविसर्पिणी संदर्भरहिता परहिंसात्मिका परद्रोहसूचिका च या गोष्ठी नांनवदेदिसर्पः
लोकचित्तानुवर्तिन्या क्रीडामात्रैककार्यया गोष्ठ्या सहचरन् विद्वान् लोके सिद्धिं नियच्छतीति क्रीडासंधिः गोष्ठ्या सहचरन् गोष्ठीं कुर्वन् वि २३
द्वान् पीठमर्दादिः सिद्धिं अभिमतं नियच्छति प्राप्नोति इति प्रकरणसमाप्तिसूचकः इति वात्स्यायनसूत्रवृत्तौ प्रथमेधिकरणे चतुर्थोध्या

यः ४ एवं चतुर्थे राजधान्यादौ निवासे तत्र स्थैहधानक्रीडादिकं चागमं तमुक्त्वा इदानीमवसरसंगत्या गम्यनायिकालक्षणं चाह का
मश्चतुर्षु वर्णेषु सवर्णतः शास्त्रतश्च प्रयुज्यमानः पुत्रीयो यशस्यो लौकिकश्च चतुर्षु वर्णेषु ब्राह्मणादिषु मध्ये सवर्णतः सर्वैर्विभक्ति
कलक्षितः ब्राह्मणो ब्राह्मण्यामित्येवं स्वस्ववर्णासु च शब्दात् स्वहीनवर्णासु शास्त्रतः ब्राह्माद्यन्यमविवाहलब्धासु चादनुरक्तासु प्रयु
ज्यमानः संपादितः कामः स्वावृत्तिविशेषः ब्राह्मणादेः पुत्रीयः आमुष्मिकोपयोगिपुत्रसंपादकः यशस्यः नानादिगवच्छिन्नवृत्तिख्या
त्कर्षविषयकज्ञानहेतुः लौकिकः अपकर्षविषयकतादृशज्ञानाहेतुः भवतीति शेषः तद्विपरीत उत्तमवर्णासु परपरिगृहीतासु च प्र
तिषिद्धः उत्तमवर्णासु क्षत्रियस्य ब्राह्मणीत्येवं स्वस्वोत्कृष्टजातीयासु परपरिगृहीतासु परेषां कलत्रेषु सजातीयेष्वपि प्रयुज्यमानः का
मः ब्राह्मणादेरिति चानुवर्तते तद्विपरीतः उक्तानां पुत्रीयत्वादीनां विपरीतः आमुष्मिकानुपयोगि पुत्रापकर्षविषयकज्ञानयोर्हे
तुः कुतः निषिद्धश्च चोद्दैतौ न परदारानिसादिश्रुतिनिषिद्धः अवरवर्णास्वनिरवसितासु अनिश्चितपुरुषविशेषासु वेश्यासु पुनर्भूषु प्र
वैमन्यपरिगृहीतासु तासु अन्येनाढापुनर्भूः न शिष्टः कामरसानुवर्तते तु सुभार्यामुपेयादित्तिवत् न विहितः न प्रतिषिद्धः न परदारान् गच्छे
दितिवन्नाति निषिद्धः यद्यपि स्वतो भार्यागमनस्यरूपमप्राप्तत्वेन तत्तो भार्यामुपेयादित्यादिविधेः पंचपंचनखा भक्ष्या इत्यादिवत्परिसं

वेश्यासु पुनर्भूषु च न शिष्टो न प्रतिषिद्धः

ख्याविधित्वेनेतरनिवृत्तिपरत्वाद्वेश्यादिगमनं निषिद्धमेव तथापि न परदारान् गच्छेदिति निषेधवलेन आनियं चतुर्थीं करोति पुरोडाशं च
तुर्थीकरोतीति वस्तुरदारमात्रपरमित्याशयेन न निषिद्धमित्युक्तं ननु तर्हि मन्वादिभिः वेश्यादिगमनं तर्हि कुतो निषिद्धमित्याशंक्योक्तं पुत्रा
धहेतुत्वादामुष्मिकयत्किंचिद्दुःखहेतुत्वात्तथोक्तिः पारदारगमनब्रह्महत्यादिप्रतिबंधकवलवदनिष्टानुबंधित्वादित्याह सुखार्थत्वात् आ
मुष्मिकदुःखसमानसुखहेतुत्वात् पुत्रीयाधहेतुत्वाच्चेति बोध्यं यद्यपि ब्राह्मणस्य क्षत्रियादिस्त्रीष्वसवर्णाविवाहो मनुयाज्ञवल्क्याद्यभिहि
तस्तथाप्यपत्नीत्वाभिप्रायेण विहितत्वकथनं तत्र नायिकात्रित्वं कन्याः पुनर्भूर्वेश्या चेति तत्र गम्यनायिकाः तिस्रः तिस्र एव तत्याः पत्न्यश्चासव
र्णा अन्यकारणवशात् परगृहीता पाक्षिकी चतुर्थी त्रिगोणिकापुत्रः अन्यानि उक्तपुत्रादिभ्यः कारणानि वक्ष्यमाणानि परपरिगृहीता परभार्या पा
क्षिकी कदाचिद्गम्याकारणमेवाह सयदा मन्यते स्वैरिणीयमन्यतोपि बहुश एवं खंडितचारित्रा तस्यां वेश्यायामिव गमनमुत्तमवर्णिकान्याम
पि न धर्मपीडाकारीति सनागरिकः इयं परभार्यापि अन्यतः अन्यपुरुषात् बहुशः बहुलं खंडितचारित्रा नाशितया तिव्रता अतः स्वैरिण्येवेत्थिय
दा मन्यते असाधारणलिंगैरनुमिनोति तदा तत्संगमनं तन्निमित्तकसुखोत्पादनं न धर्मपीडाकारी पतिव्रतायामिव नातिदोषाय पुनर्भूश्चेयमन्य
पूर्वा न कारिण्यं का हि अन्यपूर्वा पूर्वमन्यभार्या सतीयतः पुनर्भूः संप्राप्तः तत्संगमने शंका अस्य धर्मविषयिणी कारणांतरमाह शंकि

तव्यमित्यादिना शंकितव्यं पतिं वा महांतमीश्वरमस्मदमित्रसंसृष्टमियमवगच्छप्रभुत्वेन चरति सा मया संसृष्टा तस्मादेनं व्यावर्तयिष्यति वा
यद्वा अस्मदमित्रसंसृष्टं अस्माकममित्रेण शत्रुणा संसृष्टं अनुरक्तं महांतमीश्वरं महाराजं शंकितव्यं अपकर्तृत्वशंकाविषयं क्रूरमितियावत् एता
दृशमपि पतिमवगच्छवशीकृत्य प्रभुत्वेन नियंतृत्वेन इयं नायिका चरतीति वर्तते सा मया संसृष्टा वशीकृता सती तस्मात् अस्मच्छत्रोः एवं भूप
तिं व्यावर्तयिष्यति मित्रतां शून्यं करोतीति निरूपितस्तत्र पंचमपर्थः इत्यादिहृद्दशसूत्राणां परक्षियं प्रकुर्वैते सन्येणान्वयः विरसं वामपि शक्तमपक
र्तुकामं च प्रकृतिमापादयिष्यति शक्तं हिताहितकरणसमर्थं अपकर्तुकामं अपकरणेच्छुं अविरसं मित्रतां शून्यं पतिमितीयमित्यादि संसृष्टे
सति चेहानुवर्तने प्रकृतिं मम मित्रमापादयिष्यति कारयिष्यतीति वा तया मित्रीकृतेन निग्रहकार्यं ममामित्रप्रतीघातमन्यद्वा दुःप्रतिपादकं कार्यं सा
धयिष्यामि तया मित्रीकृतेन तन्निरूपितमेव सासाधनेन तत्सत्तिर्वा दुरामित्रकार्ये यिष्यामि तया मित्रीकृतेन तन्निरूपितमेव आसाधनेन मित्र
स्यास्मन्मित्रस्य कार्यं अमित्रस्य शत्रोः प्रतिघातं अनिष्टं दुष्प्रतिपादकं मया दुःसंपाद्यं अन्यत्कार्यं धनादिकं वा साधयिष्यामि प्राप्नुयामिति वा
संसृष्टो वानया हत्वास्याः पतिमस्मान्द्राव्यमैश्वर्यमेनमधिगमिष्यामि अनया संसृष्टः अनुरक्तसन् अहमेतस्याः पतिं एतया हत्वा घातयित्वा
अस्मात् अनेन तत्सवितानामार्यभोग्यं एतत् राज्यादिरूपमैश्वर्यं अधिगमिष्यामि प्राप्स्यामीति वा निरत्ययं वा गमनमस्याः अर्थानुबंधि अहं च

वा॰सू॰ निःसारत्वात्क्षीणत्वस्तु पायः सोऽहमनेनोपायेन धनमतिमहत्कृच्छ्रादधिगमिष्यामि अस्याः अनया सह गमनं मेलनं निरत्ययं निरुपद्रवं अर्थानुबंधि
२५ अर्थहेतुश्च अहं च निःसारत्वात् निर्धनिकत्वात् क्षीणत्वस्तु पायः अविद्यमानजीवनसाधनः अतः अनेनोपायेन धनिकस्त्रीसमागमरूपेण अकृ
च्छ्रात् अनायासेन अहमपि गमिष्यामि प्राप्स्यामीति वा मर्म ज्ञात्वा मयि दृढमभिकामा सा मामनिच्छन्तं दोषविख्यापनेन दूषयिष्यति मर्म ज्ञात्वा मक
रहस्याभिज्ञा मयि दृढमभिकामा मां दृढमभिलषन्ती सा परकीया अनिच्छन्तं त्वामनभिलषन्तं संतं दोषविख्यापनेन मदीयमाज्ञानदोषप्रकटनेन दू
षयिष्यति अपयशस्कं करोतीति वा असद्भूतं वा दोषं अश्रद्धेयं दुःपरिहरं मयि क्षेप्स्यति मामभिकामा सा अनिच्छति मयीति शेषः मयीत्येतत् उत्तरसूत्र
द्वयेऽनुवर्तते असद्भूतं अविद्यमानं अश्रद्धेयं जनेन विश्वासायोग्यं दुष्परिहरं मया परिहर्तुमशक्यं दोषं अन्तःपुरद्रोहादिकं क्षेप्स्यति आरोपयिष्य
तीति भीत्या येन मे विनाशः स्यात् येन दोषारोपणेन विनाशः प्राणवियोगः तादृशमिति पूर्वेणान्वयः आयतिमन्तं वा वश्यं पतिं मत्तो विभिद्य द्विष
तो ग्राहयिष्यति आयतिमन्तं प्रतिवर्षं लभ्यधनं समस्तं स्वं स्वस्याः वश्यं पतिं मत्तो विभिद्य विश्लेषयित्वा मयि विरक्तं कृत्वेति यावत् द्विषतो मद्द्वेषिणाः स
हसा विभक्तिकस्तानि ग्राहयिष्यति अनुरक्तं कारयिष्यति वा स्वयं वा तैः सह संसृजेत तैः मद्द्वेषिभिः संसृज्येत अनुरक्ता भवेत् ततः तैः वद्धयका २५
रयेत् मदवरोधानां वा दूषयिता पतिरस्याः तदहमपि दाराणैव दूषयन् प्रतिकरिष्यामि अस्याः पतिः मदवरोधानां मत्परिग्रहाणां कर्मणि षष्ठी दू

षयिता तस्मात् अहमपि तस्य दाराणैव दूषयन् द्रोषवलः कुर्वन् प्रतिकरिष्यामि तस्य प्रसपकारं करिष्यामीति वा राजनियोगाच्चान्तर्वर्तिनं शत्रुं
वास्य निर्हनिष्यामि एनां वशीकृत्य एतस्याऽन्तर्वर्तिनं अधीनं शत्रुं राज्ञः शत्रुं राजनियोगान्निर्हनिष्यामि अक्षयामारयिष्यामीति वा यामन्यां का
मयिष्ये सास्या वशगता चानेन क्रमेणाभिगमिष्यामि अन्यां यां श्यामांकामयिष्ये कामये सा अस्या वशगा सखी अतस्तां कामितां अनेन एतदनुरा
गेण क्रमेणादिनक्रमेण अभिगमिष्यामि मद्भमि मुखीकरिष्यामीति वा कन्यामलभ्यां वात्माधीनामर्थरूपवतीं मयि संक्रामयिष्यति मल
भ्यां अस्माभिरन्यथालभ्यां आत्माधीनां स्ववशां अर्थरूपवतीं अर्थ्यं तद्रूपस्यार्थः मनोरमं रूपमस्या इति तथा कन्यां मुग्धां मयि संक्रामयिष्यति अनुरं
जयिष्यतेऽपेक्षितिवा ममामित्रो वास्याः पत्या सहैकीभावमुपगतस्तमनया रसेन योजयिष्यामि मम अमित्रोऽमित्रं अस्याः पत्या सह एकीभावमु
पगतः मित्रत्वं गतः अतस्तं मदमित्रं अयाप्रयोज्य कन्यारसेन वशीकरणौषधविशेषेण योजयिष्यामि अप्यनुरक्तं वा कारयिष्यामीति वा इत्येव
मादिभिः कारणैः परस्त्रियमपि प्रकुर्वीतेति साहसिकं न केवलं रागादेवेति परपरिग्रहगमनकारणानि साहसिकं आमुष्मिकविरोधमपि परस्त्रियं
परदारगमनं रागादेव केवलं अनुरागमात्रेण हेतुना न प्रकुर्वीत न कुर्यात जनः किंतु एवमादिभिः पूर्वोक्तैः परपरिग्रहस्य गमने कारणानि रक्ति उक्तेष्वेव
एतैरेव कारणैर्महामात्रसंबद्धा वा तत्रैकदेशचारिणी कान्चिदन्या वा कार्यसंपादिनी विधवा पंचमीति चारायणः महामात्रसंबद्धा अवशेंद्रियासती

वा॰सू॰ महामात्रैः महाराजसेनापतिभिः संबद्धा संयुक्ता विधवा एतैः अर्थानुबंधिभ्यादिभिः पूर्वोक्तैः कारणैः निमित्तैः गम्या तत्र महामात्रमध्ये एकदे
२६ शेन एकस्मिन् स्वारिणी अनुरक्ता कार्यसंपादिनी पूर्वोक्त धनादिलाभिमतकार्यसंपादिनी अन्या कुलटा वा सैव प्रव्रजिता षष्ठीति सवर्णानामः
सा उक्ता कार्यकारिणी महामात्रसंबद्धा प्रव्रजिता सन्यस्तभर्तृकापि गणिकाया दुहिता परिचारिका वानन्यपूर्वा सप्तमीति घोटकमुखः गणि
काया उक्ता कुलाभिजनवेश्यायाः तादृशी अनन्यपूर्वा पूर्वमन्यैरसुक्ता दुहिता उक्तविशेषणद्वयवती परिचारिका दासी वा उत्क्रांतबालभावा कुलयु
वतिरुपकारान्यत्वाद् अष्टमीति गोनर्दीयः उत्क्रांतबालभावा उक्तः पूर्वोक्तः सचासावंतः विशेषणं अनन्यपूर्वत्वकलाभिज्ञत्वरूपं बालायाभावः वा
लत्वं प्रति नवयुवतीत्वं उत्क्रांतबालभावा प्रस्याप्त इति तथा कुलयुवतिः सत्कुलोद्भवा स्त्री उपकारान्यत्वात् अन्यविधिकस्सुखापेक्षयान्यः उप
कारः आमुष्मिकोपकारि पुत्रादिः यस्याः तत्वात् विशिष्यमाणेति विशेषः चारायणादिमतं दूषयन् आचार्यः कार्यांतराभावादेतासामपि पूर्वास्वेवोप
लक्षणं तस्माच्चतस्र एव नायिका इति वात्स्यायनः एतासां विधवादीनां चतसृणां पूर्वासु कन्या पुनर्भू वेश्या परकीयासु मध्ये आमुष्मिकविरोधि
त्वैहिकधनाद्युक्तसाधनत्वसाम्येन अनिषिद्धत्वसाम्येन च यथायोगं तृतीयादिष्वंतर्भावः कुतः कार्यांतराभावात् उक्तकार्याद्धनादिरूपादन्यफ २६
लाभावात् तस्मात् अतः चतस्र उक्ताः भिन्नत्वाः तृतीया प्रकृतिः पंचमीत्येके तृतीया प्रकृतिः वंध्यापि कुतः भिन्नत्वाद् बहुकालसुखहेतुत्वेन उ

त्कृष्टो विलक्षणत्वात् एवं नायिकानां चातुर्विध्यमुक्त्वा नायकभेदमाह एक एव तु सार्वलौकिको नायकः तुः पूर्वविच्छेदकः सार्वलौकिकः अस्या अयं प
तिरिति सर्वजनविदितो नायक एक एव एककार्यत्वात् स एवाह प्रच्छन्नश्च द्वितीयो विशेष्यलाभात् प्रच्छन्नः पतित्वेन सर्वैरविदितः विशेषलाभात् एतं
स्मात् सुखातिशयलाभात् द्वितीयश्च नायक इत्यनुषज्यते एवं नायिकानायकभेदमुक्त्वा प्रत्येकं त्रैविध्यमाह उत्तमाधममध्यमतां च गुणागुणत ए
तेषां विद्यात् एषां एतास्वेते च एते नायिका नायकाः तेषां गुणाः द्वादशांगुलत्वादि वक्ष्यमाणं लिंगपरिमाणत्वं अगुणतस्तन्यूनपरिमाणतः उत्तमाध
ममध्यमत्वं उत्तमादितमत्वं अन्तर्वैविध्यमपि बोध्यं एवमिह परोपयोगिनीः वैहिकमात्रोपयोगिनीश्चोक्ता उभयानुपयोगिनी राहागम्या इत्यादिना
अगम्यास्त्वेवैताः एता वक्ष्यमाणा अगम्या एव उभयानुपयोगित्वे विशेषः तुः पूर्ववैलक्षण्यार्थः कुष्ठिन्युन्मत्ता भिन्नरहस्या पतिता प्रकाशार्थिनी ग
तप्राययौवना निश्वेता तिक्तस्वादुर्गंधा संबंधिनी सखी प्रव्रजिता संबंधिसखिश्रोत्रियराजदाराश्च कुष्ठिनी रोगविशेषवती भिन्नरहस्या अप्रस
न्नत्वेन सर्वजनविदिता प्रकाशार्थिनी प्रकाशयोगे इच्छुः संबंधिनी सपिंडा सखी भगिनीत्वेन व्यवहृता प्रव्रजिता तपस्विवेषा संबंधीः आत्मा तासखा मित्रं
श्रोत्रियः कुलाचारादिसंपन्नः राजा देशाधीश एतेषां दाराश्च दृष्टादृष्टविरोधात् वर्ज्या इति शेषः दृष्टपंचपुरुषा नागम्या काचिदस्तीति बाभ्रवी
याः दृष्टपंचपुरुषा दृष्टाः कृतस्वमात्मप्रतिगणिताः पंचपुरुषा यस्याः सा न अगम्याम्यासंबंधिश्रोत्रियराजदारवर्जमिति गोणिकापुत्रः कुष्ठि

ना०र० न्यादिषु मध्ये संबंधिन्या विद्याराः दृष्टादृष्टबलवदनिष्टहेतुतया सुतरां त्याज्याः एवं नायिकानायकभेदाः सर्वेऽप्युक्त्वा तत्संधायकमित्राण्याह सहपांसु
२७ क्रीडितमुपकारसंबद्धं समानशीलव्यसनं सहाध्यायिनं यश्चास्य मर्माणि रहस्यानि विद्यात् यस्य चायं धात्र्यपत्यं सहसंवृद्धं पितृपैतामहमविसंवा
दकमदृष्टवैकृतं वश्यं ध्रुवमलोभशीलमपरिहार्यममंत्रस्रावीति मित्रसंपत् अस्य स्वस्य रहस्यानि रहसि कृतानि मर्माणि छिद्राणि दोषानिति या
वत् यः विद्यात् यस्य चायं मर्मेति परत्र यमनुवर्तते यस्य पुरुषस्य रहस्यानि मर्माणि अयं नायको विद्यात् तं अविसंवादि अमिथ्यावादि अदृष्ट
वैकृतं अप्रतानस्विर्ष्यालिंगं वश्यं स्वस्यानुकूलं ध्रुवं स्वस्मिन्स्थिरानुरागं अलोभशीलं अल्पालोभस्वभावं अपरिहार्यमंत्रस्रावि अपरिहार्ये अप्रवा-
श्यवक्तव्यमेव मंत्रं परस्परकृतगोप्यगोष्ठीमध्ये परेभ्यः श्रावयतीति तथा इदं सर्वं सहपांसुक्रीडितमित्यादौ सर्वत्रान्वेति सहपांसुक्रीडितं स्व
हस्तेन साकं पांसुभिः क्रीडितवान् क्रीडितं उपकारसंबद्धं स्वोपकृते समानशीलव्यसनं स्वेन समानशीलव्यसने स्वभावनायिकाचिंते यस्य सहाध्या
यिनं स्वेन सह कामशास्त्राध्येतारं धात्र्यपत्यं सहसंवृद्धं स्वेन सह वर्धितं पितृपैतामहं कुलक्रमं चारायणाभिमतमित्राण्याह रजकनापितगोपा
लमालाकारगांधिकतांबूलिकशौंडिकभिक्षुकपीठमर्दविटविदूषकमित्राः स्वघोषिन्मित्राश्च नागरिकाः स्युरिति चारायणः रजकादयस्तद्योषि २७
तो वा मित्राणि येषामिति बहुव्रीहिः यदुभयोः साधारणमुभयत्रोदाहार्यं विशेषतो नायिकाया विस्रब्धं मित्रं यत् मित्रे उभयोः स्वस्वसंध्येयाश्च सा

धारणं नायिकाया विशेषतो विशेषेण विस्रब्धं विश्वसनीयं यश्च उभयत्र उभयोरपि उदाहार्यं उदकाहर्त्तदपि मित्रमित्यन्ये एवं मित्राण्युप
क्तानि तेषां दौत्ये नियुक्तानां कार्यमाह तत्र दूतकर्म पटुता धृष्टत्वमिंगिताकारज्ञता अनाकुलत्वं परमर्मज्ञता प्रतारणा लोककालज्ञानं देशज्ञानं कार्ये
षु विषह्यबुद्धित्वं लघ्वी प्रतिपत्तिः सोपाया चेति दूतगुणाः तत्र नायिकाविषये दूतानां दौत्ये नियुक्तानामुक्तानां कर्म उच्यत इति शेषः धृष्टत्वं धैर्यं
इंगिताकारज्ञानं नायकयोरिंगितमभिप्रायः आकारस्तदभिव्यंजकमुखविकारादिः अनाकुलत्वमचापल्यं परमर्मज्ञता परमर्मज्ञापनं कार्येषु विष
ह्यबुद्धित्वं शीघ्रप्रतिभा सोपाया बुद्धिकौशल्यजन्या लघ्वी प्रतिपत्तिः अन्यदीयसूक्ष्मचिन्हदर्शनं एवं मित्रादिकं तत्कर्म चोक्त्वा तद्वतः कार्यसिद्धि
मभियुक्तौ त्वाह आत्मवान्मित्रवान्युक्तो भाववेत्तो देशकालवित् अलभ्यामप्ययत्नेन स्त्रियं संसाधयेन्नरः आत्मा बुद्धिः प्राशस्त्यमत्तु प्रयुक्तो यु
क्तिमान् इति श्रीवात्स्यायनसूत्रवृत्तौ प्रथमधिकरणे पंचमोऽध्यायः समाप्तश्चाधिकरणं नायकसहायदूतीविमर्श इति समाप्तं प्रथमाधिकरणं सा
स्कन्दसिंहकृविनाकृतिनामानं दसंपद्दनिर्द्धै श्रीपुत्रसूत्रवृत्तौ सांप्रयोगिकमत्र तन्यते विशदं एवमंगजातमुक्त्वा प्रधानं संप्रपंचं विशदयितुं प्र
वृत्तिर्नायिकानायकयोरत्वांतरभेदं प्रमाणभेदहेतुमाह शशो वृषोऽश्व इति लिंगतो नायकविशेषा नायिकाः पुनर्मृगी वडवा हस्तिनी चेति लिंग
तः सुखहेलवयवविशेषेण न्यूनमध्याधिकमानेन आयामपरिणाहाभ्यां षडष्टद्वादशांगुलिमानेनेति यावत् अप्रविछिन्नत्वं तृतीयार्थः य

वा॰सू॰ थाक्रमंशशोवृषोऽश्वइतितत्तुतीतीयानायकविशेषाः एवंनायिकाविशेषाश्चत्रेयाः तत्रसदृशसंप्रयोगेसमरतानित्रीणिविपर्ययेविषमर
२८ तानिषट् तत्रउक्तेषुमध्येसदृशसंप्रयोगेलिंगतः सदृशयोर्यथाक्रमंशशस्यमृग्यैवंसंवंद्येत्रीणिसमरतानिविपर्ययेवृषस्यमृग्यातुरगस्यवड
वयातस्यैवमृग्यावृषस्यकरिण्याशशस्यवडवयातस्यैवकरिण्यैवंलिंगतोन्यूनाधिकसंप्रयोगेसतिविषमरतानिषट् विषमेषुषट्स्वपिमध्येप्रनं
तरसंप्रयोगेप्रनंतरयोःसंनिहितयोःवृषाश्वयोःक्रमेणमृगीवडवाभ्यांसंयोगेपुरुषाधिक्यमितिद्वेप्राधेव्यवहितंतृतीयं विपर्यये पुनर्द्वेनीचरतेवि
पर्ययेविषमसंप्रयोगएवद्वेचतुर्थपंचमेव्यवहितंमकंनीचतररतंव्यवहितंचरमं तत्रसमानिश्रेष्ठानि तत्रउक्तनवरतेषुश्रेष्ठानिसुखाधि-
काहेतुत्वादितिशेषः तरशब्दांकितेद्वेकनिष्ठमध्यमानिशेषाणि तरशब्दांकितेविषमेषुत्तरपदघटितनामनीतृतीयषष्ठेकनिष्ठेप्रतिजघन्येप्र
त्यसुखहेतुत्वात्शेषाणिचत्वारि मध्यमानिप्रनतिसुखहेतुत्वात् साम्येपितुच्चांकनीचांकाज्यायइतिप्रमाणतोनवरतानि साम्येपिसमरते
ष्वपिउच्चांगंयत्किंचिदुक्ताधिकमानांगविशेषसंयोगजंनायकस्यनीचांकात्उक्तविपरीतज्ञातज्यायःसुखाधिकाहेतुःप्रमाणतःगुरुत्वायामपरि
णाहाभ्यां यस्यसंप्रयोगकालेप्रीतिरुदासीनावीर्यमल्पंक्षतानिनसहतेसमंदवेगः संप्रयोगकालेनायिकयेतिशेषः यस्यपुरुषस्यप्रीतिःद्वेति २८.
विशेषःउदासीनाअल्पाक्षतानिनायिकाकृतानिनसहतेसमंदवेगाख्योनायकः तद्विपर्ययोमध्यमचंडवेगोतस्मान्मंदवेगाद्विपर्ययोविपरीत

धर्मीयथाक्रमंमध्याधिकनायिकासंप्रयोगकालीनप्रीतिवीर्यनखक्षतसहनौमध्यचंडवेगाख्यौनायकौ तथानायिकापि तथानायकवत्नायिका
पिमंदमध्यचंडवेगाभेदेनत्रिविधा अत्रापिप्रमाणवदेवनवरतानि प्रमाणवत्षडंगुलाद्युक्तपरिमाणलिंगशशादिनायकत्रितयप्रयुक्तरतानी
वअत्रापिउक्तमंदमध्यचंडवेगाख्यनायकप्रयुक्तान्यपिरतानिसमविषमभेदेननवभवंतीतिशेषः अत्रयथाक्रमंमंदादिवेगानांतादृशनायिका
भियोगेत्रीणिसमरतानिमंदमध्यमयोःयथाक्रमंमध्यममंदाभ्यांचंडवेगयाचयोगेचत्वारिचंडस्यआभ्यांयोगेद्वेइतिविषमाणिषट्बोध्यानि तद्वत्का
लतोपिशीघ्रमध्यचिरकालानायिकाश्च कालतःशीघ्रमध्यचिरकालेनभोगार्थिन्यइतिशेषःक्रमेणशीघ्रकालाद्याख्यानायिकाश्चकालान्नायकाः
तद्वत्त्रिविधाः तत्प्रयुक्तान्यपिनवविधानीत्यर्थः अत्रापिपूर्ववत्क्रमेणशीघ्रकालादीनांक्रमेणनाभियोगेत्रीणिसमरतानितथ्यप्रथमस्यद्वितीयतृ
तीयाभ्यांद्वितीयस्यप्रथमतृतीयाभ्यांतृतीयस्यप्रथमद्वितीयाभ्यांयोगेविषमाणिषट्एवंसप्तविंशतिरतानिप्रथमनवकेनेतरयोर्योगत्वेनतानीतिवो
ध्यं ननुस्त्रीणांकंउतिव्यतिरेकेणसुखस्यैवाभावात् तदर्थंचिरकालसुरतार्थित्वंकथमित्याशंकते तत्रस्त्रियांविवादःइत्यादिना तत्रनायिकानायक
योर्मध्येस्त्रियांस्त्रीसंबंधिभावोसत्तोविवादःमानाभावः नदेवस्यषयतिनस्त्रीपुरुषवद्भावमधिगच्छति पुरुषवत्पुरुषइवदैधर्म्यदृष्टांतःवसिरव
धारणाभावंसुखंनाधिगच्छति नचतर्हितस्याःरतौकुतःप्रवृत्तिरित्यतआह सातस्यातस्याःपुरुषेणकंडूतिरपनुद्यते पुरुषेणतत्संयोगेनतस्याःस्त्रि

याः कंडूतिः सा न स्यात् नियमेनापनुद्यते सा पुनरभिमानिकसुखेन संसृष्टा रसांतरं जनयतीति तच्छिन्नसुखबुद्धिरस्याः स्यादेवा पुनः अप्रादौ अभिमा
निकसुखेन अहमनेन प्रार्थिता स्त्रीत्यभिमानात्मकवृत्तिविशेषजसुखेन हेतुना पुरुषेण सह संसृष्टा सती नितरां रसांतरं कंडूतिवृत्तिं जनयतीति प्रा
प्नोतितस्मिन्कंडूत्यपगमे अस्याः सुखबुद्धिः कंडूतिर्दुःखहेतुत्वेन तदपगमे क्षुधितस्येव तृप्तिरनुभवतिसुखधीरित्यर्थः ननु पुरुषस्येव सुखं
स्त्रियास्तु कंडूत्यपगमे सुखभ्रांतिमात्रमित्युक्तमयुक्तं मानाभावात् परसुखासुखयोः परेंद्रियाग्राह्यत्वात् न वक्तुं सुखमिति प्रष्टुमप्येवं सुखमिति
वक्तुं चाशक्यत्वेन शब्दाभावाल्लिंगाभावाच्चेति तत्राह यः शंकते पुरुषप्रीतिरिति स्वानभिज्ञत्वात् कथंचित्सुखमिति प्रष्टुमशक्यत्वात् कथ्यते न तदुपलभ्य
तइति चेत् पुरुषप्रतीतेः पुरुषसुखस्य स्त्रियास्तदभावस्य चानभिज्ञत्वात् अन्याप्रत्यक्षत्वात् सुखं कथमतिवानवेत्ति प्रष्टुमशक्यत्वात् रहस्यसुखस्ये
तिशेषः इदमुक्तस्यास्तु लक्षणं तथा च प्रत्यक्षाद्यभावात् एतत् स्त्रीपुरुषयोः सुखतदभाववत्त्वं कथं केन प्रमाणेन उपलभ्यते ज्ञायते भवतेति शेषः पु
रुषः भाववान् तदुद्देशेन प्रवृत्तत्वे सत्यसति तदितरप्रतिबंधके निवृत्तित्वात् यो यदुद्देशेन प्रवृत्तत्वे सति तदितरप्रतिबंधके निवृत्तिमान् स तद्वान् यथा पा
चकः स्वतो विरतोऽव्यभिचारवारणाय सत्यंतं कार्यत्वावच्छिन्नं प्रतिखस्य प्रतिबंधकत्वात् सिद्धिवारणाय तरपदं स्त्रीभावरहितात्वाभाविक प्रवृत्तिनिवृत्त्य २८
भयश्रुत्यत्वात् दासवत् पुरुषेव्यभिचारवारणाय अन्यपदमित्यनुमानांतरमप्याह पुरुषो भावमधिगम्य स्वेच्छया विरमति न स्त्रियमपेक्षते न त्वेवं

स्त्रीस्वोद्वालवितः अधिगम्य लब्ध्वा स्वेच्छया स्वेनाभावाधिगमतत्त्वाद्विरमतीत्येतीतिशेषः स्त्रियं स्त्रीसंबंधिभावाधिगमं नापेक्षते न प्रतीक्षते न स्यात् तद्
भावात् न त्वेवं स्त्री स्वेच्छया विरमति रमते वा अतस्तस्यास्तद्भावानुमीयत इत्यर्थः स्त्री तत्प्रयुक्तभाववती शीघ्रनिवृत्तेनायके सत्यपि अत्वात्त्विर प्र
वृत्तेः अनुरक्तत्वाच्च व्यतिरेकेणाविरक्तवत् इति सप्रतिपक्षमाशंकते तत्रैवत्स्याच्चिरवेगो हि नायके स्त्रियोऽनुरज्यंते शीघ्रवेगस्य चावसाने अप्यसूयिन्यो
भवंतीत्यसर्वभावप्राप्तेश्चलक्षणमितित्र पूर्वानुमाने एतत्त्वभ्यमासांस्यात् सप्रतिपक्षं स्यात् स्त्रियः चिरवेगबहुकालरते नायकविषये अनुरज्यं
ते अनुरक्ता हितास्त एव शीघ्रवेगस्य शीघ्रनिवृत्तनायकविषये अवसाने शीघ्रनिवृत्तौ निमित्तभूतायां अभ्यसूयिन्यश्च भवंति हि यात् भाववती न स्यात् तदा
रप्रवृत्तेऽनुरक्ताऽन्यस्मिन्नसूयिन्यो च न स्यात् न चेयं तथा तस्मात् तथेत्यनुकूलतर्केण साध्यं साधयतीत्यसर्वमित्यादिना तत्सर्वमनुरक्तत्वादिकं स्त्रियाः
भावप्राप्तेश्चलक्षणं साधकं भवतीत्यर्थः इति शब्दः शंकासमाप्तौ अतिपामायमानानुरागानुरागविषयदृढादृढकाष्ठादौ व्यभिचारेणदूष
यतितच्चनकंडूतिप्रतीकारोऽपि हि दीर्घकालं प्रिय इति तदुपपद्यत इति एवं तस्मात् संदिग्धत्वाद् लक्षणमिति तच्चानुरक्तत्वादिकं न साध्यसाधक
मितिशेषः कुतः दीर्घकालं यथा तथा कंडूतिप्रतीकारः कंडूतिप्रतिक्रियते निवर्त्यते ते नेति तथाकाष्ठादिः प्रियः प्रीतिविषयोहि अपि शब्दाच्चिरं कं
डूसनिवर्तकत्वेनादिरप्रियोहि इति हेतोः तत्र भावाभावसाधकमनुमानं उपपद्यत एव साध्यसाधकमेव तस्मात् उक्तानुमानात्संदिग्धत्वात्

वा॰सू॰ साधकत्वेन भावाच्छन्नस्पर्शाः अप्राप्नोति कं स्त्रीणां भावप्राप्तिः शंकासमाप्तिसूचकः स्त्रियः नायकाद्वृधिकभावबत्स्याः गर्भिणीत्वात् व्यतिरेकेण पुरुष
३० वत् कं उत्सपनोत्सृत्तछायायां धादिवदानुषंगिकमितिपरिहरति संयोगेत्यादिना संयोगे योषितः पुंसा कंडूतिरपनुद्यते तत्राभिमानसंस्पर्श—
सुखमित्यभिधीयते सा तत्स्याद्युवतिरारंभात्प्रभृति भावमुपगच्छति पुरुषः पुनरंत एव तदुपपन्नतरं नस्य संसर्गात् इति प्राप्तौ गर्भसंभव उपपद्य
त इति भावाभ्रवीयाः पुंसा कर्त्रा संयोगे सति योषितः कंडूतिरपनुद्यत इति यत् तत्तु अभिमानसंस्पर्शं अभिमानिकं अतस्मिंस्तद्बुद्धिरभिमानः
सुखं प्रानुषंगिकं नारूपगमत्वभिधीयते प्राप्तिमुख्यं तु युवतिः आरंभात्प्रभृति संयोगप्रभृति सातत्यात् अविच्छेदेन भावमिच्छाविशेषं स
त्वविशेषं वा उपगच्छति पुरुषः पुनरंत एव भावमुपगच्छतीत्यनुषंगः ततः स्त्रीणां सातत्ये भावः उपपन्नतरं कुतः रतिप्राप्तौ भावप्राप्तौ असत्यां
गर्भसंभवो नह्युपपद्यते नो भावोऽनुमीयत इति बाभ्रवीया मन्यंते ननु स्त्रियः मारंभं सततसुखवत्यः आरंभे मध्यस्थचित्तत्वात् अनतिसहिष्णुत्वा
त् विरामाभीप्सत्वात् मध्ये रागाधिकावस्थात् पुरुषवदिति सप्रतिपक्षं शंकते अत्रापि तावेव शंकापरिहारौ अत्रापि बाभ्रवीयानुमाने पितावेवस्य
मालानेवद्दृष्टव्यादिति विशेषः शंकामेवाह भूयस्तत्र तस्यान्तहोसेनरसप्राप्ता वारंभकाले मध्यस्थचित्तता नातिसहिष्णुता च ततः क्रमेणाधिकोरागयोगः ३०
शरीरेपि च निरपेक्षत्वं मंते च विरामाभीप्से सेत्तदनुपपन्नमिति तत्र संप्रयोगे स्त्रीणां सातत्ये नाविच्छेदेन रसप्राप्तौ साध्यमानायां तत् अनुमानं स्या

त् दोषयुक्तं स्यात् अप्रयोजकत्वशंकां तर्केण परिहरति आरंभकाल इति साध्याभाव इति शेषः आरंभकाले सुरतारंभे स्त्रीणां मध्यस्थचित्तता
मंदानुरागः अनुपपन्नमित्यनेनान्वयः नातिसहिष्णुत्वं क्षताद्यसहनं ततः अनंतरं क्रमेण उत्तरोत्तरं अधिकोरागयोगः उत्साहविशेषाधिक्यं तस्यैव
विवरणं शरीरेपि च निरपेक्षत्वमपेक्षाभावः अनतिनखक्षतादिसहिष्णुत्वं अंते यात्किंचित्कालानंतरं विरामाभीप्सा रतिनिरपेक्षा एतत्सर्वमनुपपन्नं
स्यात् नचैवं तस्मान्न तथा इति समाप्तौ यत् उपक्रमे उदासीनस्वभावं व्यापारासहिष्णु च मध्ये व्यापारवच्च ततः तद्धि रागवच्च तत् आरंभमभिव्याप्या
विच्छिन्नव्यापारवन्न भवतीति सामान्यव्याप्तौ कुलालचक्रेऽभ्रमकेऽव्यभिचारे दूषयति नचेत्यादिना नचेन सामान्येपि भ्रांतिसंस्कारे कुलाल
चक्रस्य भ्रमकस्य वा भ्रांतावेव वर्तमानस्य प्रारंभे मंदवेगता ततश्च क्रमेण पूरणं वेगस्येत्येतदुपपद्यते धातुक्षयाच्च विरामाभीप्सेति तस्मात् दृष्टांताक्षेपः
कुलालचक्रस्य कुलालसंबंधि घटनिर्माणनिमित्तं चक्रस्य भ्रांतावेव वर्तमानस्य भ्रमणयुक्तस्य भ्रमकस्य क्रीडासाधनविशेषस्य च भ्रांतिसंस्का
रे भ्रमणव्यापारे सामान्येपि उपक्रमम् आरभ्य तस्यापि प्रारंभे विरामस्याप्युपलक्षणमिदं मंदवेगता अल्पवेगवता ततः अनंतरं वेगस्य चक्रेण पूरणं वे
गाधिकत्वं उपपद्यते तस्मात् दृष्टांतप्रतिबन्धकभावः इह तथा चारंभप्रभृति इह भ्रमणस्यापि वेगतारतम्येन न्यूनाधिकभाववत् आरंभप्रभृति
रतिलाभेपि अभिव्यक्तितारतम्येन न्यूनाधिकभाव उपपद्यत इति भावः विरामेच्छायां निमित्तमाह धात्विति गोधातुः उक्तार्थे अभियुक्ता

वा॰रू॰ किंसंवादयति सुखलोके सुखंपुंसां स्त्रीणां तु सन नेसुखं धातुक्षयनिमित्ता च क्रियाभेच्छोपजायते उपसंहरति तस्मादिति तस्मात्पुरुषवदेव रसव्यक्ति
३१ योषितोपि द्रष्टव्या पुरुषवदेव पुरुषापेक्षयाऽधिकैव व्यक्तिरभिव्यक्तिः नन्विंद्रियविशेषजन्यतावच्छेदकजात्यवच्छिन्नसुखोद्देश्यकप्रवृत्ति
मतोर्द्वयोः कथं फलभेद इत्याशंकां कर्तृत्वाधिकरणत्वनिमित्तकविजातीयक्रियाजन्यविजातीयाभिमानादिति परिहरति कथमित्यादिना
कथंहि समानायामेवाकृतावेकार्थमभिप्रपन्नयोः कार्यवैलक्षण्यं स्यादुपायवैलक्षण्यादभिमानवैलक्षण्याच्च उपायवैलक्षण्यं च सर्गा
त् कर्ता हि पुरुषोधिकरणं युवतिरन्यथा क्रियां कर्ता प्रतिपद्यते अन्यथाधारा इति अभिमानवैलक्षण्यमप्युपायवैलक्षण्यादभियोक्ताहमि
ति पुरुषोनुरज्यतेभियुक्ताहमनेनेति युवतिरिति विवात्स्यायनः आकृतौजातौ समानायां इंद्रियविशेषसंयोगजन्यतावच्छेदकतया फलद्वय एक॰
स्यां सिद्धायां अर्थे ताद्दशैकजात्यवच्छिन्नफलं अभिपन्नयोः उद्दिश्यप्रवृत्तयोः यूनोरिति शेषः कार्यवैलक्षण्यं फलतारतम्यं कथं कस्माद्धेतोः स्या
त् हि हेतौ परिहरति उपायवैलक्षण्यात् विजातीयव्यापारात् जन्यत्वं पंचम्यर्थः अभिमानवैलक्षण्यात् विजातीयमानसवृत्तिविशेषात् का
र्यवैलक्षण्यमित्यनुषज्यते सर्गात् कर्तृकरणत्वरूपधर्मभेदात् जन्यत्वं पंचम्यर्थः उपायवैलक्षण्यं विजातीयक्रिया भवति तदेव विशदयति ३१
अन्यथाविजातीयां उपायवैलक्षण्यात् विजातीयक्रियातः अभिमानं वैलक्षण्यं विजातीयाभिमानः भवति तमेवाह अभियोक्ताहं योषिद्धृतिसं

योगहेतुकृत्याश्रयः अभियुक्ताऽहं कर्तृकसंयोगाश्रया अनेन कर्त्रेति नीया ननु कर्तृत्वाद्यभेदेन क्रियावैजात्यवत् तद्वैजात्येन फलस्य वैजात्य
मेव स्यात् न तारतम्यमित्याशंक्य कर्त्राधारयोर्भिन्नतया क्रियावैजात्येपि क्रियायाः संयोगद्वारा हेतुत्वेन संयोगस्यैकत्वात् न फलवैजात्यमिति स
माधत्ते तत्रेत्यादुपायवैलक्षण्यवदेव हि कस्मात्कार्यवैलक्षण्यमपि न स्यादिति तच्च नाहेतुमदुपायवैलक्षण्यं कर्त्राधारयोर्भिन्नलक्षणत्वाद
हेतुमत्कार्यवैलक्षण्यमन्याय्यं स्यादाकृतेरभेदादिति तत्र तथा सति एतत् वक्ष्यमाणं दूषणं उपायवैलक्षण्यवत् कर्त्रधिकरणत्वभेदात् क्रियावैजात्य
वत् कार्यवैलक्षण्यं फलवैजात्यं कस्मात् हि हेतौ समाधत्ते तच्चनेति उपायवैलक्षण्यं वैजात्यं हेतुमत् कर्त्राधारभेदहेतुकं युक्तं कुतः भिन्नलक्षणत्वात्
भिन्नस्वरूपत्वात् कार्यवैलक्षण्यं फलवैजात्यं तु अहेतुमत् भिन्नासाधारणहेतुशून्यं अतः आकृतेः द्वारभूतसंयोगस्य अन्याय्यं अयुक्तं ननु फ
लं एकत्वावच्छिन्नं भवितुमर्हति संहतानेककारणजन्यत्वात् घटादिवदित्यनुमानेन यूनोः पृथक् सुखं न स्यादित्याशंक्य मेषाद्यभिघातजन्यदुः॰
खादौ व्यभिचारान्नेदमित्याह तत्रेतत्स्यात्संहत्य कारकैरेकोर्थोभिनिवर्त्यत इति पृथक् परस्परस्वार्थसाधकौ पुनरिमौ तद्युक्तमिति तच्च न युग
पदनेकार्थसिद्धिरपि दृश्यते तद्यथा मेषयोरभिघाते कपित्थयोर्भेदे मल्लयोर्नियुद्ध इति तत्र तथापि एतत् वक्ष्यमाणं कारणैः साधनैः संहत्य सं
भूय एकोर्थ एकं कार्यं निर्वर्त्यते निष्पाद्यते हि प्रसिद्धौ इति हेतोः इमौ युवानौ पृथक् प्रत्येकं परस्परस्वार्थसाधकौ अन्योन्याभिमन सुखवंतौ तत्

वा॰सू॰ इत्येतदव्यभिचारेणादूषयति तच्चेति युगपत्संभवार्थं साधनैः अनेकार्थसिद्धिः यथ कफलं तद्देवाह मेषयोरिति कर्तरि षष्ठी अभिघाते सति
३२ कपित्थयोः फलविशेषयोः भेदेनियुद्धे च अभिघाताख्ये संयोगे सति फलभेदो दृश्यत इति शेषः तथा च पूर्वानुमाने सुखादिभिन्नत्वमुपाधिरि
निवोध्यं ननु मल्लादीनां कर्तृत्वेनैका तत्र व्यभिचार इत्याशंक्याह एककार्यकारित्वपदार्थत्वादिना तत्राप्येकासंभवात् स्वरूपासिद्धिरित्याह ननु च का
रकभेद इति चेदिहापि न वस्तुभेद इति तत्र मल्लयोः कर्तृत्वेनैककारणात् कारकं साधनं इहापि पुंस्त्रियोरपि वस्तुवस्तुत्वेनैकत्वात् नन्वेवं सति फलतारत
म्यमपि नस्यादित्यत आह उपायवैलक्षण्यं तु सर्गादभिहितं पुरस्तात् तेनोभयोरपि सदृशी सुखप्रतिपत्तिरिति समीत कर्तृत्वाधिकरणत्वलक्षणकार
कभेदात् उपायवैलक्षण्यं क्रियाभेदः तस्मादभिमानभेद इति शेषः तेन अभिमानवैलक्षण्येन सदृशी सजातीयात्समभिहितं पुरस्तादित्यन्वयः उ
क्तार्थे दृढसंमतिमाह जातेरभेदाद्दंपत्योः सदृशं सुखमिष्यते तस्मात्तथोपचार्या स्त्री यथाग्रे प्राप्नुयाद्रतिं जातेरभेदात् शशमृगीत्वादिजात्यैका
त्वदंपत्योर्मिथुनीभूतयोः यथाप्यजातीयत्वाभेन रतिं अनुरूपामिति शेषः तथा तज्जातीया स्वसमानजातीयेति यावत् उपचार्या संपाद्या उपसंहरति
सदृशत्वस्य सिद्धत्वात् कालयोगीन्यपि प्रमाणवदेव नवरतानि सदृशत्वस्य पूर्वोक्तस्य सुखस्य तत्साजात्यस्य च सिद्धत्वात् साधितत्वात् कालयोगीन्यपि ३२
कालप्रमाणान्यपि रतभावशब्दैः पर्यायैः स्फुटयति रसो रतिः प्रीतिर्भावो रागो वेगः समाप्तिरिति पर्यायाः संप्रयोगो रतं रहः शयनं मोहनमिति पर्यायाः र

सादिशब्दाः सुखतत्साधनवृत्तिविशेषे च प्रयुज्यन्ते संप्रयोगरतशब्दौ अवयवविशेषसंयोगवाचकौ रहःशयनशब्दौ तत्सर्वकालिकसंयोगवाच
कौ संमोहनशब्दस्तदनंतरविशेषवृत्तिविशेषपरः तेषां पूर्वापरभावित्वात् पर्यायत्वकथनं प्रमाणकालभावजानां संप्रयोगाणामेकैकस्य नवविध
त्वात् तेषां व्यतिकरे सुरतसंख्यानशक्यते कर्तुमतिबहुत्वात् प्रमाणं लिंगपरिमाणं कालः शैघ्र्यादिः भावोऽत्र सुखजनक इति विशेषः व्यतिकरो मिश्री
णां इदं च उपपादितं प्राक् एवं समत्वादिभी रतानां भेदमुक्त्वा फलभेदाद्भेदमाह तेषु तर्कादुपचारान् प्रयोजयेदिति वात्स्यायनः तेषु रतेषु तर्केतैर्लिंगा
दिनानुमीयत इति तर्कः भावः तस्मात् उपचारान् भेदान् प्रयोजयेत् जानीयात् तानेवाह प्रथमरते चंडवेगता शीघ्रकालता च पुरुषस्य तद्विपरीतमुत्त
रेषु प्रथमरते नवसंगमे चंडवेगता गाढसुखजनकता शीघ्रकालता शीघ्रकालता च शीघ्रकालविरामता पुरुषस्य कर्तरि षष्ठी उत्तरेषु उत्तरोत्तरका
लिकरतेषु तद्विपरीतं भावप्रधानो निर्देशः क्रमेण मंदसुखजनकता अधिककालवत्तता च भवतीति शेषः योषितः पुनरेतदेव विपरीतमाधातुक्ष
यात् प्रथमरत इति उत्तरेष्विति चानुवर्तते योषित इति कर्तरि षष्ठी एतदेव गाढागाढसुखजनकत्वशीघ्रमंदकालिकत्वादि विपरीतं उक्तात् प्रथमे
मंदवेगता चिरकालिकता च उत्तरोत्तरेषु चंडवेगता शीघ्रकालता चेति अवधिमाह आधातुक्षयात् इंद्रियोपरमपर्यंतं प्राक् स्त्रीधातुक्षयात् पुरु
षस्य धातुक्षय इति प्रायोवादः समवयस्कोः स्त्रीपुंसयोः कालक्रमेण स्त्रीधातुक्षयात् स्त्रीणां धातुक्षयात् इंद्रियोपरमात् प्रायोवादः क्वचिद्विपरीतद

वा॰सू॰ र्शनात् प्रासंगिकः अथ सिंहावलोकनन्यायेन स्त्रीणामारंभप्रभृति सुखमिच्छन्तीदं द्योतयति मृदुत्वादुपमृद्यत्वान्निसर्गाच्चैव योषितः प्रा
३३ प्नुवन्त्याशु ताः प्रीतिमित्याचार्या व्यवस्थिताः संयोज्यावयवविशेषस्य मृदुत्वात् कोमलत्वात् उपमृद्यत्वात् अभिघाताश्रयत्वात् इति भेदानाह अ
भ्यासादभिमानाच्च तथा संप्रत्ययादपि विषयेभ्यश्च तत्त्वज्ञा विदुः प्रीतिं चतुर्विधां अभ्यासात् पुनः पुनराहतेः अभिमानात् संकल्पात् संप्रत्य
यात् अन्यस्मिन्नात्मीयत्वाध्यासात् विषयेभ्यः स्पर्शादिभ्यः तत्त्वज्ञा आचार्याः उक्तं विशदयति शब्दादिभ्यो बहिर्भूता या कर्माभ्यासलक्षणा प्रीतिः
साभ्यासिकी ज्ञेया मृगयादिषु कर्मसु मृगयादिषु कर्मसु विषये या प्रीतिः अभ्यासजा सा शब्दादिभ्यः शब्दादिविषयतत्त्वात् बहिर्भूता भिन्ना अत
आभ्यासिकी अनभ्यस्तेष्वपि पुरा कर्मस्वविषयात्मिका संकल्पाज्जायते प्रीतिर्या सा स्यादाभिमानिकी संकल्पात् अनभ्यस्तेष्वपि कर्मसु अविषयात्मिका
विषयज्ञभिन्ना पुरा लाभात् मानसी या प्रीतिः सा आभिमानिकी तस्या विषयः तामेवोदाहरति प्रकृतेर्या तृतीयस्याः स्त्रियाश्चैवोपरिष्टके तेषु तेषु च विज्ञे
या चुंबनादिषु कर्मसु तृतीयस्याः प्रकृतेः अनपत्याया औपरिष्टके वक्ष्यमाणे चुंबनादिषु कर्मसु तेषु तेषु नखक्षतादिषु पुरा या या प्रीतिः सा आभि
मानिकी सा यथैः नान्योयमिति यत्र स्यादन्यस्मिन् प्रीतिकारणं तंत्रज्ञैः कथ्यते सापि प्रीतिः संप्रत्ययात्मिका अन्यस्मिन् विषये नान्योयं किंत्वहमे ३३
वेति विपर्ययाति का प्रीतिकारणं यत्र या बुद्धिर्भवति सा तज्जा प्रीतिः संप्रत्ययात्मिका प्रत्यक्षा लोकतः सिद्धा या प्रीतिर्विषयात्मिका या प्रीतिः स्वगादौ

प्रत्यक्षा स्वमनोवेद्या लोकतः सिद्धा सार्वलौकिकी विषयात्मिका प्रीत्यादिशब्दानां सुखे शक्तिः नन्दे तु वृत्तिविशेषे लक्षणोत्साह प्रधानफलवत्त्वा
त्स्यात्तदर्थाश्चेतराः अपि तदर्थाः प्रधानजनकाः इतराः रागादिवृत्तिविशेषाः अपि प्रधानफलवत्त्वात् सुखप्रीतिसंबंधात् प्रीत्यादिशब्दवाच्या भवंती
त्यर्थः एताः प्रीतीः परामृश्य शास्त्रतः शास्त्रलक्षणाः यो यथा वर्धनेभावस्तं तथैव प्रयोजयेत् एतावतैव युक्तानां व्याख्यातं सांप्रयोगिकं मंदाना
मवबोधार्थं विस्तारेणातः प्रवक्ष्यते युक्तानां कुशलानां एतावतैव उक्तमात्रादेव व्याख्यातं व्याख्यातप्रायं अवबोधार्थं सम्यक्ज्ञानाय अतः द्वितीयाध्या
यप्रभृति इति श्रीवात्स्यायनसूत्रवृत्तौ द्वितीये धिकरणे प्रथमोध्यायः १ एवं प्रथमे प्रधानं निरूप्य उपजीवकत्वसंगत्यात् तदंगान्याह संयोगांगं चतुः
षष्टिरित्याचक्षते संप्रयोगस्य उक्तस्य अंगत्वं परोद्देशप्रवृत्तत्वात् इति विषयत्वं चतुःषष्टिशब्दार्थमतभेदानाह चतुःषष्टिप्रकरणत्वाच्छास्त्रमि
दं चतुःषष्टिरित्याचार्यवादः चतुःषष्टिप्रकरणं नियमितं तच्छास्त्रं कामशास्त्रं कलानां च चतुःषष्टित्वात् तासां च संप्रयोगांगभूतत्वात् कलास
मूहो वा चतुःषष्टिरिति कलानां च वक्ष्यमाणानां ऋचां दाशतीयानां संज्ञितत्वादिहापि तदर्थसंबंधात् पंचालसंबंधाच्चापि बहुचैरेषा पू
जार्थं संज्ञा प्रवर्तितेत्येके दाशतीयानां अन्यविशेषस्यार्थो ऋचां अर्थानुसारि पादव्यवस्थानम् अंत्रविशेषाणां संज्ञितत्वात् दाशतीयसंज्ञा
दर्शनात् इहापि तदर्थसंबंधात् यत्किंचिदर्थबोधनात् पांचालसंबंधात् पांचालीधीतत्वसाम्यात् एषा चतुःषष्टिरूपा संज्ञा पूजार्थेमा

हास्यस्तननार्थं आलिंगनचुंबनदशननखछेद्यसंवेशनसीत्कृतपुरुषायितौ परिष्टकानामष्टधा विकल्पभेदादष्टावष्टकाश्चतुःषष्टिरिति बाभ्रवी
याः दशननखछेद्यं दशनछेद्यं नखछेद्यं च सीत्कृतं चापि विशेषः पुरुषायितं पुरुषवदाचरणं औपरिष्टकं वक्ष्यमाणं अष्टधा विकल्पभेदात्
प्रत्येकमष्टविधालिंगनाद्यवांतरविशेषैः विकल्पवर्गाणामष्टानां न्यूनाधिकत्वदर्शनात् प्रहणनविकृतपुरुषोपसृप्तचित्ररतादीनामन्येषामपि व
र्गाणामिह प्रवेशात् प्रायोवादोऽयं यथा सप्तपर्णो वृक्षः पंचवर्णो बलिरिति वात्स्यायनः आलिंगनाद्यष्टानां तदवांतरवर्गाणां मध्ये केषांचिद्वक्ष्यमा
णारीसाकेषु चित्ररतभावेन प्रहणनादीनां वक्ष्यमाणलक्षणानां प्रवेशेन न्यूनाधिकत्वसंपत्तेः यथा न्यूनाधिकपर्णेष्वपि सप्तपर्णशब्दः न्यूनाधि
कवर्णेऽपि बल्यादौ पंचवर्णशब्दः रूढः तथा आलिंगनादिषु चतुःषष्टिशब्दोऽपि अत्र रतं द्विविधं गुह्येंद्रियजं इतरेंद्रियजं च द्वितीयमालिंगनादिभेदे
नानेकविधं पुनरपि द्विविधं प्रथमरतवत्कालिकं तदधिकत्वेऽकं चतत्र द्वितीयं चतुर्विधमित्याह तत्रासमागतयोः प्रीतिलिंगद्योतनार्थमालिंगनचतुष्टयं
स्पृष्टकं विद्धकं उद्धृष्टकं पीडितकमिति तत्र आलिंगनरतेषु मध्ये असमागतयोः पूर्वमसंयुक्तयोः यूनोः प्रीतिलिंगद्योतनार्थं प्रीतिरनुरागस्तल्लिं
गं ज्ञापकं गाढालिंगनं तस्य द्योतकं आलिंगनचतुष्टयं उच्यते तान्येवाह स्पृष्टकमित्यादिना सर्वत्र संज्ञार्थेनैव कर्मातिदेशः सर्वत्र स्पृष्टकादौ संज्ञार्थे ३५
नैव अन्यार्थगमनव्याजेनैव कर्मातिदेशः आलिंगनाद्यभिनयज्ञापनं भवतीति निर्दिशयति संमुखागतायां प्रयोज्यायामन्यापदेशेन गच्छतो गात्रेण

गात्रस्य स्पर्शनं स्पृष्टकं प्रयोज्यायां नायिकायां संमुखागतायां यत्किंचिद्व्याजेन स्वाभिमुखमभिगम्यमानायां स्त्यां ईषत्स्पर्शनं स्पृष्टकं प्रयोज्यं स्थि
तमुपविष्टं वा विजने किंचिद्गृह्णंती पयोधरेण विध्येन्नायकोऽपि तामवपीड्य गृह्णीयादिति विद्धकं प्रयोज्यं नायकं विद्धकं ईषद्वेधनं तदुभयमन
तिप्रवृत्तसंभाषणयोः तदुभयं तु तद्द्वयं प्रतिगोष्ठीरहितयोः भवति अनेनाग्निमद्वयं संगोष्ठिकयोरिति गम्यते तमसि जनसंबाधे विजनेऽपि वितम
सि जनसंबाधे अनतिद्रुतकालं यत्किंचित्कालं उद्धर्षणं स्पष्टसंघर्षणं तदेव कुड्यसंदेशे स्तंभसंदेशे वा स्फुटमवपीडयेदिति पीडितकं कुड्या
संदेशे वेति च संदंशायमाने कुड्यादौ तदेव स्वगात्रेण तद्गात्रमेव पीडयन्नाक्षीपीडितकं तदुभयमवगतपरस्पराकारयोः तदुभयं युग्मद्वयं अवगतपर
स्पराकारयोः विज्ञातपरस्परेंगितयोर्भवति संप्रयोगरहितसंबंधालिंगनचतुष्टयमुक्त्वा तत्कालिकं चतुष्टयमाह लतावेष्टितकं वृक्षाधिरूढकं ति
लतंडुलकं क्षीरनीरकमिति चत्वारि संप्रयोगे लतावेष्टितकं लतेवावेष्टनं वृक्षः इवाधिरोहणं वृक्षाधिरूढकं तिलतंडुलयोरिवाविस्पष्टयोगात्तिल
तंडुलकं नीरक्षीरयोरिवाविस्पष्टसंयोगः नीरक्षीरकमिति लतेव शालमावेष्टयंती चुंबनार्थं मुखमवनमयेत् उद्धृत्य मंदसीत्कृता तमाश्रिता वा किंचि
द्रमणीयकं पश्येत् तल्लतावेष्टितकं लतेव नायकमावेष्टयंती परिवेष्टयंती तस्य मुखं अवनमयेत् आकुंचयेत् उद्धृत्य तन्मुखं उन्नमयन् मंदसीत्कृतं आ
श्रितामंदसीत्कृतवती मुखे किंचिद्रमणीयकं पश्येद्वा तल्लतावेष्टितकं भवति चरणेन चरणमाक्रम्य द्वितीयेनोरुदेशमाक्रमंती वेष्टयंती वा तन्य

ष्टासक्तेकत्वाद्द्वितीयेनोरुमवनमयंती देषत्कृतांतःश्वसितकूजिताचुंबनार्थमेवाधिरोढुमिच्छेदितिवृक्षाधिरूढकंआक्रम्यनिर्देश्यद्वितीयेनवा
हुनानावृक्षारोहणंवृक्षाधिरूढकमित्युच्यते तदुभयंस्थितकर्मस्थितयोर्तिष्ठतोःशयनगतावूरूव्यत्यासंभुजव्यत्यासंचससंघर्षमिवघनंसं
स्वजातेतत्तिलतंडुलकंशयनगतोभुजस्य व्यासंचकृत्वाघनंसंघर्षं यथाभवतितथातिलतंवद्धत्पयाश्लिष्टावयववत्वात्तिलतंडुलकंरागांधाव
नपेक्षितात्ययोपरस्परमनुविद्धैवोत्संगगतायामभिमुखोपविष्टायांशयनेचेति क्षीरजलकंउत्संगगतायांशयनेत्वाभिमुखस्थितायांवासत्यां
रागांधोअनपेक्षितात्ययोअनपेक्षितविश्लेषौसंतोअनुविशतइवअन्योन्यशरीरंप्रविष्टाविवस्थितौचेत् ततःक्षीरजलकंतदुभयंरागका
लइत्युपगूहनयोगावाभ्रवीयाः तदुभयंअनंतरोक्तद्वयंरागकालेरागोदयानंतरंभाविशयनकालेकर्तव्यंउपगूहनमालिंगनंसुवर्णनाभस्यल
धिकमेकांगोपगूहनचतुष्टयंसुवर्णनाभस्यमतेतुएकांगोपगूहनंएकैकांगस्पर्शकृतविदः एकैकांगेनानेनैवालिंगनमधिकंउक्तम् तत्रोरुसंदं
शेनैकमूरुमूरुद्वयंवासर्वप्राणंपीडयेदित्युपगूहनंतेषुमध्येऊरुसंवेशनंनसंदंशायमानस्वोरुद्वयेनतस्यएकंसर्वप्राणंयावच्छक्तिउपगूहनं
आद्यं जघनेनजघनमवपीड्यप्रकीर्यमाणकेशहस्तानखदशनचुंबनप्रयोजनायतदुपरिलंघयेत्तज्जघनोपगूहनं जघनेनस्वगुरुणाअव
पीड्यसंघृष्यप्रकीर्यमाणाःव्याप्ताःनखदशनंतच्छेदनंतदुपरिणां नायकापरिलंघयेत् आरोहेत् स्तनाभ्यामुरः प्रविश्यतत्रैवभाव

मावेशयेदितिस्तनालिंगनं प्रविश्यगाढंनिपीड्यतत्रैवउरःसंश्लेषएवभावंप्रीतिंआवेशयेत् पर्यवसाययेत् मुखेनमुखमासज्याक्षिणीअक्ष्णोर्ल
लाटेनललाटमाहन्यात्साललाटिकेति आंसज्यसंयोज्यतत्रापिअक्षिणीसंयोज्यआहन्यात् अभिघातयेत् संवाहनमप्युपगूहनप्रकारमित्येकेम
न्यंते संवाहनंनायकपादमर्दनाद्युपचारःप्रकारोविशेषःसंस्पर्शनत्वात्स्थकालत्वाद्भिन्नप्रयोजनत्वादसाधारणत्वान्नेतिवात्स्यायनः संस्प
र्शत्वात्संवाहनस्योपगूहनापेक्षयाविजातीयसंयोगरूपत्वात्पृथक्कालत्वात्नायिकानुरागेसतिहेतुतयाप्राथमिकत्वात्अतएवभिन्नप्रयो
जनत्वात्असाधारणत्वात् सर्वेषांपाक्षिकत्वादितियावत् नसंवाहनस्योपगूहनांतर्भावइतिशेषःप्रयोजनभेदमेवाहपृच्छतांश्रृण्वतांचापित
थाकथयतामपि उपगूहविधिंकृत्स्नंरिरंसाजायतेनृणां येप्यशास्त्रिताःकेचित्संयोगारागवर्धनाःआदरेणैवतेप्यत्रप्रयोज्यास्सांप्रयोजिके
अशास्त्रिताःशास्त्रानुक्ताःरागःप्रीतिःसंयोगाःआलिंगनविशेषाःयेकेचित्स्युःसांप्रयोगिकेरतेउपयोगित्वेन एवंमंदरागवतांरतास्वूर्वंतदुपयोगित्वे
नानेकविधाश्लेषानुक्त्वाउत्कटरतानुरागवतांतुनैवंक्रमनियमइत्याह शास्त्राणांविषयस्तावद्यावन्मंदरसानराः रतिचक्रेप्रवृत्तेतुनैवशास्त्रंनच
क्रमः मंदरसाःमंदानुरागिणःरतिचक्रेउत्कटरागस्तुधात्सिंधौप्रवृत्तेनिमज्जनेसतिशास्त्रंशास्त्रोक्तालिंगनादिकंक्रमस्तत्क्रमश्चोक्तोनेत्यर्थः इति
श्रीवात्स्यायनसूत्रवृत्तौनरसिंहकृतौद्वितीयेधिकरणेद्वितीयोध्यायः २ एवमालिंगनान्युक्त्वाएककार्यकारित्वसंगत्याचुंबनादिक्रियाः क्रमेण

वा०सू० निरूपयिष्यन् तासामपि प्रधानतत्पूर्वकालिकत्वाच्चुंबनस्यावस्थामाह चुंबननखदशनच्छेद्यानामनपौर्वापर्यमरागयोगात्प्राक्संयोगा
३६ देषां प्राधान्येन प्रयोगः प्रहणनसीत्कृतयोश्च संप्रयोगे सर्वे सर्वत्र रागस्यानपेक्षितत्वादिति वात्स्यायनः पौर्वापर्यं परस्परमिति शेषः कुतः राग
योगात् अनुरागोत्केरस्यात् प्राधान्येन प्रायशः संप्रयोगे तत्काले प्रयोग इत्यनुषज्यते अव्यवस्थामाह सर्वे उपगूहनादि सर्वत्र अव्यवस्थया कुतः अ
नपेक्षितत्वात् क्रमानपेक्षितत्वात् तानि प्रथमरते व्यक्तानि त्वरितं विकल्पेन प्रयुंजीत तथाभूतत्वाद्रागस्य प्रथमरते अभिनवनायिकासंप्र
योगविषये तानि नखदशनच्छेद्यादीनि अव्यक्तानि अस्फुटानि त्वरितं परिमितं च यथा तथा विकल्पेनानियमेन प्रयुंजीत तथाभूतत्वात् सर्वसमुच्च
यानपेक्षितत्वात् प्रौढत्वादिति शेषः ततः परमत्वरया विशेषवत्समुच्चयेन रागसंधुक्षणार्थं ततः परं प्रथमसंप्रयोगानंतरं क्रमेण काल
क्रमेण नखच्छेद्यदशनादीनि रागसंधुक्षणार्थं रागोत्कस्यायम् अत्वरया अमितानि विशेषवन्ति अभिव्यक्तानि समुच्चये मसंप्रयुंजीत सनुषज्य
ते कुर्यादित्यर्थः तत्र चुंबनान्याह ललाटालककपोलनयनवक्षःस्तनौष्ठांतर्मुखेषु चुंबनं ऊरुसंधिबाहुनाभिमूलयोरपि लाटानां रागवशाद्देशप्र
वृत्तेश्च संति तानि तानि स्थानानि न तु सर्वजनप्रयोज्यानीति वात्स्यायनः ललाटालकं ललाटदेशः ऊरुसंधौ ऊरुजघनसंधौ बाहुमूले ३६
नाभिमूले च लाटानां तद्देशीयानां चुंबनं प्रसिद्धमिति शेषः एवं रागवशात् देशप्रवृत्तेः तत्तद्देशाचाराच्च स्थानानि सीमंतादिस्थानानि चुंब॰

नेशिष्टानि सर्वजनप्रयोज्यानि सार्वजनीनानि चुंबनविशेषानाह तद्यथा निमितं स्फुरितं घट्टितमिति त्रीणि कन्याचुंबनानि निमितं अप्रसंदनेस्फु
रितं यत्किंचित् स्पंदनं घट्टितं पीडनं कन्या मुग्धा विश्रंभयति बलात्कारेण नियुक्ता मुखे मुखमाधत्ते न विचेष्टत इति निमितं बलात्कारेण ना
यकेन नियुक्ता कारितेन संप्रयुक्ता सती मुग्धा मुखे नायकस्य मुखं तस्याः चेष्टते चुंबनाय इति अप्रव्याप्तेः वदने प्रवेशितमोष्ठं मनाक् अपत्रपावशान्न ही
तुमिच्छंती स्पंदयति स्वमोष्ठं नोत्तरमुत्सहत इति स्फुरितं ओष्ठं नायकस्य अवगृह्य चुंचुंवितुमिच्छंती सती अपत्रपातद्दृष्टी च सती मनाक् ईषत
संऽऽष्ठं स्पंदयति यत्किंचिद्ग्रहणाभिव्यक्तेरिति शेषः रागोद्रेकात् उत्तरं चुंबनकर्मनोत्सहते न करोतीति स्पंदनं स्फुरितमित्युच्यते ईषत्सरागस्य वि
निमीलितनयना जिह्वाग्रेण घट्टयित्वा समं तिर्यग्वृत्तं पीडितमवपीडितं निर्देशनमवपीड्येदिति अवपीडितकं पंचममपि करणं परिगृह्य स्वकरा
ग्रेण अधरपल्लवमिति शेषः विनिमीलितनयना विशेषेणामीलितनयना सती स्वजिह्वाग्रेण तत् ईषत् घट्टयित्वा पंचममपि पंचविधमपि क
रणं कुर्यादित्यर्थः तदेवाह समं अभिसादिनां समं ऋजुनया तिर्यक्वलितं रन्ध्रो न तया उद्भ्रांतं भ्रमराकारेण पीडितं सदशनमर्दनं अवपीडितं नि
र्देशनमर्दनं पंचमं विनिर्गतोऽतिनिर्देशनं दशनावमर्दनरहितं यथा तथा इति अवपीडनं अवपीडितमित्युच्यते द्यूतं च तत्र प्रवर्तयेत् पूर्वमोष्ठ
वा०सू० संपादनेन जितमिदं स्यात् यदि मया जितं स्यात् पूर्वं प्राप्ताऽऽष्ठसंपादनेन ओष्ठचुंबनेन स्यात् भवितव्यं इति पणं कृत्वा तत्र चुंबननिमित्तं पूर्वं

वा॰सू॰ द्यूतं प्रवर्तयेत् तत्र जिता सा सरुदितं यथा तथा प्रणुदेत् स्वसमीपात् निवर्तयेत् पराङ्मुखीभवेत् आहूता आक्रुष्टा विवदस्व मे वाह पु
३० नरप्यस्तु पण इति ब्रूयात् पणः पणनिमित्तकद्यूतं तत्रापि जिता द्विगुणमायस्येत् तत्रापि द्वितीयद्यूते पि द्विगुणं पूर्वापेक्षया आयस्येत्
सा स्त्री रोदनादिकं कुर्यात् इति विस्रब्धस्य प्रमत्तस्य वा धरमवगृह्य दशनानां निर्गतमनिर्गतं वा कलहं सेत् क्रोशेत् तर्जयेत् विस्रब्धस्य नियमितो दृ
श धृतौ तिविश्वास वतः प्रमत्तस्य कार्यान्तरव्यापृतस्य वा अधरमवगृह्य स्वकरकमलेन ततः स्वदशनान्तर्गतं अनिर्गतं निष्कासनाशक्यं च कृत्वा
हसेत् नायकं पीडयात् तर्जयेत् तस्मिन्विशेषः अनर्तितभ्रूलता चलितलक्ष्मपनेन मुखेन हसन्ती तानि तानि च ब्रूयादिति चुंबनद्यूतकलहः विह
सन्ती हसन्ती वृत्तानि तानि तत्कृतनखव्रणादिदूषणानि ब्रूयात् शनकैरिति शेषः चुंबनानि तन्निमित्तद्यूतकलहौ चोक्तौ एतेन नखदश
नच्छेद्यप्रहणनद्यूतकलहा व्याख्याताः एतेन चुंबनद्यूतकलहकथनेन छेद्यं छेदनं परस्परं नखच्छेदनदशनच्छेदना हताड़नानि च एत
न्नापरस्परहेतुद्यूततत्कृतनिमित्तकलहाश्च व्याख्याता प्रायहत्यर्थः चण्डवेगयोरेव तु तेषां प्रयोगस्तत्सात्म्यात् तस्यां चुंबनसामेवात्तरंग ह्लीयादि
स्वतरोष्टंरागदीपनं चण्डवेगयोः उत्कृष्टरागवतोः एतोः सात्म्यात् समानस्वाभाव्यात् चण्डवेगसाम्यहेतोः ततस्मिन्संप्रयोगकाले नेष्टं प 30
दीकि परस्परचुंबनादीनां प्रयोगः अनुष्ठानं स्यात् एवंखी कर्णकंचुंबनमुक्तापं कर्णं कंतदा हतस्यां प्रवृत्तास्यायां चुंबनसामेव त्वोष्टंगृहीला

चुंबयांसस्वामिवस्यामुत्तरं तदीयोत्तरोष्टं गृह्णीयात् कुतः उत्तरोष्टं नकालेनदुत्तरोष्टचुंबनं तस्याः रागदीपकं इति हेतो ओष्ठसंदंशेनावपत्यो
ष्ठद्वयमपि चुंबेदिति संपुटकं स्त्रियाः पुंसो वा अजातव्यंजनस्य अजातव्यंजनस्य जायमानश्मश्रुणः पुनः ओष्ठद्वयं स्त्री त्वस्या ओष्ठद्वयं पुमान्एवा च
ओष्ठसंदंशेन संदंशाकारस्य स्वौष्ठद्वयेन क्रमेण वा तस्य चुंबेत् इत्येतत् संपुटाख्यं चुंबनं तस्मिन्नितरो पि जिह्वयास्या दशनान् घट्टयेत् ताल्वजिह्वां चेति जि
ह्वायुद्धं इतरः नायकः अपेक्षापितस्मिन्संपुटके जिह्वया स्वकीतया तस्याः तस्य च दशनान् तालु तत्रत्वां जिह्वां जिह्वां वा घट्टयेत् अप्रमत्ता तत्र एतेन बलाद
दनरदनमहरणं दानं च व्याख्यातं एतेन संपुटकथनेन बलात् नायिकाया वदनस्य कपोलयोः रदनानां रदनच्छदयोश्च ग्रहणं चुंबितुमिति शेषः
दानं स्त्रीयवदनरदनच्छदयोः तस्मै समं पीडितमंचितं मृदु शेषांगेषु चुंबनं स्थानविशेषादिति चुंबनविशेषाः शेषांगेषु अष्टातिरिक्तपर्श्वीकस्या
नेषु स्थानविशेषानुगुण्येन अंचितं तद्देशस्पर्शनं मृदु पीडनं विनाक्षणकस्पर्शनं पीडितं दर्शनादिभिः पीडितं समं अनतिपीडनं इति चतुर्विधं चुंबनं इति द
शस्थलेषु चुंबनविशेषा उक्ताः सुप्तस्य मुखमवलोकयंत्याः भिप्रायेण चुंबनं सुप्तस्य कृत्रिमस्वापवतः कर्तरिषष्ठी तत्कर्तृकं मुखं तन्मुखमवलोकयंत्याः
मुखमिति अनुवर्तनेन तत्प्रति स्वाभिप्रायेण स्वानुरागानुगुण्येन चुंबनं रागदीपनं तदा रक्तप्रमत्तस्य विवदमानस्य चान्यतोभिमुखस्य वा निद्राव्याघातार्थे छ
लितकं प्रमत्तस्य अन्यवहितस्य स्थितस्य कर्तरि षष्ठी एवमग्रेपि विवदमानस्य कलहप्रियत्वस्थितस्य अन्यतः अन्यत्र अभिमुखस्य अभिमुखस्येवत

वा॰सू॰ न्मुखमित्यादि सर्वत्रानुवर्तते छलितकं छलितकमथ्यं निशाद्यागतस्य शयने प्रसुप्तायाः स्वाभिप्रायचुंबनं प्रातिबोधिकं शयने शेते नट स्यास्मिन्निति शयने

३८ प्रसुप्तायाः वक्ष्यमाणकृत्रिमस्वापवत्याः संबंधिमुखेनन तात्वा चिरागतस्य कर्तेरि षष्ठी स्वाभिप्रायं स्वानुरागं यथा तथा प्रातिबोधिकं प्रतिबोध

हेतुत्वात् तदाख्यं सापि तु भावजिज्ञासार्थिनी नायकस्यागमनकालं संलक्ष्य कृतकस्तु प्रास्यात् सा नायकस्य भावजिज्ञासार्थिनी भावं तस्याः रागं जिज्ञा

सार्थिनीत्यनुमिच्छंतीसती आगमनकाले प्रतिदिनं स्वगृहं प्रतिनायकागमनकालं संलक्ष्य अयमिति निर्णीय सुप्ता कृतकसुप्ता भवति मुग्धायाश्चुंबन न

प्रदर्शनप्रकारमाह आदर्शे कुड्ये सलिले वा प्रयोज्यायाश्छायायां चुंबनमाकारप्रदर्शनार्थमेव कार्यं आदर्शे कुड्ये दर्पणे तुल्ये छायायां प्रतिबिंबितमुखा

दौ आकारप्रदर्शनार्थं मुग्धायाश्चुंबनप्रकारप्रदर्शनाय बालस्य चित्रकर्मणः प्रतिमायाश्च चुंबनं संक्रांतकमालिंगनं च बालस्य चित्रकर्मणः भित्यादि

लिखितस्त्रियाः प्रतिमायाः कृत्रिमपुत्रिकायाः मुखादौ मुग्धासन्निधौ चुंबनं आक्रांतकं प्रतिसमीपदेशप्रापणं आलिंगनं च कार्यमिति शेषः त

था निशि प्रेक्षणके स्वजनसमाजे वा समीपे गतस्य प्रयोज्याया हस्तांगुलिचुंबनं संविष्टस्य वा पादांगुलिचुंबनं निशि प्रेक्षणके देवतोत्सवादिनि

मित्ते क्षणसमये स्वजनसमाजे विवाहादौ समीपे प्रयोज्यासन्निधिं गतस्य कर्तरि षष्ठी उपविष्टस्य तस्या एव समीपे निषण्णस्य पूर्ववत् षष्ठी संवाहि ३८

कायास्तु नायकमाकारयंत्याः निद्रावशादकामाया इव तस्योर्वोर्वदनस्य निधानम् ऊरुचुंबनं पादांगुष्ठचुंबनं चेति आभियोगिकानि संवाहिकायाः

प्रियपादसेवां कुर्वत्याः तद्व्याजेन रंतुं नायकमाकारयंत्याः अकामायाः लज्जया अकामनोत्सुक्यं स्यात् स्वपित्याः नायिकायाः संबंधि वदनस्य निद्रावशा

त् निद्राव्याजेन तस्य नायकस्य ऊर्वोर्निधानं यत् तदेव चुंबनं च यत् इतितानि चुंबनानि आभियोगिकानि रागोद्दीपकतया संप्रयोगोपकारकाणि मारसम

रसमरसिकयोः क्रीडनमाह कृते प्रतिकृतं कुर्यात् ताडिते प्रतिताडितं करेण न चुंबितेनैव चुंबिते प्रतिचुंबितं कृते नायकेन कपोलमर्दनादौ प्रतिकृतिं सा तदे

व कुर्यात् ताडिते नद्धस्तादिकरणेन ताडने कृते तेनैव करणेन प्रतिताडितं भावेक्षः इति श्रीनरसिंहकृत वात्स्यायनसूत्रवृत्तौ द्वितीयेऽधिकरणे तृतीयो

ध्याय ३ एककार्यकारित्वसंगत्या चुंबनात्पुल्काभ्यंतरंगत्वान्नखक्षतान्याह रागवृद्धौ संघर्षात्मकं नखविलेखनं रागवृद्धौ रागोद्रेके सति यूनोः परस्प

रं नखविलेखनं नखमुखकरणकक्षतविशेषः संघर्षात्मकं भवति तस्य प्रथमसमागमे प्रवासप्रत्यागमने प्रवासगमने च क्रुद्धप्रसन्नायां मत्तायां च प्रयो-

गो न नित्यं चंडवेगयोः तस्य नखक्षतस्य प्रथमसमागमे अभिनवतरुणीसंप्रयोगे रागोद्रेकान्मुखाः प्रयोग इत्यस्मिन्निमित्तान्वयः प्रवासप्रत्यागमे प्रवासात्

दूरदेशात् प्रत्यागमने पुनरागमने सति प्रथमसमागम इत्यनुवर्तते प्रवासगमे स्वस्य तस्या वा देशांतरगमनप्रसक्तौ सत्यां क्रुद्धप्रसन्नायां प्रणयकलहेन क्रु

द्धा सती प्रार्थनया प्रसन्ना तस्यां मत्तायां रागोद्रेकवत्वं च नित्यं प्रतिदिनं न तस्य प्रयोगः चंडवेगयोः इति हेतुगर्भविशेषणं यतो ऽन्यत्र तु द्विकरणो भयतः

तथा दशनच्छेद्यस्य सात्म्यवशाद्वा तथा नखक्षतस्येव दशनच्छेद्यस्य दंतक्षतस्यापि एतावेव कालाविज्ञेयः सात्म्यवशात्सात्म्यं समानखमावतता

का०सू० उभयोरप्यसंतरागोद्रेकहेतुत्वात्तियावत् तद्वशात् नियममपि नखदशनक्षतयोः प्रयोगं दर्शयन्नखक्षतानांतरभेदानाह आच्छुरितकं अर्धचंद्रो मं
३९ डलं रेखा व्याघ्रनखं मयूरपदकं शशप्लुतकमुत्पलपत्रकमिति रूपतोऽष्टविकल्पं आच्छुरितकादीनेवक्ष्यमाणलक्षणानि रूपतः आकारभेदेनाष्ट
ष्टविकल्पमष्टविधं नखक्षतमिति शेषः तस्य स्थानान्याह कक्षौ स्तनौ गलः पृष्ठं जघनमूरू च स्थानानि प्रवृत्तरतिचक्राणां न स्थानमस्थानं वावि
द्यत इति सुवर्णनाभः प्रवृत्तरतिचक्रास्य कक्षं जघनमूरू च स्थानानीति प्रवृत्तरतिचक्राणां न स्थानं रागोद्रेकादिति शेषः न स्थानं नोक्तस्थानगवेषणं अ
स्थानं अनुक्तस्थानत्यागः तत्साधनं नखभेदान्देशभेदेनाह तत्र सव्यहस्ते प्रत्यग्रशिखराणि द्वित्रिशिखराणि चंडवेगयोर्नखानि स्युः तत्र क्षतवि
षये साधनानि चंडवेगयोः असंतानुरक्तयोर्यूनोः सव्यहस्ते वामकरे प्रत्यग्रशिखराणि पार्श्वकृत्तनेन तीक्ष्णीकृतानि द्वित्रिशिखराणि मध्यकृंतनादने
काग्राणि अनुगतराजिसमसमुज्ज्वलं समलिनमविपाटितं विवर्धिष्णु मृदु स्निग्धदर्शनमिति नखगुणाः अनुगतराजि अनुगतेन एकाकारेण राजते इ
स्यनुगतराजिभावप्रधानो निर्देशः एवमन्येपि समं अप्रतिलोम्नताग्रं उज्ज्वलं सकाशं समलिनं नीलादिरंजितं अविपाटितं अनिकृंतं अत एव विव
र्धिष्णु मृदु स्निग्धदर्शनं मसृणं यथा तथा दृश्यमानं एतेन नखगुणाः देशभेदेन तेषां गुणभेदमाह दीर्घाणि हस्तशोभीन्यालोके च योषितां चित्तग्रा ३९
हीणि गौडानां नखानि स्युः हस्तौ शोभयंतीति हस्तशोभीनि गौडानां नखानि आलोके अवलोकने सति योषितां युवतिमात्रस्य चित्तग्राहीणि मनोहराणि

ह्रस्वानि कर्मसहिष्णूनि विकल्पयोजनासु च स्वेच्छया धारीणि दाक्षिणात्यानां दाक्षिणात्यानां नखानि कर्मसहिष्णूनि क्षतकर्मकुशलानि स्वेच्छया पुरुषे
च्छया विकल्पयोजनासु विकल्पेन एकस्य द्वयोर्वा क्षतार्थं प्रसरणेषु मत्तस्तथैव धारीणि क्षतकारीणि भवंतीति शेषः मध्यमान्युभयभांजि महाराष्ट्रका
णामिति मध्यमानि नातिदीर्घह्रस्वाणि उभयभांजि हस्तशोभित्वकर्मसहिष्णुत्वादि पूर्वोक्तोभयगुणवंति नखानि भवंति पूर्वोक्ताच्छुरितकादेः क्रमेण ल
क्षणान्याह तैः सुनियमितैर्हनुदेशे स्तनयोरधरे वा लघुकरणमनुद्गतलेखं स्पर्शमात्रजननाद्रोमांचकरमंते संनिपातवर्धमानशब्दमाच्छुरितकं तैः सुनियमितैः
सम्यक् प्रयुक्तैः तैर्नखैः करणेनैतेन या हनुदेशे कपोलोपरिदेशे स्पर्शमात्रजननात् अनुद्गतरेखं अनुद्गता अनभिव्यक्ता रेखा येन तत् अंते हन्वादिप्रांते अन्योन्यरो
मांचं पुलकं करोतीति तथा संनिपातवर्धमानशब्दं संनिपातेन तत्स्थलाभिघातेन वर्धमानः उत्सर्पमानः शब्दो येन तथाविधं अत एव लघुसंस्पर्शं करणं
क्षतं आच्छुरितकं नखाख्यं प्रयोज्यायां च तस्यांगसंवाहने शिरसः कंडूयनेपि स्फोटभेदेन व्याकुलीकरणे भीषणे च प्रयोगः तस्य आच्छुरितकस्य प्रयोज्यायां प्र
योगः कार्यः अंगसंवाहने अंगसेवायां निमित्तसप्तमी सर्वत्र कंडूयने कंडुविमोचनेपि स्फोटकंचुकादिग्रंथिः व्याकुलीकरणे अवशात्रोक्षेपकरणे भीष
णे भयजननं स्तुनिमितेषु ग्रीवायां स्तनपृष्ठे च वक्रो नखपदनिवेशोऽर्धचंद्रकः नखपदनिवेशः नखमुखप्रवेशनं अर्धचंद्रकः तदाकारत्वात् ता
वेव द्वौ परस्पराभिमुखौ मंडलं तौ नखसंनिवेशौ परस्पराभिमुखौ चेत् मंडलकं नखाख्यं नाभिमूलककुंदरवंक्षणेषु तस्य प्रयोगः तस्य मंडल

का.सू.
६० स्य नाभिमूले जघनप्रदेशः वक्रं दीर्घं समुखं वक्रं सलेखा स्फुरितं संपयः सर्वस्थानेषु नातिदीर्घा लेखा सर्वस्थानेषु पूर्वोक्तेषु हनुदेशादिषु नातिदीर्घा किं-
चित्तदीर्घा या नखस्य तिः सूचीरेखाख्या सैव वक्रा व्याघ्रनखकं प्रान्तनमुखं सैव रेखा नखकृता प्रान्तनमुखं स्तनमूलमारभ्य चूचुकपर्यन्तं कृता व्या-
घ्रनखाख्यं पंचभिरभिमुखैर्लेखा चूचुकाभिमुखी मयूरपदकं अभिमुखैः परस्पराभिमुखैः पंचभिर्नखैः चूचुकाभिमुखी स्तनमध्ये कृता रेखा तत्संप्रयो-
गश्लाघनाय चूचुके सन्निकृष्टानि पंचनखपदानि शशप्लुतकं तत्संप्रयोगश्लाघनाय चूचुके कृतमात्तोऽशानुमोदाय सन्निकृष्टानि सन्निवेशितानि पदा-
नि भूतानि स्तनपृष्ठे मेखलायां चोत्पलपत्राकृतीनि उत्पलपत्रकं पृष्ठे अधोभागे मेखलापथे तत्स्थाने कृतानि नखपदानि ऊर्वोः स्तनपृष्ठे च प्रवासं
गच्छतः स्मरणीयकं संहताश्चतस्रस्तिस्रो वा लेखा इति नखकर्माणि स्मरणीयकं लक्ष्यतिनस्याः कुर्वेत संहता परस्परं संश्लिष्टाः स्मृजकः रेखा ऊ-
र्वोः स्तनपृष्ठे च प्रवासं गच्छतः पुंसः कर्तव्याः आकृतिविकारयुक्तान्यन्यान्यपि कुर्वीत आकृतिविकारयुक्तानि वक्रत्वाद्याकारविशेषयुक्तानि अन्या-
न्यपि अधिकसंख्याकान्यपि नखकर्माणि स्मृतये कुर्वीतेत्यर्थः विकाराणामानन्त्यादनन्तत्वाच्च कौशलविधेरभ्यासस्य च सर्वगामित्वाद्रागात्मकत्वाच्छे-
दस्य प्रकारानन्त्यो निदर्शयितुमर्हतीत्याचार्याः भेदस्य जात्यैकवचनं भूतानां रागात्मकत्वात् रागविकारानन्त्यात् विकाराणामानन्त्यात् च कौशलवि- ६०
धेः स्वभावकुशलतायाः अभ्यासस्य बहुतररागानुष्ठानस्य सर्वगामित्वात् सर्वत्र सर्वेषां कौशल्यहेतुत्वात् प्रकारान् स्वतावान्तभेदान् प्रदर्शयितुं स-

प्यागन्तुं कोऽर्हतीति न कोपीत्यर्थः यद्वा कश्चतुर्मुखः स एवं विशदयति भवति हि रागे विचित्रापेक्षा वैचित्र्याच्च परस्परं रागो जनयितव्यः वैचक्षण्ययुक्ताश्च
गणिकास्तत्कामिनश्च परस्परं प्रार्थनीया भवन्ति धनुर्वेदादिष्वपि हि कर्मशास्त्रेषु वैचित्र्यमेवापेक्ष्यते किं पुनरिहेति वात्स्यायनः रागे रागाभिव्यक्तिविषये वि-
चित्रापेक्षा भुवनन नखक्षतादिचातुर्यापेक्षा भवति कुतः वैचित्र्यात् नखक्षतादिकर्मणि चातुर्याद्धेतोः परस्परं यूनोः रागो जनयितव्यः रागोद्रेको भवतीय-
तः अत एव वैचक्षण्ययुक्ताः उक्तकर्मणि चातुर्यवत्यः गणिकाः तादृश्यश्च कामिभिः कामिनश्च तादृशीभिः धनुर्वेदादिषु कर्मशास्त्रेष्वपि क्रियाप्र-
धानशास्त्रेष्वपि रागोद्रेकानपेक्षेष्वपि वैचित्र्यं चातुर्यं अपेक्ष्यते लोके तेषामेव भूरिप्रजादर्शनात् इह रागोद्रेकार्थे क्षतादिकर्मणि वैचित्र्यमपेक्ष्यत इति
किं पुनः न तु परपरिगृहीतास्वेवं कुर्यात् परपरिगृहीतास्वेषा वा स एवं नखक्षतादिकं न कुर्यादेव परदारत्वात् प्रच्छन्नेषु प्रदेशेषु तासामनुस्मर-
णार्थं रागवर्धनार्थं च विशेषान् दर्शयेत् प्रच्छन्नेषु परादृश्येषु प्रदेशेषु अनुस्मरणार्थं स्वस्य रागवर्धनार्थं स्वस्मिन् विशेषात् नखक्षतभेदान् द-
र्शयेत् कुर्यात् उक्तार्थे अभियुक्तसंमतिमाह नखक्षतानि पश्यन्त्या गूढस्थानेषु योषितः चिरोत्सृष्टाप्यभिनवा प्रीतिर्भवति पेशला गूढस्थानेषु
वक्षोजादिपृष्ठभागेषु चिरोत्सृष्टापि कालविलम्बितापि अभिनवा असंतोद्भिन्ना पेशला कोमला अन्वयमुक्त्वा व्यतिरेकमाह चिरोत्सृष्टेषु रागेषु प्रीति-
र्गच्छेत्पराभवं रागायतनसंस्मारि यदि न स्यान्नखक्षतं रागायतनसंस्मारि रागायतनयोर्यूनोः संस्मारि संस्मरणकर्तृ नखक्षतं गूढस्थलेषु न स्याद्य-

का.सू. दितदारागेषु रागायतनेषु युवहृदयेषु स्पृष्टेषु चिरकालविस्मृतेषु सत्सु प्रीतिः पराभर्वन्त्यनन्तरं एवं युवत्याः रागोद्रेके हेतुत्वमुक्त्वा यत्नात् तदाह पश्यन्त्या युव
८१ तिं दूरोन्नतच्छिष्टपयोधरां बहुमानः परस्यापि रागयोगश्च जायेत नखोच्छिष्टैः नखाङ्कितौ परस्य पयूनोपि बहुमानः अतिशयितः स्तनयोर्द्वयोरधः ततो रागो
द्रेकश्च पुरुषस्यानितान्यप्येतानि दृश्यानीत्याह पुरुषश्च प्रदेशेषु नखचिह्नैर्विचित्रितः चित्रं स्थिरमपि प्रायश्चलयं स्त्रियो चित्तः प्रदेशेषु नाभिमूलादि
षु नखचिह्नैः नखक्षतैः चित्रं अनुरागं स्थिरं दृढं युवत्या करोतीयोषित्तः अभिप्रायं अंतः करणं चलयति स्खलितं अनुरक्तं च नातः परतरं किंचिद्रति
रागविवर्धनं नखदशनसमुत्थानां कर्मणां गतयोपथा कर्माणि क्षतानां गात्रयोर्योगाः यथा रागविवर्धकाः रागोद्रेचकाः तथा अतः उक्तक्षतात् पर
तरं अन्यत् वर्धनं वर्धकं नास्तीत्यर्थः इति श्रीभास्करनरसिंहशास्त्रिविरचितवात्स्यायनसूत्रवृत्तौ द्वितीयाधिकरणे चतुर्थोऽध्यायः ५ पूर्वेण संगसैव दं
तक्षतान्याह उत्तरोष्ठमन्तर्मुखं नयनमिति मुक्त्वा चुंबनवद्दशनच्छेद्यस्थानानि चुंबनवत् चुंबनस्येव ललाटादीनि सप्रदेशस्थानानि समाः स्निग्धच्छाया
रागग्राहिणो युक्तप्रमाणा निश्छिद्रास्तीक्ष्णाग्रा इति दशनगुणाः समाः समतामानसर्वत्रभावप्रधानो निर्देशः स्निग्धच्छायाः मसृणकांतिः रागग्राहिणः
रागाभिव्यंजकत्वं युक्तप्रमाणाः अनतिवैपुल्यात्स्व अनिच्छिद्राः परस्परमध्यच्छिद्ररहितसंतीक्ष्णाग्राः अग्रे तैक्ष्ण्यं इति एते पंच कुंठा राज्युद्गताः परुषा ८१
विषमाः श्लक्ष्णाः पृथवो विरला इति दोषाः कुंठाः अग्रभागच्छेदेन वैषम्येण राज्युद्गताः मसृणकांतिराहित्यं परुषाः अत एव पारुष्यं विषमाः मत्लाव

च्छेदेन वैषम्यं रागानभिव्यंजकत्वमिति यावत् श्लक्ष्णाः कार्कश्यमौन्नत्याभावः पृथुता वैपुल्यं अनेन युक्तप्रमाणाभावः तीक्ष्णाग्रत्वाभावश्च सूचितः
विरलाः सच्छिद्रता दोषाः दशनानां गूढकमुच्छूनकं बिंदुर्बिंदुमाला प्रवालमणिर्मणिमाला खंडाभ्रकं वराहचर्वितकमिति दशनच्छेद्यविकल्पाः गूढ
काद्यवक्ष्यमाणलक्षणाष्टौ दंतक्षतभेदाः नातिलोहितेन रागमात्रेण विभावनीयं गूढकं नातिलोहितेन अनभिव्यक्तशोणितेन रागेण रक्तवर्णेन विभा
व्यं अत्र मध्ये अष्टौ दंतक्षणां तं गूढत्वाद्गूढकमित्युच्यते तदेव पीडनादुच्छूनकं तदेव दंतक्षतमेव पीडनात् कपालादेरतिशयपक्षेतैः उच्छूनताहेतुत्वादुच्छून
कं तदुभयं बिंदुरधरमध्ये इति तदुभयं गूढकोच्छूनकद्वयं बिंदुर्वक्ष्यमाणलक्षणश्च उच्छूनकं प्रवालमणिश्च कपोले प्रवालमणिर्वक्ष्यमाणलक्षणः क
पोले भवति कर्णपूरचुंबनं नखदशनच्छेद्यमिति सव्यकपोलमंडनानि कर्णपूरः कर्णभरणं चुंबनं चहुंहुंकं वन्द्रावः नखदशनच्छेद्यं तत्क्षतानि अत्र क
र्णपूरादिग्रहणं दृष्टांतार्थं दंतौष्ठसंयोगाभ्यासनिष्पादनात् प्रवालमणिसिद्धिः दंतौष्ठयोः संयोगस्य अभिधानत्वं अभ्यासनिष्पादनात् निश्चलाभ्यासात्
स्थिरीकरणादिति यावत् प्रवालमणिसिद्धिः प्रवालमणिविकस्पसिद्धिः भवति सैव प्रवालमणिरित्युच्यते सर्वस्यमणिमालायाश्च सर्वस्यचवचल्लर्थे सर्व
दशनसंबंधिनीत्यर्थ सिद्धिर्मणिमालायाः मणिमालाकारत्वात् संबंधिनी तदाख्या भवतीत्यर्थः एकदशनक्षतमणिः अनेकदशनक्षतानु मणिमा
ला एवमन्येपि स्वल्पदेशायाश्चत्वचो दशनद्वयसंदंशजा बिंदुसिद्धिः स्वल्पदेशायाः स्वल्पायास्त्वचः अधरगतायाः दशनद्वयसंदंशजात् दशनद्वयमध

वा॰सू॰ ते तथैवं दशनदंशैर्बिंदुतुल्यत्वाद्बिंदुसिद्धिः सर्वैर्बिंदुमालायाश्च सर्वैः उत्तराधरदंशनैः कृतासिद्धिः स्यात् बिंदुमालेव बिंदुमाला तत्संबंधिनी ततएव त
४२ दाख्या तन्मालाद्वयमपि गलकक्षवंक्षणप्रदेशेषु तन्मालाद्वयं मणिबिंदुमालाद्वयं गलकक्षवंक्षणप्रदेशेषु कक्षवाहुसंधिः वंक्षणं पार्श्वभागः ल
लाटे चोभे बिंदुमाला चाऽप्यर्थे मंडलमिव विषमकूटयुक्तं खंडाभ्रकं स्तनपृष्ठ एव विषमकूटयुक्तं न्यूनाधिकदशनाभिघातजन्यं मंडलमिव मंडला
कारं व्रणं खंडाभ्रतुल्यत्वात्तदभ्यं तच्च स्तनपृष्ठ एव भवति स्तनानां पंक्तिसम मणिमालास्थाने हेपी से बिंदुमालायां मंडलाकारत्वे खंडाभ्रकमिति भेदः
संहताः प्रदीर्घा च ह्रीदशनपदरणमपत्यमातस्थाबरह चर्चितं संहताः संश्लिष्टाः प्रदीर्घा अस्थायता न ह्रीत्बहुलाः ताम्रांतरालाः ताम्रशोणं अंतरालं म
ध्यं यासां ताः दशनपदानीदं तस्तनानीर जयः पंक्त्यस्तच्च स्तनपृष्ठ एव कार्यं तदुभयमपि चंडवेगयोरिति दशनच्छेद्यानि तदुभयं मालाखंडाभ्रं स्तनपृष्ठ
कार्यं चेत्सुभयं चंडवेगयोः उत्कटरागयोः नवसंगतयोः भवति विशेषकेकर्णापूरापीडितानां नूलपलाशतमालपत्रे चेति प्रयोज्यागामि सुनखदशनप
दान्याभियोगिकानि विशेषकेति लक्करचनासमये कर्णपुष्पापीडे कर्णयोः पुष्परचितावतंसतिवेशनवेलायां तौ नूलपलाशतत्पूर्वेण कालेन तमालप
त्रेणं उयोरलकल्पनासमये इति उक्तप्रकारेण प्रयोज्यायां छिंतिति दंतीति प्रयोज्यागामीनि स्तनादीनि तेष्वधिकरणेषु पदानि स्तुतानि अभियोगिका ४२
नि संयोगहेतुरागोद्दीपकानि कार्याणि विशेषः देशसात्म्याद्योषितउपचरेत् देशसात्म्यात् देशानुसारात् योषितः तत्र त्वाः उपचारेत् चुंबनाद्युपचार

वतीः कुर्यात् इदमेव विशदयति मध्यदेश्या आर्यप्रायाः शुच्युपचाराश्चुंबननखदंतपदद्वेषिण्यः मध्यदेश्यः आर्यावर्तगाः आर्यप्रायाः सत्व
प्रधानाः अत एव शुच्युपचाराः अनुच्छिष्टक्रीडानुरागाः अत एव चुंबनादिद्वेषिण्यः वाल्हीकदेश्या आवंतिकाश्च रतेषु तासामभिनिवेशः रतेषु तु
रवधारणे परिष्वंगचुंबननखदंतचूषणप्रधानाः क्षतवर्जिताः प्रहणनसाध्यामालव्यआभीर्यश्च चूषणं सच्च ज्ञारस्पर्शनं प्रहणनत्वात्साध्याः कुचादि
मर्दनवश्याः सिंधुषष्ठीनां नदीनामंतरालीया औपरिष्टकसात्म्याः सिंधुषष्ठीनां सिंधुप्रभृतीनां पंच विंसंख्याकानां औपरिष्टकं मुखजघनकर्मतत्र सा
त्म्याः साभिलाषिण्यः चंडवेगा मंदसीत्कृता अपरांतिकालाट्यश्च चंडवेगाः उत्कटरागिण्यः सीत्कृतं जिह्वातालुसंयोगजो ध्वनिविशेषः दृढप्रह
णनयोगिन्यः खरवेगा एव अपद्रव्यप्रधानाः स्त्रीराज्ये कोसलायां च प्रहणनं संमर्दनं खरवेगाः प्रचंडरागाः अपद्रव्यं अभ्रस्थव लु स्त्रीराज्ये कामरूपे प्र
कृत्या मृद्व्यो रतिप्रियाः अशुचिरुचयो निराचारा आंध्र्यः अशुच्यौ चुंबनादौ सकलचतुःषष्टिप्रयोगग्राहिण्योऽश्लीलपरुषवाक्प्रियाः शयने च सरभसोप
क्रमा महाराष्ट्रिकाः सकलाः समस्ताः चतुःषष्टिप्रयोगेषु अष्टाष्टकप्रयोगेषु रागो यासां सरभसो वेगः तथाविधा एव रहसि प्रकाशंते नागरिकाः तथावि
धाः चतुःषष्टिकलारागाद्विमसनागरिकाः गूर्जर्यः मृद्यमानाश्चाभियोगान्मंदं मंदं प्रसिंचंति द्रविड्यः मृद्यमानाः कुचाद्यवच्छेदेन अभियोगात् रतात्
निमित्तपं चमी प्रसिंचंति रज्यंते मध्यमवेगाः सर्वसहाः स्वांगप्रच्छादिन्यः परांगहासिन्यः कुत्सिताश्लीलपरुषपरिहारिण्यो वानवासिकाः मध्यमवेगाः

वा०सू० मेदरागिण्यः सर्वंसहाः नखदंतक्षतसहनशीलाः अपरांतकाः कुत्सितरूपो अश्लीलः अनलंकृतः वानवासिकाः यवन्यः मृदुभाषिण्योऽनुरागवत्यो
५३ मृद्व्यंगयष्ट्यो गौड्यः अनुरागवत्यः प्रवं उरागिण्यः देशसात्म्यात्प्रकृतिसात्म्यं बलीय इति सुवर्णनाभः सात्म्यं स्वभावः प्रकृतिरंतः करणं न तत्र देश्या उप
चाराः अतः तत्र स्त्रीयोग्यप्रकृतौ देश्यादेश्ययोग्या उपचाराः स्तादयो न कालयोगाः देशाः देशांतरसुपचारं वेषलीलाश्चानुगच्छंति तत्र विद्यात् देशात् जन्मदे
शात्कालयोगात्कालवशात्देशांतरं अन्यदेशं गच्छंतं प्रकर्षं प्रियं वा सामान्यतः अनुअनुरूपउपचारं वेषलीलाः जन्मदेश्ययुचुंबनादिसहनवस्त्राद्य
लंकरणचाश्रुविलासः चातत्वाग्विलासाश्च गच्छंति प्रायांतिप्रतः तासां तेषां च तत्र जन्मदेश्योपचारादिकं विद्यात् कुर्यात् तुष्ट्ये आलिंगनादिषु च
रागवर्धनं पूर्वं विचित्रमुत्तरमुत्तरं च आलिंगनादिषु दशनक्षतं तेषु मध्ये पूर्वं पूर्वं दशनक्षतान्नखक्षतमित्यादि रागवर्धनं रागोद्दीपकं उत्तरमुत्तरं
आलिंगनाच्चुंबनादिकि विचित्रं चित्ररसजनकं भवति च शब्दाच्छोभाकरं एवं सामान्यतः क्षतान्युक्त्वाथ रूपप्रयोज्यविशेषानाह वार्यमाणश्च पुरुषो य
त्कुर्यात्तदनुक्षतं अमृष्यमाणा द्विगुणं तदेव प्रतियोजयेत् वार्यमाणश्च पुरुषो यत् हात्तान्निषेध्यमानोपि बलात्कारेणयत् दशनादिक्षतं यत्र याद्दशंक
रोति तत्क्षतमसहमानासती तदेव क्षतं द्विगुणं द्विरावृत्तं कुर्यात् तदेवाह बिंदोः प्रतिक्रियामाला मालायाश्चाभ्रखंडकं इति क्रोधादिकविघ्वाकलहान्प्रति ५३
योजयेत् बिंदोः स्तनपृष्ठादौ युवतः कृतस्य प्रवालमणिश्चमालायुवत्या बिंदुमाला प्रवालमाला च एवं गंडकस्य उच्छूनकं प्रतिक्रियाकार्या मालायुवकृतायाः

उभयविधायाः क्रमेणाभ्रकं खंडाभ्रकं चाहराह चर्वितकं कुर्यात् इति एवं क्रोधात् क्रोधेन आविश्येव कलहान् कृतप्रतिकृतौः उक्तार्थे अभियुक्तोक्ति
माहसकचग्रहमुन्नम्य मुखं तस्य ततः पिबेत् निमीलयेद्दशेच्चैव तत्र तत्र मदेरिता शिखां गृहीत्वा निमीलयेत् नेत्रे दशेत् दशनक्षतानि कुर्यात् तत्रक
लहप्रशमनस्थले मदेरिता मत्ता उन्नम्य कंठं कांतस्य संश्रिता वक्षसः स्थले मणिमालां प्रयुंजीत यच्चान्यदपि लक्षितं लक्षितं अभिमतं बिंदुमालादि दि
वापि जनसंबाधे नायकेन प्रदर्शितं उद्दिश्य स्वकृतं चिन्हं हसेदन्यैरलक्षिता जनसंबाधे जनसंमर्दस्थले दिवापि तस्मिन् स्वकृतं चिन्हं नखक्षतादि उ
द्दिश्य स्वां प्रदर्शितं नायकेन प्रदर्शितं च तेन दृष्ट्वा तेन सहान्यैरलक्षिता सती हसेत् विकूणयंतीव मुखं कुत्सयंतीव नायकं स्वगात्रस्थानि चिन्हानि सासूये
व प्रदर्शयेत् नायकं कुत्सयंतीव निंदंतीव मुखं ग्रीवां विकूणयंतीव ईषन्मुकुलयंती स्वगात्रस्थानि तत्कृतानि चिन्हानि क्षतानि समसूयेव तद्दौर्भल्यात्सस
यंतीव प्रदर्शयेत् तस्मै फलमाह परस्परानुकूल्येन तदेवं लज्जमानयोः संवत्सरशतेनापि प्रीतिर्न परिहीयते तत्तेषां क्षतानां एवं परस्परप्रदर्शनेन पर
स्परानुकूल्येन वर्धितपरस्परागेण लज्जमानयोः परस्परं ह्रीमतोर्यूनोः संबंधिनी प्रीतिः संवत्सरशतेनाप्यायव्यवधानेपि न परिहीयते न नश्यति इति
श्रीकविपदसमानतत्वरत्नभास्करनरसिंहशास्त्रिकृतवात्स्यायनसूत्रवृत्तौ द्वितीयाधिकरणे पंचमोध्यायः ५ एवं पूर्वांगकलापमुक्त्वा प्रधानं वक्तुमुपक्र
मते रागकाले विशालयंत्येव जघनं मृगी संविशेदुच्चरते मृगी उक्तलक्षणा रागकाले रागोद्रेके सति उच्चरत एव उपरिस्थे रत एतज्जघनं लिंगं विशालयंती

वा॰सू॰ विकासयंतीसतीसंविशेत् कुक्कुटासनेन अवह्रासयंतीवहस्तिनीनीचरते इत्यवधारणेनीचरतएवस्वस्यामधःस्थितायांकृतरतएवअवह्रासयंतीसंकोच
४७ यंतीएणकालेसंविशेदित्युपजायते न्याय्योयत्रप्रयोगस्तत्रसमपृष्ठका यत्रयदासमतयाप्रयोगः पार्श्वेस्थितयोःसंप्रयोगोन्याय्योभवतीत्यर्थः समपृष्ठकावै
पुल्यह्रासाकर्त्रीनिवसेत् मृगीहस्तिनीवा ग्राम्यौवडवाव्याख्याता ग्राम्यामृगीहस्तिनीभ्यांअयंभावः मृगीउपरिस्थरतएवविशालयेत् नतुनीचेहस्तिनीतु
नीचरतएवसंकोचयेत् नतुपीवडवातुउपरिरतेमृगीवविशालयेत् अधोरतेहस्तिनीवसंकोचयेत् पार्श्वेरतेतुतिस्रणामपिसंकोचविकासनाभावस्तुस
इति तत्रजघनेनायकंप्रतिगृह्णीयात् अपद्रव्याणिचसविशेषनीचरतेतत्रनीचपार्श्वोपरिरतेषुमध्येनीचरतेविषयेसविशेषंविशिष्यअपद्रव्याणिमद
नोदकानिगृह्णीतानादर्शंनायकंजघनेगृह्णीयात्धारयेत् उत्फुल्लकंविजृंभितकं इंद्राणीचेतित्रितयंमृग्याः प्रायेणमृग्याःसमोच्चरतसमयेएतःत्रित
यंप्रायशः क्रमेणभवति तदेवाह शिरोविनिपात्यऊर्ध्वंजघनमुत्फुल्लकं मृग्याःशिरस्तिनिपात्यउत्तानंतल्पेपातयित्वातस्याजघनमूर्ध्वंकुर्यात् तदुत्फुल्ल
कं तत्रापसारंदद्यादरीनीचेसक्थिनीतिर्यगवष्टभ्यप्रतीच्छेदितिविजृंभितकं तस्याःऊर्वोःतिर्यक्निरश्चीनंअपसारंप्रसारणंदद्यात्कुर्यात् तत्रतिर्य॰
गपसारितेनीचेसक्थिनिऊरौअवष्टभ्यअवसत्यप्रतीच्छेत्प्रभेत् इतिएतत्विजृंभितकमित्युच्यते पार्श्वयोःसममूरूविन्यस्यपार्श्वयोर्जानुनीति ४५
इंद्राण्यभ्यासयोगादिंद्राणीमृग्याः करूरुपार्श्वयोः समंसाम्येनविन्यस्यसंयुज्यस्वजानुनितस्याःपार्श्वयोः अभ्यासपाटवेनदद्यात्विन्यसेत् एत

योच्चरतस्यापिप्रतिग्रहः एतयाइंद्राण्याउच्चतररतस्यउक्तस्यप्रतिग्रहःप्रकारःव्याख्यातोभवतिसंपुटेनप्रतिगृह्णीयान्नीचरतेप्रतिगृह्णीयातसंयुज्या
त् एतेननीचतररतस्यापि एतेननीचरतन्यायेनव्याख्यातिः संपुटकं पीडितकंवेष्टितकं वाडवकमितिहस्तिन्याःसंप्रयोगेसंपुटकादिचतुष्टयंकुर्यात्
ऋजुप्रसारितावुभावप्युभयोश्चरणाविति संपुटः स्वस्यामावपिचरणौतस्यउभयोरपिचरणयोः ऋजुप्रसारितौयोजितौचेत्संपुटकोभवति सचद्विविधः
पार्श्वसंपुटउत्तानसंपुटश्चेति तथाकर्मयोगात् तथापार्श्वेनउपरिचस्थित्वाकर्मयोगात् संपुटीकरणात्संपुटः इतिद्विविधइतियोजना पार्श्वेनतुशयानोद
क्षिणेननारीमधिशयीत शयानःशयानोपिदक्षिणेननारींनायोदक्षभागेअर्थात्स्वयंवामभागेन सार्वत्रिकमेतत् एतत्दक्षभागस्थितिः सार्वत्रिकंसर्वसं
प्रयोगनियतंसंपुटप्रयुक्तयंत्रेणैवदृढमूरूपीडयेदितिपीडितकं संपुटप्रयुक्तयंत्रेणउक्तसंपुटाकारकृतयोगेनयुक्तः सन्दृढंसम्यक्ऊरूतस्याःअर्थात्
स्वोरुभ्यांपीडयेत् एतत्पीडितकं ऊरूव्यत्यस्येदितिवेष्टितकं पार्श्वेरतेपरस्परमूरूव्यत्यस्येत् वैपरीत्येनसंयुज्यात्तद्वेष्टितकं वडवेवनिष्ठुरमवगृह्णीया
दितिवाडवकमाभ्यासिकं निष्ठुरंयथातथापुंसःध्वजंअभ्यासक्रमेणस्वयोनावगृह्णीयात् इतिएतत्वाडवकमित्युच्यते तदांध्रीषुप्रायेणेतिसंवेशन
प्रकारावाभ्रवीयाः संवेशनप्रकाराःसंयोजनभेदाः सौवर्णनाभाःअप्यूरूऊर्ध्वाविति उद्भग्नकं ऊरूनार्याऊर्ध्वौभवतश्चेत् चरणावूर्ध्वौनायकोस्याधारये
दितिजृंभितकं उत्कुंचितौपीडितकं अस्याःचरणौनायकऊर्ध्वौकृत्वास्ववक्षसिधारयेच्चेत् उभयावस्थंभवतितदेकमिन्प्रसारितेऽर्धपीडितकं तस्याएवएं॰

कस्मिंश्चादे प्रसारितेऽपरः अर्धोन्नत द्वितीये स्वस्तने संलग्ने अर्धपीडितकं मायकस्यांस एकः द्वितीयकः प्रसारित इति प्रसारितकं पुनः पुनर्व्यत्यासेन वेणु
६५. दारितकं एकः तस्याश्चरणः अंसे न्यस्तः द्वितीयः अधः प्रसारितः स्थेत् पुनः पुनः केचित्कालं अधः प्रसारितस्य अंसादंसे लग्नस्य अधःप्रसारणमित्ये
वं आवृत्त्या व्यत्यासेनेति एकः शिरसि उपरि गच्छेद् द्वितीयकः प्रसारित इति शूलाचितकमाभ्यासिकं एकः तस्याः पादः शिरसः स्वस्य प्रसारितः तस्मिं संकुचि
तौ अवसितदेशे निदध्यादिति कार्कटकं संकुचितौ तस्याः पादौ स्वस्य अवसितदेशे ओष्ठदेशे ऊर्ध्वौ वृत्तव्यत्यासेनेति पीडितकं ऊर्ध्वौ स्वपार्श्वे लग्नौ तस्या
वामदक्षिणोरुजंघाव्यत्यासेन पद्मासनवत् जंघाव्यत्यासेन तस्याः सव्यदक्षिणजंघामात्रव्यत्यासेन पद्मासनतुल्यत्वात् पद्मासनवदित्युच्यते पृष्ठप
रिष्वजमानायाः पराङ्मुखेन परावृत्तकमाभ्यासिकं पृष्ठं स्वस्य परिष्वजमानायाः आलिंगमानायाः अर्धोत्तरपृष्ठस्थायाः भ्रकंठावलंबितभुजायाः पराङ्मुखेन
स्वमुखेन निरीक्षणाय तिर्यङ्मुखत्वे अभ्यासात् पूर्वकायस्य परावर्तनेन जले च संनिवेशोपविष्टस्थितात्मकांश्चित्रान्योगानुपलक्षयेत् तथासुकरत्वादिति सुन
णीनाभः वार्गतु तदपस्मृतत्वात् शिष्टैरिति वात्स्यायनः जले संविष्टः तिर्यक्कृतजानुः तथा उपविष्टः ऊर्ध्वतः स्थितः तिष्ठन् वार्तं असमीचीनं कुतः अप
स्मृतत्वात् निंदितत्वात् अथ चित्ररतानि उच्यंत इति शेषः ऊर्ध्वस्थितयोर्यूनोः परस्परोपाश्रितयोः कुड्यस्तंभाश्रितयोर्वा स्थितरतं ऊर्ध्वस्थितयोः तिष्ठ ६५.
तोः परस्परोपाश्रितयोः परस्परकंठमध्यावलंबयोः कुड्यकुंभाश्रितयोर्वा तस्याः कुचौ सः तस्य कुंभावंसौ सेनं परस्परालंबयोर्वा यूनोः रतं स्थितरतमि

त्युच्यते कुड्याश्रितस्य कंठावसक्तबाहुपाशायाः हस्तपंजरोपविष्टायाः ऊरुपाशेन तु जघनमभिवेष्टयंत्याः कुड्ये चरणापराक्रमेण चलंत्या अवलंबितं रतं
कंठावसक्तबाहुपाशायाः अर्थान्नायकस्य तत् हस्तपंजरगायाः लग्नालिंगितायाः ऊरुपाशेन स्वस्याः हस्तादिः जघनं तस्येत्यादिः अभिवेष्टयंत्याः आच्छादयंत्याः कु
ड्ये तदवलंबकुड्ये चरणपराक्रमेण चरणयोर्दृढसंयोगेन चलंत्याः मध्यदेशं चालयंत्याः युवत्याः कुड्याश्रितस्यभिसवलंबितपृष्ठस्य च रतं भूमौ चतुःपदवदास्थि
तायाः वृषलीलया वस्कंदनं धेनुकं भूमौ अश्यायां चतुष्पदवत् गौरिव आस्थितायाः अधोमुखतयास्वकरावलंबितायाः ततः तस्याः पृष्ठभागायाः वृषलीलया वृषभ
वदधिष्ठित तद्गुल्फप्रदेशं तद्बाहुमूलप्रसारिततदिच्छागृहीतकुचकलशकरवत्त्वेन अवस्कंदनं नायकस्य तया रतं धेनुकमित्युच्यते तत्र पृष्ठमुरः कर्मा
णि लभंते तत्र दे तु करते पृष्ठं तस्याः उरःकर्माणि तु रागसंश्लेषादीनि अनेनैव योगेन शौनं छागलं ऐणेयं गार्दभं आक्रांतं मार्जाललुलितं व्याघ्रावस्कंदनं गजोपमर्
दितं वराहघृष्टकं तुरगाधिरूढं अनेनैव योगेनोक्तबंधक्रमेणावज्ञेयं यत्र यत्र विशेषो योपतेत्तमुपलक्षयेत् यत्र बंधयो विशेषोस्ति तं विशेषं तत्र तत्र बंधे
लक्षयेत् लोकप्रसिध्या जानीयात् तथा हि शव्यानमितांगरमणी कटिप्रदेशारूढ तदूरुनिक्षिप्तकरस्य पराङ्मुखस्य रमणोत्तरहितं रतं चेच्छौनकं छाग
लं छागीवत्तस्यावस्थितकरचरणायाः जानुस्थितस्य तिरकूप्रसारितकरयुगस्य रतं अधस्थितकांताकराभ्यां ऊर्ध्वोत्क्षिप्तोर्ध्वकायस्य प्रसारितस्वकरोपमर्दि
तकुचयुगस्य रतमैणेयमित्युच्यते गर्दभीवत् संबद्धपादहस्तयासंतविनम्रमस्तकयासहतस्य अन्नागस्य स्पर्शं गार्दभं सिकककरोद्धतयुवतिपदद्वयस्यान्य

करावलंबितकेशकलापस्य लंमाजीरं व्याघ्रावस्कंदनं धराप्रसारितकरचरणायाः नितंबसंघट्टसखियुगलस्य पारंजयेयुः तदेवाह धारयेदेनामन्योन्यो

निषेवेत वदनमन्योजघनमन्योमध्यमन्य इति वारंवारेणाव्यतिकरेण चचेष्टेरन् धारयेतविश्रयात् अन्यः अन्यः इतरः निषेवेतसेवकवर्वतिष्ठेत वदनं
सेवेतचुंबेत सेवेतेति सर्वत्रानुषज्यते सेवनं तु यथायोग्यं ज्ञेयं वारंवारेण पुनः पुनः अन्येन अव्यतिकरेणाक्रमेणवायुगपत् चेष्टेरन् सेवेरन् एतयागोष्ठीवेश्याप
रिग्रहाराजयोषापरिग्रहाश्च व्याख्याताः एतया देशविशेषयुवतीवश्यनायकचेष्टया गोष्ठीयोगाङ्गना वेश्यावा एवं निनापरिग्रहवत्कलत्रवदाचरंतीति
परिग्रहा युवानः तासां परिग्रहाः परिग्रहव्यापाराः अप्येषां जायायामपि दाक्षिणात्यानामिति चित्ररतानि अपि यारतं अप्यस्थितनियोज्यकं अपेक्षारंगना
दिषु प्रायेणोक्तिशेषः पुरुषोपसृप्तकानि पुरुषायितेवक्ष्यामः पुरुषोपसृप्तकानि पुरुषवत् प्रयोजकवत् उपसृप्तकानि प्रयोज्ययाकर्तव्यरतानि उक्तवं ध
विषयेसंमतिमाह पशूनांमृगजातीनांपतंगानांचविभ्रमैः तैस्तैरुपायैश्चित्ररतानियोगान्विवर्धयेत् पशूनांधेनुकादीनांमृगजातीनांहरिणादीनांपतं
गानांहंसादीनां चात्रचक्रादीनांतैस्तैरुपायैस्तत्तद्विलक्षणोपायजन्यैः विभ्रमैर्बंधविशेषैः चित्रतः युवतीनां रतियोगान् तासामनुरागविशेषान् रागानुवृत्तो
वच्छिन्नोस्य नुरागउदात्तत्तरसंक्तलक्षणान्वर्धयेत् पश्वाद्युपायजन्यबंधविशेषाश्च रतिरहस्यादौ प्रपंचिताः तत्रदिङ्मात्रमुदाह्रियते तथाहि क्षिप्ति ४६
तनिजदेहार्गल्यारूढप्रियापित्तकरयुगगृहीतो दारशय्याप्रियेणभुजयुगकृतहस्तालिंछयासंगृहीतलनकलशयुगास्याघ्रावधः धेनुकं तत् नम्रांग्याः

कटिमारुह्यविमुखोरतिकूजितैः तदूरुनिक्षिप्तकरो भवेच्छ्रीनकलक्षणांकातांकरस्थितवननस्यावसोरुहद्वयं पीड्यं स्वकरेणास्याइतंमार्गं तदुच्यते
मृदतपादहस्तायाप्रियेपश्चादुपस्थिते अर्शनमत्रवदनारतिमिथ्यागार्दभः करेणपाद्वावुद्धसंगृहीस्याशयनेस्थितः गृहीतचिकुरोयस्यान्माजौलो
बंधउच्यते पुंभावमास्थितनतीविमुखी प्रियस्य पश्चान्निहितस्य चकरेषुकरौनिपीड्य याचकबन्धमतिचुंबनमाचरंतीतञ्चकबंधमितितन्निपुणा भवंति कु
वैस्तु परतिंयाचेद्भ्रमयेद्भ्रमणोविदुरितिविस्तरभयान्नपरम्यते तत्सात्म्याद्देशसात्म्याच्चतैस्तैर्भावैः प्रयोजितैः स्त्रीणांस्नेहश्चरागश्च बहुमानश्चजायतेतस्मा
त्स्यात्स्त्रीभावानुसारात् देशसात्म्यात्देशानुसारात्प्रयोजितैः कृतैः भावैः भावयंस्यंतःकरणगतभावं रसास्वस्थायीभावं प्रापयंतीतिभावाः बंधविशेषाः
तैः तदुक्तं संगीतगंगाधरे भावप्रकाशे भावपत्रांतरं भावव्यापारो भावदृष्यत इति स्थायीभावस्वरूपमपितत्रैवोक्तं प्रकाशानंदचिद्रूपसत्तांप्रतिपद्यते
प्रकृष्यमाणोयोभावस्थायीतिसनिगद्यतइति स्नेहः युवविषयः मनसोयोद्रवीभावो विषयेषु ममत्वतः भयशंकावसानात्मा स एव स्नेह उच्यतइति त
दुक्तलक्षणः रागः स्नेहप्रकर्षः दुःखमप्यधिकं चित्ते सुखत्वेनैवरज्यते येन स्नेहप्रकर्षेण स राग इति कथ्यत इति तदुदाहृतवचनात् बहुमानः स्वसंतोष
सूचकशिरःकंपादि इतिश्रीकविपदवाक्यमानतत्त्वज्ञभास्करनरसिंहशास्त्रिकृतवात्स्यायनसूत्रवृत्तौ द्वितीयेधिकरणे षष्ठोध्यायः ६ एवमालिंगनादि
वाक्यरते इंद्रियविशेषसंयोगरूपांतररतंचोक्तानंतरंरसंबंधक्रमिकांरचयति कलहरूपंसुरतमाचक्षते विवादात्मकत्वाद्वामशीलत्वाच्चकाम

वा॰सू॰ स्य तस्य रागवशत्वात्प्रहणनमंगं कामस्य रागस्य विवादात्मकत्वात् विवादः यूनोः वाचावाक्प्रतिहतिः तदात्मकत्वात् तद्धेतुकत्वात् वामशीलत्वात् वामेन
४० विरुद्धेन क्रोधादिवक्रतप्रवृत्तिकृतस्वावधेनशीलत्वात् तदंगत्वेन कलहरूपं कलहे नयोर्निर्लिंगयोरभिघाताव्यसंयोगेन रूपमेनं क्रियत इति तथाविधमाच
ष्टे तस्मात् तस्मात् ईदृशस्सुरतस्य रागवशात् रागवर्धननिमित्तं प्रहणनं प्रयोज्यं प्रणाभिघातः प्रहणनस्थानानि चांसौ शिरः पृष्ठमुरस्तनौ तदंजघनपार्श्वमि
ति प्रहणनस्थानानि तत्रहणकत्त्वाभिघाताश्रयाः अंसौ तस्य भुजशिरसि जघनपार्श्वे जघनस्य गुरुत्यस्य पार्श्वे सन्निहितदेशः तच्चतुर्विधं अपहस्तकं प्र
सृतं मुष्टिः समतलमिति तत्प्रहणनं अपहस्तादिकं तद्रूपमाणलक्षणं क्रमेणां सादिकत्वं तत्स्वं हिंसीत्कृतं तज्जाति रूपत्वादनेकविधं अनेकप्रकारा
णामुपलक्षणार्थान्येषाह विरुतानि चाष्टौ हिंकारः स्तनितं कूजितं रुदितं सूत्कृतं फूत्कृतं फूत्कृतं विरुतं विजातीयध्वनिः लष्टौ सीत्कृतं विनाऽष्ट
ष्टविधानि हिंकारः हिमिति कंठजशब्द विशेषः स्तनितं घनवद्धोषणं कूजितं गलरवविशेषः रुदितं मिथ्याश्रुलोचनकालिक ध्वनि विशेषः एवं सूत्कृतादि
योप्यनुकरणशब्द विशेषाः एवमेकवार प्रहणनेसीत्कृतादिकमुक्ता अनन्तरावृत्तावाह अंबार्थाः शब्दावारणार्थाः मोक्षणार्थाः अलमर्थाः तेनेवार्थे संप्र
योगात् अंबार्थाः अंबावाचकाः अंबाः कैसादयः वारणार्थाः मामित्यादयः मोक्षणार्थाः मुंचेत्यादयः अलमर्थाः पूर्णमित्यादयः अर्थसंप्रयोगात् अर्थ ४०
स्य प्रहणनस्य संप्रयोगात् पुनः पुनः करणात् प्रयोक्तव्याः पारावत परभृत हारीत शुक मधुकर हंस कारंडव दास दूह चक्रवाक रुतानि च हीत्कृता तभ यि

तानि विकल्पशः प्रयुंजीत पारावतादयः पक्षिविशेषाः तेषां रुतानीव रुतानि सीत्कार बहुलानि विकल्पशः देच्छिकविकल्पेन प्रयुंजीत अपहस्तका
दीनां स्वरूपं कथयंस्तत्तज्जन्य सीत्कृतादीनां प्रयोगावस्थामाह उत्संगमुपविष्टायाः पृष्ठे मुष्टिनाभिघातः तत्र सासूयेव स्तनितरुदितकूजितानि प्र
तीघातांश्च प्रयोजयेत् उत्संग अंके पृष्ठे अंसप्रदेशे अभिघातः ताडनं मुष्टिरिति स्यूते तत्र मुष्टिप्रहरणे सति सासूयेव तस्य स्वाभिमतत्वेपि सक्रोधेव
प्रतिघातान् पुनर्मुष्ट्यभिघातं च कुर्यात् बहुवचनेन एकप्रहरणेन न प्रहरणान्तं गम्यते युक्तयंत्रायास्तनान्तरे पहस्तेन प्रहरेत् मंदोपक्रमं वर्द्धमानरागमापरि
समाप्तेः तत्र हिंकारादीनामनियमेनाभ्यासे नचनकालमेव प्रयोगः युक्तयंत्रायाः संप्रयुक्तायाः अपहस्तेन अंगुष्ठमध्येन स्तनान्तरे स्तनमध्ये प्रहणनमपह
स्तकमिति स्यूते तच्च मंदोपक्रमं स्वल्पारंभं वर्धमानरागं रागवर्धकं आपरिसमाप्तेः रताबसानपर्यंतं भवति तत्र अपहस्तके हिंकारादीनां नवानां अनियमे
न स्वेच्छया अभ्यासेन आवृत्त्या तत्कालं तावत्कालं यावत्सुरतमिति यावत्प्रयोगः कार्य एव शिरसि कुंचितांगुलिना करेण विवदंत्याः फूत्कृत्य प्रहणनं
तत्प्रसृतकं तत्रांतर्मुखेन कूजितं फूत्कृतं रतांते च श्वसितरुदिते वेणोः स्फुवकः शब्दानुकरणं सूत्कृ बदरस्येवाप्सु निपततः फूत्कृतं विवदंत्याः कृतप्र
तिकृतिमत्याः शिरसि सीत्कृत्य स्वयं तत्र तदा अंतर्मुखेन मुखांतर्भागेन कंठतालुभ्यां रतांते रतकर्मावसाने श्वसितरुदिते निश्वासमिथ्यारोदने स्फु
टतः विदीर्णात् वायुप्रवेशमार्गवत् तत्र तावत् सूत्कृतं भारापगमे मुखतो निःसृत शब्दः सूत्कृतं तदनुकरणं फूत्कृतं धमनकालिक ध्वनिवि

का॰सू॰
४८

शेषः वदरस्य फलविशेषस्य प्रपतनि पततः निपातात् अभिघाताख्यसंयोगात् जातो ध्वनिविशेषः फूत्कृतं एतानि रुतानि भवंति सर्वत्र चुंबनादि
षु प्रक्रान्तायाः ससीत्कृतमनेनैव प्रस्तरं चुंबनादिषु रुतानि प्रयुक्तानि प्रयुक्तेषु सर्वत्र सर्वेषु ससीत्कृतं सीत्कृतादि सहितं यथा तथा उपक्रान्तायाः प्र
वृत्तायाः प्रसृतं त्वत्कृतं तस्येदं फलमिति प्रयत्नः प्रसृतरुतानेन अनेनैव सीत्कृतादिका रुतेन कृतमिति भवति एतत् शास्त्रप्रहणनानामभ्यासो वा एतेषाम् रागा
लमयीनां शब्दानामंबार्थानां च रागवशात् एषां कृपणात् प्रहणनानां उक्तपुवक्रतम् अम्बादीनां अभ्यासे आवृत्तौ सति शब्दानां दारयेसादीनां प्रयोगो भ
वति सरुतानि श्वसितं हृदि न तु कलनिर्निर्मिश्रितप्रयोगो विरुतानां च श्वसितं ससीत्कृतं इत्येतैर्मिश्रितानां अंबार्थानां प्रयोगः उच्चारणं विरुतानां वीणाप एवता
दीनां एतदेवाह रागावसानकाले जघनपार्श्वयोस्ताडनमतित्वरया आपरिसमाप्तेः समतलकं तत्रलानकं परमं हंसविकूजितं त्वरयैवेति हननप्रहण
नयोगः रागावसानकाले धातुक्षरणकाले परिसमाप्तेः रतविरमको धादिवत्वरया प्रतिवेगेन जघनपार्श्वयोः अर्पिताभ्यां ताडनेनोदने समतलकमि
त्युच्यते तत्र समतलके सति हंसविकूजितं हंसादीनां विरुतं कूजितमिव कूजितं त्वरया सवेगं कुर्यात् इति उक्तप्रकारेण हननितप्रहरणयोगः प्रहरणा
नां मुष्ट्यादीनां हननितादीनां विरुतानां पौर्वापर्येण योगाः प्रयोगावित्ते याः पारुष्यं रभसत्वं च पौरुषं तेज उच्यते अशक्तिरार्तिर्व्यावृत्तिरबलत्वं योषितः ए ४८
गात्मयोग मात्स्याश्च व्यस्ययोपिकृ चित्स्वेत् नचिरं तस्यैवोते प्रकृते वियोजने पारुष्यं वाचिनखस्तनादिषु च काठिन्यं रभसत्वं अनयोरेव वेगः तेजो धातुः

स्त्रीत्वं पौरुषं पुरुषस्यैव अशक्तिः वाक्सत्त्वादीनां दुर्बलत्वं आर्तिर्वा अनुकृतिः व्यावृत्तिः वेगमांद्यानुकृतिः अबलत्वमधातुत्वे हलहर्षं धर्मो रतिशेषः रागा
त् रागोद्रेकव्यत्यासात् प्रयोगसात्म्यात् उपरिरतादि वंधविशेषस्वभावात् व्यत्ययः तेजोवर्जं स्त्रीपुंधर्मव्यत्यासः क्वचित्कदाचित् योजने तस्य पुरुष
स्यैव प्रकृतेन स्वभावादेव अंते धातुक्षयकाल एव न चिरं अतिवेगः भवति सिंहावलोकनन्यायेन प्रहणनानि तत्स्थानानि चाह कीलामुरसि कर्तरीं शि
रसि विद्धां कपोलयोः संदंशिकां स्तनयोः पार्श्वयोश्चेति पूर्वैः सह प्रहणनमष्टविधमिति कीलां शरवदंगुल्याः प्रतिकर्तरीं लोहविकारेण अंगुलिभ्यां च
मिकृतेन विद्धां रेखां संदंशिकां लोहमयीभिरंगुलीभिः इत्येवमेव इति एतानि चत्वारि पूर्वैरपहस्तकादिभिः सह प्रहणनस्थानेन तत्स्थानकर्तव्यप्रहण
नानि कीलादीनां देशविशेष एव प्रयोगस्तमाह दाक्षिणात्यानां कीलानि चतसृषु वनीनामुरसि दृश्यन्ते दाक्षिणात्यानां कर्तरीषष्ठीदेशसात्म्यं तदिति कष्टमनार्ये
मनादृतमिति वात्स्यायनः तत्कीलादिकं देशसात्म्यं देशविशेषाचारात् तत्रैव कार्यं कुतः कष्टं दुःखहेतुः अत एव अनार्यं आर्यापरिगृहीतं नादृतं सर्वैर्नादृतेर्व्यं
यावान्यदपि देशसात्म्यं प्रयुक्तमन्यत्र न प्रसंजीत अन्यदपि उक्तादन्यदेतन खलु तं देशसात्म्यं प्रयुक्तं देशविशेषाचरितं अन्यत्रदेशांतरे आत्ययिकं तु तत्रापि
परिहरेत् तत्रापि तस्मिन्नपि देशे आत्ययिकं अतिदुःखहेतु कीलादिकं परिहरेत् शिष्टैनेकार्यं अकार्यत्वमेव सनिदर्शनं विशदयति रतौ साक्षिनारतियोगे
हिकीलया गणिकां चित्रसेनां पांचालराजो जघान इति योगे रसप्रथरतकाले चित्रसेनां तदाख्यां जघानहतवान् कर्तर्या कुंतलः शातकर्णिः शातवाहनो

वा॰सू॰ महादेवीशातवाहनः स्वार्थे एव शातकर्णिः शातकर्णपसंमहादेवी तदा रत्यां गणिकां जपाने समनुषज्यते नरदेवः कुपाणिर्विद्धया दुष्प्रयुक्त्या नटीकाणां च
४९ कारेति दुष्प्रयुक्तया अभिविद्धः सह्याकारणं अतो नैव कार्यमित्यर्थः उक्तं संवादयति नाम्नीत्यादिना नास्त्यत्र गणिका काचिन्न च शास्त्रपरिग्रहः प्रवृत्तेरपि
संयोगे राग एवात्र कारणं रतियोगे रतिप्रयुक्तसंप्रयोगे प्रवृत्ते सति आरब्धे सति अत्र न खेद शास्त्र स तादृग्गणिकाद्यनत्र शास्त्रपरिग्रहः शास्त्रमलक
ताराग एव परस्परानुराग एव अत्र प्रमाणं स्वप्नेष्वपि न दृश्यंते ते भावास्ते च विभ्रमाः सुरतव्यतिहारेषु स्त्रीपुंकर्तव्यस्त ये सुसुरतेषु प्रवृत्तेषु सत्सु ये
भावाः भाव्यन्ते स्थिरीक्रियन्ते रागा एभिरिति भावा नखदन्तादयः विभ्रमाः भ्रूविक्षेपादिविलासाः तत्तत्क्षणकल्पिताः ततक्षणे रतोत्सवेषु वभ्यांक-
ल्पिताः येन स्वप्नेष्वपि मानसिकवृत्तिष्वपि न दृश्यन्ते न विषयीक्रियन्ते यथा हि पंचमीं धारां संप्राप्त तुरगः पथि स्थाणुं श्वभ्रं दरीं वा पि वेगान्धो न समीक्ष
ते स्मृत्यादिषु पंचमीं धारां गतिविशेषं वेगान्धः वेगोत्कटत्वान्नयनहीन इव रागान्तौ कामवशगौ संतौ सुरतसंमर्दे रतिकालिकसंघर्षेण प्रवृत्तौ त त
श्चंडवेगौ उत्कटरागौ संतौ प्रवर्तेते कीलादौ अत्यय अनंतरं दोषं न समीक्षेते न विचारयतः तस्मान्मृदुत्वं चंडत्वं युवत्या बलमेव च आत्मनश्च बलं
ज्ञात्वा योगान्युंजीत शास्त्रवित् यस्माद्दुःखहेतुत्वात् प्रयोज्यायाः युवत्याः मृदुत्वं अवयवेषु काठिन्यं चंडत्वं बलं शक्तिः योगान् रतादीन् उक्तमुपसंहर ४९
ति न सर्वदा न सर्वत्रा किं तु स्थाने तु यादौ देशे दक्षिणादौ काले अभिनवरतिकाले चात् तद्देश एषां कीलादीनां योगः प्रयोगः इति श्री कविपदवाक्यमान

तत्त्वभास्कर नसिंहशास्त्रिकृत वात्स्यायनसूत्रवृत्तौ द्वितीये ऽधिकरणे सप्तमो ऽध्यायः ७ एवमधोरतान्युक्त्वा एकार्थत्वसंगत्या उपरिरतान्याह नायक
स्य रताभ्यासात् परिश्रममुपलभ्य रागस्य चानुपशममनुमता तेन तमधः पातयित्वा पुरुषायितेन साहाय्यं दद्यात् युवतिः रताभ्यासात् रतावर्त्तनात् नायक
स्य परिश्रमं क्लान्ततां रागस्य सुरतानुरागस्य अनुपशमं चोपलभ्य ज्ञात्वा तेन नायकेन अनुमता आज्ञप्ता सती तं पुरुषं अनपातस्य अधः पातयित्वा पुरुषा
यितेन पुरुषवदुपरिस्थित्यादिव्यापारेण साहाय्यं रतानुकूल्यं दद्यात् कुर्यात् स्वाभिप्रायाद्वा विकल्पप्रयोजनार्थी नायककुतूहलाद्वा स्वस्या अभिप्रा
यात् उपरि सुरताभिप्रायत्वात् नानात्वशिल्पप्रयोजनार्थी स्वस्यारतचानुयंत्रापन प्रयोजनार्थित्वेन तातासती नायककुतूहलाद्वा नायकस्य स्वकृतोपरिर
तनिरीक्षणौत्सुक्याद्वा तेनानुमते स्या घनुवर्तते तत्र युक्तयंत्रेणैव तरेणास्याप्यमानात्मवपातयेत् तत्र उपरिरतविषये युक्तयंत्रेण संप्रयोगवतैव तर
तरेणा पुरुषेण उत्थाप्यमाना पर्यंकात् तं पुरुषं अवपातयेत् स्वस्थाने योजयेत् एवं रतमविच्छिन्नरसं तथा प्रवृत्तमेव स्यादिति एको मार्गः एवं एवं सति
तथा प्रवृत्तं अविच्छेदेन विद्यमानं रतं संप्रयोगः अविच्छिन्नरसं अविच्छिन्नानंदवृत्तिमदेव मार्गः प्रकारः उपरिरतस्यातिशेषः पुनरारंभेणादित एवो
पक्रामेदिति द्वितीयः अशक्ता रतं विच्छिद्य उपर्यीहरस्य रतारंभेनुप्रादित एव चुंबनादिकमारभ्येन उपक्रामेत् कुर्यात् कृतिप्रकारमेवाह सा तं लिंगे
न समास्य पीडयंत्यपि स्थिरमवतिष्ठेदिति पीडितकं समाहत्य भागपूर्वा परभागं स्वकरसुल्लेखणवेगेन स्वजघनमवपीडयेदिति निर्घातः स्वजघनं स्वकरं दूरं

वा॰सू॰ उत्कृष्य ऊर्ध्वमाकृष्य वेगेन अवपीडयेत् योनिदेशमवघातयेत् एकत एव भूयिष्ठमवलिखेदिति वराहघातः एकत एव भगैकभागोऽभियुक्तं पुनः

५० पुनः अवलिखेत् संघृष्यात् एष एवोभयतः पर्यायेणाभ्यस्तो वृषाघातः एषः अभिघातः उभयतः मदनसदनपूर्वोत्तरभागयोः पर्यायेणाहतः सकृन्मि

श्रितमनिः क्रमस्तत्र तत्रैव द्वित्रिश्चतुरिति घट्टयेदिति चटकविलसितं सकृत एकवारं मिश्रितं संयुक्तं स्वलिंगं अनिष्क्रमय्य अवियुज्य तत्र तत्रैव द्वि

र पूर्वमध्यापरभागे युक्रमेण द्वित्रिश्चतुर्वारं रागावसानिकं व्याख्यातं करणं संपुट इति रागावसानिकं रागावसानपर्यन्तं करणं मेधनादिप्रयोगः सं

पुट इति व्याख्यातं कामशास्त्रतत्त्वज्ञैः तेषां स्त्रीसात्म्यादिकल्पेन प्रयोगः तेषां मंथनादीनां स्त्रीसात्म्यात् स्त्रीस्वभावपर्यालोचनया कार्यः एवमतिदेष्टुं पुरु

षं करते धर्मानुक्त्वा योषित्कर्तृकेतरस्मिन्कांश्चिद्विशेषानुपदिशन्ति पुरुषायिते तु संदंशो भ्रमरकः प्रेंखोलितमित्यधिकानि पुरुषवदाचरतीति पुरुषायि

त्वेन नायिका तत्पुरुषायितं करोतीति तत्र उपरिसुरतमित्यर्थः वाचनिकोऽयमतिदेशः वाडवकेन लिंगमवगृह्य निष्कर्षयंत्याः पीडयंत्या वा चिर

मवस्थानं संदंशः वाडवकेन वडवयेव निपुणितेन यंत्रेण अवगृह्य निःशेषं योजयित्वा निष्कर्षयंत्याः किंचित्तिविद्धस्थे पयंत्याः यंत्रं संकुच्य पीडयंत्या

वा योषितः कर्म्णोः चिरमवस्थानं व्यापारांतरं विनास्थितिः युक्तयंत्रा चक्रवद्भ्रमेदिति भ्रमरकः आभ्यासिकस्तत्रेतरः स्वं जघनमुत्क्षिपेत् युक्तयंत्रा ५०

गृहीतयंत्रा सती चक्रवद्भ्रमेत् तत्र भ्रमणकाले इतरः नायकः स्वं जघनं लिंगं उत्क्षिपेत् पुनः पुनरुत्क्षेपणेन योजयेत् इति अयं भ्रमरकः आ॰

भ्यासिकः अभ्यासैकसाध्यः जघनमेव च दोलायमानं सर्वत्र भ्रामयेदिति प्रेंखोलितमिति सर्वत्र पूर्वापरदेशयोः दोलायमानं दोलावदारमा

णीयपातया भ्रामयेत् कुर्यात् युक्तयंत्रैव ललाटे ललाटं निधाय विश्राम्येत श्रांता सती युक्तयंत्रैव योजितयंत्रैव ललाटे पुनः विश्रांतायाश्च पु

रुषस्य पुनरावर्तनमिति पुरुषायितानि विश्रांतायाः अप्रशांतोऽपुंसः पुनः पूर्ववत् आवर्तनं अथोरतारंभः यावद्रागावस्थानं भवति उक्तं संवा

दयति प्रच्छादितस्वभावापि गूढरागापि कामिनी विपरीते स्वभावं स्वरागात् परिवर्तिनी भाव्यते स्पष्टीक्रियते राग एभिरिति भावाश्चुंबनादयः

प्रख्यापिताः रतिसंयोगे वैषा कथमनुरज्येतेति प्रष्टुस्तापरीक्षेत प्रथमसमागमे स्वानुभूतस्त्रीसंगमे कन्यायामुभयाश्च समागमे सति एषा रतिसं-

योगे प्रीतिहेतुसंप्रयोगविषये कथमनुरज्येत कथं वा व्याप्रियात् इति तस्याः पत्नहिं परीक्षेत तत्तावत्सर्वं तदाप्यस्य तत उदासीत युक्तयंत्रेण रतप्रवि

ष्टेन पुंसा उपसृप्यमाणा चुंबनस्तनादिना सेव्यमाना सती यतः यथा स्वांगप्रतिदृष्टिं नेत्रमावर्तयेत् प्रवर्तयेत् तत्र तत्र दंगे चुंबनस्तनादिना एनां पी

डयेत् स्वाभिप्रायज्ञानेन लक्षितो कुर्यात् रहस्यं रागोद्रेजकं गात्राणां स्रस्तता नेत्रयोर्निमीलनं व्रीडानाशः समधिका च रतियोजने ति स्त्रीणां भावल

क्षणे गात्राणां करपादादीनां स्रस्तता स्वैरः व्रीडानाशः स्वयमपि चुंबनादिकरणं रतियोजना समवलाभः इति हेतोः भावलक्षणं भावस्य अतिशयसुख

स्य लक्षणं ज्ञापकं उक्तं स्वेदादित्रयं भवति हस्तौ धुनोति कंपते दशति स्थिरयति खिद्यते उद्धातुं न ददाति पादेन हंति रतावसाने च पुरुषायितवर्त्तिनी।

का॰सू॰ स्यादित्यनधिकभावलक्षणं हस्तौ धुनोतीति कंपते कंपयते शरीरं दशति तदीयोष्ठादिकं क्षिपते हस्तपादादिकं क्षिपत तदेवमनः उत्थातुं न ददाति
५१ ह्रसंश्लेषेणोत्थानं न कारयति पादेन हंति च तदीयपादं रत्यवसाने रतकालिकधातुक्षये पुरुषस्यानिवर्तनं निवर्तनं इत्येतत् अनधिकभावल
क्षणं अनधिकः युवस्यपेक्षयान्यूनो भावः सखेन स्य लक्षणं नायकं पुरुषस्य भवति तस्याः प्राग्यंत्रयोगात्करेण संवाधं गजइवहस्तेनोभ्येयस्तामृदु
भावात्ततोयंत्रयोजनं युवार्यंत्रयोगात्प्राक् रतारंभात्स्वैर्य मामृदुभावात्कामोदकस्रवणेन मृदुत्वोपपत्तिपर्यंतं करेणखकरकमलेन संवाधगजो रतापे
क्षिगजः तादृशकरिण्या इव तस्यायंत्रयोनिप्रांतं संक्षोभयेत् संप्राप्तात्ततः मृदुत्वानंतरं यंत्रयोजनं रतं कुर्यात् रतविशेषानाह उपसृप्तकं मंथनं
हुलः अवमर्दनं पीडितकं निर्घातः वराहघातः वृषाघातः चटकविलसितं संपुट इति पुरुषोपसृप्तानि पुरुषोपसृप्तानि पुरुषकर्तृकाणि रतविशे
षाणि न्याय्यमृजुसंमिश्रणमुपसृप्तकं न्याय्यं यथाहास्कृ जु अवक्रं संमिश्रणं संयोजनं हस्तेन लिंगं सर्वतो भ्रामयेदिति मंथनं हस्तेन स्वकी
येन गृहीत्वा सर्वतः योनेः सर्वप्रदेशेषु नीचीकृत्य जघनमुपरिष्टाद्घट्टयेदिति हुलः जघनं तदाधारं नीचीकृत्य मेहनाग्रस्य श्चात् कृत्वा उपरिष्टात्
तदूर्ध्वप्रदेशेषु घट्टयेत् तेन संघर्षयेत् इति एतत् तदेव विपरीतं सरभसमवमर्दनं तदेव संघट्टनमेव विपरीतं जघनमुपरीकृत्वा तस्याधः प्रदे ५१
शे कृतम् विप्रकीर्यमाणकेशकुसुमाश्वासविछिन्नहासिनी वक्त्रसंसर्गार्थं स्तनाभ्यामुरः प्रविश्योपपीडयंती पुनः पुनर्नमयंती शिरो याश्चेष्टाः

पूर्वमस्य प्रदर्शितवांस्ता एव प्रतिकुर्वीत विप्रकीर्णकेशकुसुमा उत्थानान्प्रकीर्यमाणकेशान्तर्द्दतकुसुमाश्वासविछिन्नहासिनी श्वासेन श्रमजनिश्वा
सेनापिहितहासलीलावक्त्रसंसर्गार्थं तदीयवक्त्रचुंबनार्थं उरस्प्रविश्य प्रारहय उपपीडयंती गाढमालिंगंती शिरः तदीयं पुनः पुनः अधरक
पोलादिचुंबनार्थं नमयंती स्वाभिमुखमाकर्षंती सती याश्चेष्टाः नखदशनसताद्व्यापाराः पूर्वं तस्योपरिस्थितिकाले अस्य खस्य प्रदर्शिताः तेन कृताः
पातिता प्रतिपातयामीति हसंती प्रतितर्जयंती वक्ष्यास्तुनः पुनश्च वीडां दर्शयेत् पातिता पुराहं त्वया प्रतिपातयामि इदानीमहं त्वां प्रतिकृतये पात
यामि अश्यः इति प्रतितर्जयंती मत्प्रागल्भ्यं पश्यतीति भीषयंतीव पुनः पुनः मध्येमध्ये श्रमं विरामाभीप्सां च तदंते विरमाभीप्सां पंडुरमेच्छां दर्शयेत् ता
पयेत् पुरुषोपसृप्तैरेवोपसर्पेत् पुरुषेणाधोरते उपसृप्तैः कृतं व्यापारैः उपरिसुरते तं उपसर्पेत् योजयेत् तानि च वक्ष्यामः तानि चैव रूपर्वं पुरुषकर्त
व्यानि च तथाहि पुरुषः शयनगताया योषितस्त हृच्चमाक्षिप्तचित्तायाइव नीवीं विश्लेषयेत् तद्वचनाक्षिप्तचित्तायाः तस्य खस्य वचनैः चाटुक्तिभिः आ
क्षिप्तमभिमुखीकृतं यस्यास्तस्याइवक्षिप्तायायोषितः नीवीं स्वयं विश्लेषयेत् तत्र विवदमानायां अनिच्छंतीं वजस्यंतीं पर्याकुलयेत् सम्यक् स्वा
धीनि कुर्यात् स्थिरलिंगाश्च तत्र तत्रैनां परिस्पृशेत् ततोऽप्यवशां तत्र तत्र कुचकपोलादौ परिस्पृशेत् तेन स्पृष्ट्वा वशं नयेत् प्रथमसंगताचेत्संहत
योरूर्वोरंतरे घट्टनं कन्यायाश्च प्रथमं विवादं विनैव तदा संहतयोः श्लिष्टयोरूर्वोस्तस्या अंते मध्ये घट्टनं प्रसृतं कुर्यात् कन्याया विवदमानायाः

का॰सू॰ कपोलचुंबनादिनावशीकृतायाश्चैवं कार्यं तथास्तनयोर्हस्तकक्षयोः संहतयो रंसयोर्ग्रीवायामिति स्वैरिण्यां यथासात्म्यं यथायोगं च स्तनयोः हस्तयोः
५२ कक्षयोश्च संहतयोः तथा प्रस्तनं कुर्यात् स्वैरिण्यांतु यथासात्म्यं यथास्वभावं यथायोगं यथारागं च तत्कार्यं अलकेषु चुंबनार्थं मे नां निर्दयमवलंबेत
निर्दयं दृढं चुंबनार्थं मुखादौ चुंबनाद्यर्थं हनुदेशे चांगुलिसंपुटेन अंगुलिसंपुटेन संहतांगुलिभिः चो विकल्पे अवलंबेत तत्रेतरस्या व्रीडा निमील
नं च तत्र तदा इतरस्याः नायिकाया व्रीडया नेत्रयोः निमीलनं च भवति प्रथमसमागमे कन्यायाश्च अघोरते अभिनिष्पादितः स्वस्याः भावो यया प्र
तएव महत्समागमे अप्रतापितरागारंगात् रागोत्कर्षात् उपरिवर्तिनी उपरि सुरते प्रवृत्ता चेत् भावं चुंबनादि विहृणोति समन्यः कुर्यादेव नायककार्यं
माह यथाशीला भवेन्नारी यथा चरति लालसा तस्या एव विचेष्टाभिस्तत्सर्वमुपलक्षयेत् तस्या निचेष्टाभिः चुंबनादिव्यापारैः शीलं स्वभावं ज्ञात्वा
यथा शीला यादृश स्वभाववती यथारतिलालसा च यादृशरतिलोला च तत्सर्वं तदनुकूलव्यापारं उपलक्षयेत् कुर्यात् पुरुषायितायोग्या आह न॰
लेवलीनप्रजानां नमृगीं न च गर्भिणीं न चातिव्यायतां नारीं योजयेत्पुरुषायिते रुतौ पुष्पिणीं प्रजानां अभिनवप्रसूतां मृगीं अन्यूनपंत्रां अतिव्यायतां
अतिस्थूलां इति श्रीकविपदवाक्यमानतत्वज्ञ भास्करनरसिंहशास्त्रिकृतवात्स्यायनसूत्रवृत्तौ द्वितीयाधिकरणेऽष्टमोऽध्यायः ८ प्रसंगसंग॰ ५२.
त्यानायिकाविशेषे रतविशेषमाह द्विधा तृतीया प्रकृतिः स्त्रीरूपिणी पुरुषरूपिणी च तृतीया प्रकृतिः वंध्या स्त्रीरूपिणी स्त्रीवेषादिमती

पुंरूपिणी तद्वेषादिमती चेति द्विधा तु द्विधा खलु तत्र स्त्रीरूपिणी स्त्रियाः वेषमालापं लीलां भावं मृदुत्वं भीरुत्वं मुग्धतामसहिष्णुतां व्रीडां चानुकुर्वीत त
त्रैतयोर्मध्ये स्त्रियाः वेषं प्रकृतिं तु केशादि आलापनं तज्जातीयं लीलां भ्रूविलासादि भावं निर्वेदादिकं मृदुत्वं वदनादौ भीरुत्वं च किंतासिस्वादि मु
ग्धतां सौंदर्यं असहिष्णुता परसौंदर्यासहनं व्रीडां लज्जां नायकमुखे संगादौ अनुकुर्वीत कुर्यात् सा स्त्रीरूपिणीत्युच्यते तस्या वदने जघनकर्म तदौपरिष्टक
माचक्षते जघने जघनेऽवकुर्यात् सा न तो रतिमाभिमानिकीं वृत्तिं लिप्सेत तत्र औपरिष्टकानंतरं आभिमानिकी अहं मनेनयुक्तास्मीत्यभिमानजन्यां वृत्तिं
मनोरूपां रतिं सुखं वेश्या चरितं प्रकाशयेदिति स्त्रीरूपिणी पुरुषरूपिणी प्रच्छन्नकामा पुरुषं लिप्समाना संवाहकभावमुपचरेत् ततः वेश्यावचारितं रतानुकू
लव्यापारं कुर्यात् पुरुषरूपिणी तद्वेषालापलीलाऽमृदुत्वाभीरुत्वामुग्धतासहिष्णुताव्रीडानुकारिणी प्रच्छन्नकामा उपगूहितद्दुद्वेजः कावयवा संवाह
कभावं तदीयपादादिसंमर्दनं संवाहनेन च परिष्वजंती गात्रैरूरू नायकस्पर्शह्लीयात् संवाहनेन तद्व्याजेन परिष्वजंती आलिंगंती प्रसुप्तयोरूरूमूलं
संस्पृशंती स्थिरलिंगतामस्योपलभ्य पाणिमंथनेन परिघट्टयेत् प्रसुप्तपरिचया संवाहनान्नसाप्रसुरोरुसंश्लेषवती क्रमेण ऊरुमूलं तत्तु पनं मध्ये तेनेनेति
मंथनं पाणिना खमंथनं तेन परिघट्टयेत् तल्लिंगं मध्यीयात् चापलमस्य कुत्सयंती हसेत् चापलं असंतरलोत्कंठां कुत्सयंती सेव कृतलक्षणेनाप्युपलब्धे वैकृते
न चोपनेचेत् कृतलक्षणेन कृतं स्वयालक्षणं लिंगापमर्देनादिनापकं यस्पनेनापि उपलब्धे वैकृतेन उपलब्धं हृदं वैकृतं पुरुषवेषादियेन न चोपनेचेत्

का॰सू॰ नाभ्यन्तेचेत्‌ तदा पुरुषेणानुनोद्यमाना विवदेत्‌ नोद्यमाना त्वा पुरुषेण नायं प्रेर्यमाणा सती विवदेत किमेतदिति यत्किंचिद्रूपात्‌ तच्छेषणाभ्यु
५३ पगच्छेत्तत्र कर्माष्टविधं समुच्चयप्रयोज्यं तत्र ततः तेन कृच्छ्रेणयलाघिवयात्‌ योजितं च समुच्चयेन कृतेयमष्टविधं वस्य मालाष्टप्रकारं कर्म औपरिष्टकं
उपगच्छेत्तल्लभेत निमितं पार्श्वतोदष्टं बहिः संदंशः अन्तः संदंशः चुम्बितकं परिमृष्टकं आम्रचूषितं संगर इति तेष्वेकैकमभ्युपगम्य विरामाभीप्सां द
र्शयेदिति तस्य पूर्वस्मिन्नभ्युपगते तदनंतरमेवापरं निर्दिशेत्‌ तस्मिन्नपि सिद्धे तदुत्तरमिति तेषु निमितादिषु मध्ये अभ्युपगम्य अनुभूय विरामाभीप्सां निवृत्ता
कांक्षात्वकमिव स्थितं पिधानाख्यया पा दर्शयेन कर्तुमुपच्छेत्‌ तदा तु तस्य नायकोपि पूर्वस्मिन्‌ औपरिष्टके अभ्युपगते समाप्ते सति तदनंतरमेव
तदविच्छेदेनैव अपरं द्वितीयमौपरिष्टकं निर्दिशेत्‌ आरभेत तस्मिन्नपि सिद्धे निर्वृत्ते तदनंतरमेव तदविच्छेदेनैव अपरं द्वितीयमौपरिष्टकं निर्दिशेत्‌ आ
रभेत तस्मिन्नपि सिद्धे निर्वृत्ते तदनंतरमेव तदनंतरमेव तदुत्तरं इति एवं प्रकारेणाष्टविधं प्रयोज्यं तेषां क्रमेण लक्षणान्याह कराम्लेवितमोष्ठोपरिवि
न्यस्तमपविद्धमुखं विधुनुयात्तन्निमितं पुरुषः करावलंबितं सकरेणागृहीतं ऊर्ध्वोपरि तस्याविन्यस्तं लमे हनमपविध्य संघृष्य विधुनुयात्‌ सर्वं त
श्चालयेत्‌ निमननं निक्षेपः तद्रूपत्वान्निमितं हस्तेनाग्रमवच्छाद्य पार्श्वतो निर्दशनमोष्ठाभ्यामवपीड्य भवत्वेतावदितिसांत्वयेत्तत्पार्श्वतोदष्टं हस्ते ५३
नतस्याः अग्रं शेफसः अवच्छाद्य धृत्वा निर्दशनं यथा तथा पार्श्वे लिंगपार्श्वे द्वयमवपीड्य संघृष्य स्थितायां सर्वानायकः भवत्वेतावदिति सांत्व

येत्‌ पार्श्वतो दंशनरूपत्वात्‌ पार्श्वतोदष्टं भूयश्चोदिता संमीलितौष्ठी तस्याग्रं निष्पीड्य कर्षयंती विचुंबेदिति बहिः संदंशः भूयः सांत्वमेनेनमो
चने पुनः चोदिता नोदिता संमीलितौष्ठी संदंशितौष्ठद्वया तस्य ग्रत्वस्याग्रं निष्पीड्य कर्षयंती ओष्ठाभ्यां पार्श्वमाकर्षेन्नो विमुंचेत्‌ नखजनितेन ब
हिः संदंशः बहिरेव संदशनात्‌ तस्मिन्नेवाभ्यर्थनया किंचिदधिकं प्रवेशयेत्सापि चाग्रमोष्ठाभ्यां निष्पीड्य निष्ठीवेदित्यन्तः संदंशः अभ्यर्थनया
तस्मिन्‌ सक्ते सति किंचिदधिकं पूर्वापेक्षया प्रवेशयेत्‌ प्रवेशयति चेत्तदाग्रमोष्ठाभ्यामग्रं निष्पीड्य निष्ठीवेत्‌ धृत्कुर्यात्‌ अन्तः संदंशः अन्तः प्रविष्टस्य सं
दंशनात्‌ करावलंबितस्यौष्ठवन्मग्रहणं चुंबितकं करावलंबितस्य ग्रस्तस्य अधरोष्ठस्येवाग्रहणं नापि का जिह्वया चुंबनरूपत्वाच्चुंबितकं तज्जि
ह्वाग्रेण सर्वतो घट्टनमग्रेणास्य धनमिति परिमृष्टकं तत्पूर्वोक्तं सर्वतः पार्श्वयोः अग्रेण अग्रात्‌ वच्छेदेन इति एतत्‌ परिमर्शनात्‌ घट्टनात्‌ त
थाभूतमर्दे वरागवशादर्धप्रविष्टं निर्दयमवपीड्यावपीड्य मुंचेदित्याम्रचूषितकं तथाभूतमर्दे वपूर्वे वरेकत्वाद्रागवशात्‌ तदौत्कट्यात्‌ आम्र
फलवत्‌ पुरुषाभिप्रायाद्वा गिरेत्पीडयेच्चारागसमाप्तेरिति संगरः पुरुषाभिप्रायात्‌ तद्गिलनात्‌ संगिरणात्‌ संगरः यथार्थं चात्र स्तनग्रहणं नयोगा
त्सौपरिष्टकं स्तनग्रहणनयोगात्स्वतन्त्र औपरिष्टके पि निमितादिकं यथार्थं अन्वर्थं ज्ञेयं कुलटाः स्वैरिण्यः परिचारिकाः संवाहिका अपि नन्य
योजयंति तदेतन्न कार्यं समयविरोधादसभ्यत्वाच्च कुलटाः कुलं सत्का अटंति स्वच्छंदयंति तथा कुलएव स्थित्वा स्वच्छंदरहस्यंति तथा परिचारिकाः

का॰सू॰ अलंकर्त्रीजातीयाः संवाहिकाः पादसेविकाजातीयाः एतत्त्वौपरिष्टकं नाचर्यं सभ्यैः कुतः समयविरोधात् शिष्टाचारविरोधात् असभ्यत्वात् अयोग्यत्वात् जात
५८ प्रायश्चित्तस्मरणं पुनरपि तासां वदनसंसर्गे स्वयमेवार्तिं प्रतिपद्येतेत्याचार्याः स्वयमार्तिमिव आर्तिमपि गत्वा वच्छेदेन वेश्याकामिनो यमदोषा न्यतोऽपि परिहा
र्य इति वात्स्यायनः वेश्याकामिनः विटस्य अयं निमित्तादिः अदोषः अपरिहार्यो दोषः प्रायेण तासां तत्कामित्वात् अन्यतः अन्यत्र तासां अपि स्वर्थः तास्म
द्या औपरिष्टकमाचरन्ति न ताभिः सह संसृज्यन्ते प्राच्याः तस्मात् निन्दितत्वात् याः वेश्याः वेश्याभिरेव न संसृज्यन्ते अहिच्छत्रकाः अहिच्छत्रपुरीनिवासिनः
संसृष्टा अपि मुखकर्म तासां परिहरन्ति निरपेक्षाः साकेतकाः संसृष्टा अपि वेश्याभिः तासां वेश्यानां निरपेक्षाः प्रामाणिकाः साकेताः अयोध्यकाः स्यात् साके
तमयोध्यायामिति कोशात् संप्रयुज्यन्ते न तु स्वयमौपरिष्टकं नागरिकाः संप्रयुज्यन्ते ताभिः स्वयं स्वेच्छया सर्वमविशङ्कया प्रयोजयन्ति सौरसेनाः सर्वं औपरि
ष्टकाष्टकं सौरसेनिकाः तद्देशीयाः एवं देशविशेषविसंवादे स्वयं परिष्करोति एवमित्यादिना एवं ह्याहुः को हि योषितां शीलं शौचमाचारं चरित्रं प्रत्ययं वच
नं वा श्रद्धातुमर्हति निसर्गादेव हि मलिनहृदया एता न परित्याज्याः तस्मादासां स्मृतित एव शौचमन्वेष्टव्यं एवं ह्याहुः वत्सः प्रस्रवणे मेध्यः श्वा मृगग्र
हणे शुचिः शकुनिः फलपाते शुचिः स्त्रीमुखं रतिसंगमे इति शिष्टैरपि प्रतिपत्तेः स्मृतिवाक्यस्य चसावकाशत्वाद्देशस्थितेरात्मनश्च प्रकृतिप्रत्ययानुरूपं प्रव ५८
र्तेतेति वात्स्यायन आहुः पांचः शीलं स्वभावं शौचं शुचित्वं आचारं प्रवृत्तिं चरित्रमनुष्ठानं प्रत्ययं निश्चयं श्रद्धातुं इत्थमेवेति निश्चेतुं कोऽर्हति न कोऽपि

कुतः निसर्गात् स्वभावात् मलिनहृदयः अस्येन अजस्रमाभिः अर्चिताः हि हेतौ एताः स्त्रीयात्वेन खीकृताः स्त्रिय एव न परित्याज्याः नोपेक्ष्याः किं तु यथाभा
वं नोषितव्या इति शेषः तासां शौचं शुचित्वं तु स्मृतितः शास्त्रादेव तस्मात् अनुपेक्षणीयत्वात् अन्वेष्टव्यं ज्ञातव्यं स्मृतिमेवाह एवं हीति आहुः मन्वा
दयः प्रस्रवणे गवां स्तन्यस्रवणे वत्सः तद्वत्स मुखं मेध्यं शुचिः मृगग्रहणे शशादिसंघर्षणे श्वा तन्मुखं फलपातेन छेदने विषये शकुनिः तदास्यं रति
संगमे रतिहेतुः स्त्रीषु शुचि नात्रोच्छिष्टदोष इति भावः शिष्टानां प्रामाणिकानां विप्रतिपत्तेः आचारविसंवादात् स्मृतिवाक्यस्य वस्तदस्यायुक्तत्वस्य सावका
शत्वात् अपांसुलस्त्रीविषयत्वात् देशस्थितेः देशाचारात् आत्मनः स्वस्य चात् तस्याः प्रकृतिः स्वभावः प्रत्ययो अनुरागः अनुरूपं अनुकूलं योग्यं वर्तुं व
नायौपरिष्टकानं प्रवर्तेत कुर्यात् वात्स्यायन इति परौ श्लोकौ ग्रामीजयतीनित्यागल्पस्य सूचनार्थः सुसमृष्टकुण्डलाश्चापि युवानः परिचारकाः केषांचि
देव कुर्वन्ति नराणामौपरिष्टकं परिचारकाः राजसेवकाः अदृष्टीकाः केषांचित् ग्राम्याणामनुकुर्वन्ति कुर्वन्ति तथा नागरिकाः केचिदन्योन्यस्य हितैषि
णः कुर्वन्ति हि कृतविश्वासाः प्रायः परपरिग्रहं नागरिकाः नगरस्था अप्यस्त्रीकाः परपरिग्रहे परपरिग्रह इव परस्परमौपरिष्टकं पुरुषाश्च तथा स्त्रीषु कर्म
तत्किल कुर्वन्ति व्यासतस्य तु विज्ञेयो मुखचुंबनवद्विधिः तस्य औपरिष्टकस्य स्त्रीपुंसप्रयोज्यस्य व्यासः विभक्तः भेदः भिन्नः मुखचुंबनवत् स्त्रीपुंप्रयोज्य
मुखचुंबनस्येव विधिः अनुष्ठानप्रकारः एवं उपर्यधोभेदेन तत्भेदमुक्तासिंहावलोकनन्यायेन तृतीयं रतमाह परिवर्तितदेहौ तु स्त्रीपुंसौ यत्परस्परं रते

युगपत्संप्रयुज्येते वा किलः स विलोच्यते परिवर्तितदेहौ पार्श्वे स्थिताविसर्गः शिष्टविप्रतिपत्तेरित्यादिना सूचितमौपरिष्टकनिषेधं विशदयति त
स्मादित्यादिना तस्माद्गुणवतस्तत्र चतुरं त्यागिनो नरान् वेश्याः खलेषु रज्यंते दासहस्तिपरेषु च गुणवतः सौंदर्यादिमतः चतुरश्च कलाकुशलान
पि त्यागिनः औपरिष्टकस्य जनानुशिष्यान् खलेषु अपवित्रेषु न त्वेवं ब्राह्मणो विद्वान् मंत्री वाक्यविशारदः गृहीतप्रत्ययो वापि कारयेदौपरिष्टकं ए
वं शिष्टगर्हितमौपरिष्टकं विद्वान् विवेकी ब्राह्मणः तदादिः वाक्यविशारदः मौतित्तः मंत्री जातस्तैरो वा गृहीतप्रत्ययः अतिगण्यापि न कारयेत् न कुर्यात्
न त्वेतस्यादिशास्त्रं व्यवस्थापयति न शास्त्रमस्तीत्येतावत्प्रयोगकारणं भवेत् शास्त्रार्थान्व्यापिनो विद्यात्प्रयोगांस्त्वेकदेशिकान् प्रयोगं प्रत्युष्टा न शा
स्त्रं सामान्यशास्त्रमेतावत् एतावन्मात्रं भवेत् कुतः शास्त्रार्थान् सामान्यशास्त्रप्रतिपाद्यान् व्यापिनः अव्यवस्थया प्रतीयमानान् प्रयोगान् शिष्टानुष्ठा
नानि एकदेशिकान् व्यवस्थितान् विद्यात् जानीयात् तत्र दृष्टांतमाह रसवीर्यविपाका हि श्वमांसस्यापि वैद्यके कीर्तिता इति किं तन्मान्दक्षणीयं
विचक्षणैः श्वमांसस्य रसः विशेषः वीर्यं तद्दर्पने विपाकः औदर्यवर्धनं आदिशब्देन शरीरपुष्टिः विचक्षणैः शिष्टैः भक्षणीयं किं न भक्षणीयमेवेत्य
र्थः तस्य श्वपाकादिविषयत्वात् तेषां गतिमाह संति एव पुरुषाः केचित्संति देशास्तथाविधाः संति कालाश्च येष्वेते योगा न स्युर्निरर्थकाः पुरुषा अप ५५
वित्राः देशास्तथाविधाः कालास्तेषामेव रागोद्रेककालाः योगा औपरिष्टकादयः उपसंहरति तस्माद्देशं च कालं च प्रयोगं शास्त्रमेव च आत्मानं

चापि संप्रेक्ष्य योगान्युंजीत वा न वा तस्मात् निंदितत्वात् देशं निंदितानिंदितं कालं च तथा प्रयोज्यान् तथाविधो शास्त्रं व्यवस्थितं काले पवित्रापवित्रादिस्वरू
पं संप्रेक्ष्य पर्यालोच्य योगान्युंजीत वा औपरिष्टकादीन् अर्थस्यास्य रहस्यत्वाच्चलत्वान्मनसस्तथा कः कदा किं कुतः कुर्यादिति को ज्ञातुमर्हति अस्य व्यव
स्थितस्य रहस्यत्वात् शास्त्रगम्यत्वात् कः पुमान् कदा काले किं कर्म कुतः कुतश्चिद्धेतोः अन्यः इदं औपरिष्टकं सर्वसाधारणेन निषिद्धमिसेव घोषित
व्यमिसर्थः इति श्रीकामिपदवाक्यमानतत्त्वभास्करनरसिंहशास्त्रिकृतवात्स्यायनसूत्रवृत्तौ द्वितीयेऽधिकरणे नवमोऽध्यायः ९ एवं बाह्याभ्यंतरंनयरतमु
क्तः नेनरकर्तव्यमुपदेष्टुं प्रयोगसौकर्यार्थं सर्वं संक्षेपेणानुवदति नागरिक इत्यादिना नागरिकः सह मित्रजनेन परिचारकैश्च कृतपुष्पोपहारे सं
चारितसुरभिधूपे रत्यावासे प्रसाधिते वासगृहे कृतस्नानप्रसाधनां युक्त्या पीतां स्त्रियं सांत्वनैः पुनः पानेन चोपक्रमेत दक्षिणतोऽस्याः उपवेशनं केशहस्ते व
स्त्रांते नीव्यां वा अवलंबनं स्पर्शं सव्येन बाहुना उद्भूतः परिष्वंगः पूर्वप्रकरणसंबद्धैः श्लेषपरिहासानुरागैर्वचोभिरनुवृत्तिः गूढाश्लीलानां च वस्तूनां
समस्यया परिभाषणं सनृत्तमनृत्तं वा गीतवादित्रं च कलासु संकथा पुनः पानेन चोपच्छंदनं जातानुरागायां च कुसुमानुलेपनतांबूलदानेन शि
ष्टजनविसृष्टिः विजने च यथोक्तैरालिंगनादिभिरेनामुद्धर्षयेत् ततो नीवीविश्लेषणादि यथोक्तमुपक्रमेत इत्ययं रतारंभः नागरिकः कृतः पुष्पोप
हारः पुष्पशय्या यस्मिन् संचारितः प्रसारितः सुरभिधूपः सुगंधिधूपो यस्मिन् रत्यावासे रतिः रतिसाधनं आधीयते यस्मिन्निति रतिसाधनं प्रसा

का॰सू॰ धिते विनानतोरणाद्यलंकृते वासगृहे केलीगृहे स्नानमज्जनं प्रसाधनं नेपथ्यं कृते तेयया ताम् आपीतां ईषत्पानेन मत्तां आर्यां स्त्रियं मित्रजनेन परिचारकैश्च
५६ सहयुक्ताहासे स्वरणादिकासांत्वनैः मधुरवचनैः पुनः पानेन सह पानेन चर्वणं तांबूलादिदानेन उपक्रमेत क्रमेणावशीनयेत् इत्सिराणतः दक्षिणाभागे उपवेशनं
स्वस्याः स्थितिं कुर्यात् तस्याः केशहस्ते केशेषु हस्तयोर्वा रसार्थं हस्तुरतार्थे अवलंबनं खरस्पर्शसंयोजनं अनुद्धतः अगाढः परिष्वंगः आलिंगनं च एवं
प्रकरणसंबद्धः प्रकर्षेण क्रियत इति प्रकरणं अधिकरणेन संबंधैः प्रतिपादितैः अनुवृत्तिः तस्याः वशीकरणं रहस्यं अश्लीलं क्रीडाकरं वस्तु नाना
हृश्यार्थे प्रतिपादकानां समस्यया एकदेशेन सन्तं सांभिनयं गीतं स्वरसंदोहः वादित्रे गानकालपरिच्छेदकाताय घ्वनिः उभयं च कारयेत् कालेषु भ्र
तकालेषु अवस्थासु वा स्वाद्यवस्थासु स्वस्था अन्येषां वासेकथाविनोदकं चरित्रप्रतिपादनं पानेन पायनेन उपच्छंदनेन उन्मादनेन जातानुरागायां लिंगे हृद्यका
नुरागवत्तया तातायां सस्यां कुसुमेतन्माला अनुलेपनं चंदनं तांबूलं सोपस्करं रसपत्राणि एतेषां दानेन शेषजनानां नृत्तगीतादिप्रवृत्तानां मित्रदा
सादिजनानां च विसर्गैः प्रस्थापनं ततः विजनेन द्विनरजनरहिते देशे यथोक्तैः पंचमाध्यायोक्तैरालिंगनादिभिः गाढालिंगनचुंबननखक्षता
दिभिः उद्धर्षयेत् समर्दयेत् वाह्यरतं कुर्यादित्यर्थः ततः वाह्यरतेनासंतरागोद्रेके सति यथोक्तं सप्तमाध्यायोक्तं अधोरत्नादिकर्मान्तरमुपक्रमे ५६
त् कुर्यादित्ययं रतारंभः रतमारभ्यते एभिः साधनैरिति रतारंभेण साधनानि रमिउकरीत्यात्तेया एवंप्रयोगवचनमुक्तं प्रकृतं रतावसानिकमाह

आवसानिकं रागमतिवाह्यासेसुतयोरिव सव्रीडयोः परस्परमपश्यतोः पृथक्पृथक्बहिर्भूमिगमनं आवसानिकं धानुक्षरणांते रागं रागहेतुरतं अ
तिवाह्य परिसमाप्य असंसुतयोः अपरिचितयोरिव सव्रीडयोः परस्परस्वनिरीक्षणं हीमतोः अतएव परस्परमपश्यतोः पृथगेकपृथक्प्रसेकं बहिर्भू
मिगमनं केलीगृहात् भिन्नवास्यप्रदेशगमनं भवति प्रतिनिवसे च व्रीडामायेनयोः इह चित्तदेशोपविष्टयोः तांबूलग्रहणमच्छीकृतं चंदनमन्यद्वानुले
पनं तस्या गात्रेषु स्वयमेव निवेशयेत् प्रतिनिवसे पादक्षालनादिकं कृत्वा व्रीडायमानयोः व्रीडितायि वाचरतोः रुचिरदेशोपविष्टयोः सम्मर्दगंधवहत्व
दयान्तं देशस्थयोः सजोः तांबूलग्रहणं तच्चर्वणं ततो नायकः अच्छीकृतं कर्पूरादिना अतिशीतलीकृतं अन्यद्वानुलेपनं रक्तागवीरितस्याः नाथिकाया
गात्रेषु निवेशयेत् अनुलेपयेत् सव्येन बाहुना परिष्वज्य चषकहस्तः सांत्वयन् पाययेत् बाहुनास्वस्य चषकहस्तः दृष्टकरगृहीतपानपात्रः सांत्वयन् मधुमधुरा
लापैर्लोलयन् जलानुपानं च खंडखाद्यकम् अन्यद्वा सात्म्ययुक्तं स्वभावयुक्तमुपयुंजीयातां एलोशीरादिवासितशीतोदुपानं खंडखाद्यकं दृष्टखंडादिकं अन्यद्वा
केलीफलादिकं सात्म्ययुक्तं स्वभावानुगुणं उभौ युवानौ उपयुंजीतां यां भुंजीयातां अच्छरसकं यूषमम्लं यवागूं भृष्टमांसोपदंशानि पानकानि चूतफला
नि शुष्कमांसं मातुलुंगचुक्रकाणि सशर्कराणि यथादेशसात्म्यं तत्र मधुरं मिदं मृदु विशदमिति च विदश्य तत्तदुपाहरेत् अच्छरसकं सुगंधवासितमधुरं यूषं
पक्वमुद्गादिरसं अम्लां जंबीरं वीरादिरसप्लक्तांय वागूं दनरसं पानकानि द्राक्षादिफलोदकानि मातुलुंगचुक्रकाणि बीजपूरत्वचः यथादेशसात्म्य

का.सू. देशस्वभावानुसारेण तत्र उक्तवस्तुमध्ये तत्तद्वस्तुविदग्धस्वयमध्ये स्वाल्लादं इदं वस्तु मधुरं इदं मृदु कोमलं इदं विशदं समीचीनमिति चात्र निर्दिश्य उपाहरेत्
५७ स्वादयेत् हर्म्यतलस्थयोः ऊर्ध्वे स्थितयोर्वा चंद्रिकासेवनार्थमासनं हर्म्यतलस्थयोः चंद्रशालामध्यसंस्थितयोः ऊर्ध्वप्रासादोपरि आसनमुपवेशनं तत्रानु
कूलाभिः कथाभिरनुवर्तनं अनुकूलाभिः मनोरमाभिः अनुवर्तनं अन्योन्यानुरंजनं तदंकलीनायाश्चंद्रमसं पश्यंत्यास्तस्य नक्षत्रपंक्तिव्यक्तीकरणं अरुंधती
ध्रुवसप्तर्षिमालादर्शनं चेति रतावसानिकं तदंकलीनायाः लोकोपविष्टस्य बाहुसंश्लिष्टायां व्यक्तीकरणं तत्तन्नाम्ना ख्यापनं दर्शनं प्रदर्शनं रतावसानिकं
रतां लग्नहृन्निवर्तकं तत्रैतद्भवति तत्रास्मिन्नर्थे एतत् गृह्णीयात् अवसानेपि च प्रीतिरुपचारैरुपस्कृता सविस्रंभकथायोगै रतिं जनयते परां अवसाने
रतस्यापि रागो च वान्मध्ये उपचारैः उक्तलक्षणाचरणैः उपस्कृता वर्धिता सविस्रंभकथायोगैः सानुरागप्राचीननायकगोष्ठीभिः प्रीतिः रागः परां चिरस्था
यिनी उत्कमेव विस्तृणोति परस्परप्रीतिकरैः आत्मभावानुवर्तनैः क्षणात्क्रोधपरावृत्तैः क्षणात्प्रीतिविलोकितैः हल्लीसकक्रीडनकैर्गायनैर्लाटरासकैः
रागलोलार्द्रनयनैश्चंद्रमंडलवीक्षितैः आद्ये संदर्शने जाते पूर्वेयैः सुमनोरथाः पुनर्वियोगे दुःखेन तस्य च प्रकीर्तनैः कीर्तनांते च रागेण परिष्वंगैः स
चुंबनैः तैस्तैः स्वभावैः संसक्तैर्यूनोः स्नेहो विवर्धते इति आत्मभावानुवर्तनैः अन्योन्यस्वभावानुसरणैः क्रोधपरावृत्तैः प्रणयकलहेन परस्परानिरीक्ष ५७
णैः हल्लीसकक्रीडनकैः रासक्रीडाभिः गायनैः गानैः लाटरासकैः देशविशेषक्रीडनैः रागलोलार्द्रनयनैः पानरक्तलज्जालोलानुरागार्द्रनिरीक्षणैः

क्रोधपरावृत्तैः प्रणयकलहेन परस्परानिरीक्षणैः हल्लीसकक्रीडनकैः रासक्रीडाभिः गायनैः गानैः लाटरासकैः देशविशेषक्रीडनैः रागलोलार्द्रनयनैः पान
रक्तलज्जालोलानुरागार्द्रनिरीक्षणैः तस्य सर्वस्य प्रतिकीर्तनैः अन्योन्यकथनैः कीर्तनांते उक्तकथनांते स्वभावैः प्रकृत्यनुगुणैः संसक्तैः चेष्टाभिः एवं रता
वसानिकं परिसमाप्य रतानामेव सिंहावलोकनन्यायेन कालप्रयोज्यविशेषाभ्यामिदमाह रागवत् आहार्यरागं कृत्रिमरागं व्यवहितरागं पोटारतं खल
रतं अपि त्रिनरतमिति रतविशेषाः तेषां क्रमेण लक्षणान्याह संदर्शनात्प्रभृत्युभयोरपि प्रयत्नकृते समागमे प्रवासप्रत्यागमने कुपितप्रसन्नायाश्च रा
गवत् संदर्शनप्रभृति रागपूर्वकपरस्परनिरीक्षणमारभ्य यत्नलब्धे प्रवासप्रत्यागमने प्रोषितस्य पुनरागमनानंतरभाविनि कुपितप्रसन्नायाः प्र
णयकुपितासतीया प्रसन्ना तस्याः संबंधिनि समागमे रतेरागवत् प्रतिरागजन्यत्वाद्रागवदिति संज्ञा भवति तत्रात्माभिप्रायाया यावदर्थं च प्रवृत्तिर्मध्य
स्थरागयोरारब्धं यदनुरक्ते तदाहार्यरागं तत्र रते आत्माभिप्रायं स्वेच्छापर्यंतत्वात् यावदर्थं धातुक्षयपर्यंतं वा मध्यस्थरागयोः उपक्रमे मंदरागयोर्यूनोः र
ते वारब्धे जाते अनुरागोद्रेके सति यत् अंतरा रतं आरब्धं तत्रितयं वच्छिकलादाहार्यरागं तत्र चातुःषष्टिकैर्योगैः सात्म्यानुविद्धैः संधुक्ष्य संधुक्ष्य रागं प्र
वर्तयेत् यत्कार्यहेतोरन्यत्रसक्तयोर्वा तत्कृत्रिमरागं तत्र समुच्चयेन योगान्शास्त्रतः पश्येत् चातुःषष्टिकैः चुंबनाद्यैर्बाह्यैः अत्र स चतुःषष्टिप्रकरणो
क्तैर्वा योगैः सात्म्यानुविद्धैः उभयोरपि स्वभावानुसारेण प्रयुक्तैः योगैः साधनैः रागप्रीतिं संधुक्ष्य संधुक्ष्य संधुक्ष्य अतिशयेन वर्धयित्वा तत्र रते प्रवर्त

वा॰र॰ येन प्रवर्तनं निमित्तभूतं कार्यहेतोः कार्यान्तरवशात् अन्यत्र कार्यान्तरे सक्तयोः आसक्तमनसोर्यूनोः यत्र प्रवृत्तिः तद्वा कृत्रिमत्वात्कृत्रिमरागः तत्र क्रमरा
५८ गयोगान् चतुःषष्ट्यात्मकान् शास्त्रतः तदनुसारेण पश्येत् प्रयुञ्ज्यात् पुरुषस्तु तद्दयिताम् अन्यां मनसि निधाय व्यवहरेत् स प्रयोगात् आरभ्य रतिं
यावद्यत्र तद्भावविहितकरणं पुरुषस्तु पुमानेन च तद्दयितां प्रियां हृतोऽपि तां प्रियां निधाय ध्यायन् प्रयोगप्रभृति वा सुरतिमारभ्य रतियावत् रागपरिसमाप्तिप
र्यन्तं यत्र तेन व्यवहरेत् प्रवर्तयेत् मनोऽप्यवधानात् तथा स्वरूपतायां पीठविकायां वा यावदर्थं प्रयोगस्तस्याः कारणं न्यूनायां लोपश्च या न्यूनजातिसुसन्नायां प
रिचारिकायां राजादेः यावदर्थं धनलाभपर्यन्तं प्रयोगः संप्रयोगः तदुद्धर निमित्तत्वात् तस्याख्या तत्रोपचारान्नाद्रियेत तत्र योषाणामुपचारान् चतुःषष्टियोगा
न्नाद्रियेत न नातिकुर्यात् तासां तादृशप्रीत्यहेतुत्वादित्यर्थः तथा वेश्या ग्रामिणीभिः सह यावदर्थं खलरतं तथाप्यनुः राजकीयायां वेश्यायां ग्रामीणेन
ग्रामाधिपतिना सह यावदर्थं धनलाभावधि यद्रतं तत् खलरतकं खलत्वात् तदाख्यं ग्रामव्रजप्रसंगतयोषित्सु नागरिकस्य ग्रामः नगरादीषदन्तः व्र
जोऽल्पजनाश्रयः तयोः प्रत्यासन्नाः स्वस्थानसमीपवर्तिन्यः नागरिकस्य वा यद्रतं तदपि खलप्रयोजकत्वात् तदाख्यं उत्पन्नविस्रम्भयोश्च परस्परस्यात्मा
नुकूल्यादयंत्रितत्वमितिरता निपातस्य रसात्म्यानुकूल्यात् यूनोरन्योन्यस्वभावैक्यात् उत्पन्नविस्रम्भयोः अनन्तिवत्तेन लब्धानुरागयोः यद्रतं तत्प्रय ५८
त्नलब्धत्वात् तदाख्यं हृतितरतानि एवं प्रासंगिकं परिसमाप्य नवदर्शनादिविनोदैः निरन्तररतिखेदयोः पुनारम्भाय रागोद्दीपकं प्रणयकलहाख्यं

कर्माह वर्धमानप्रणयात्तु नायिका सपत्नीनामग्रहणं तदाश्रयमालापं गोत्रस्खलितं वा न मर्षयेत् वर्धमानप्रणया क्रमशो वर्धिष्यमाणप्रीतिमती
अनुनायिका उपनायिका सपत्नी नाम ग्रहणं प्रच्छन्नरागत्वान्नायिकां तस्या नामोच्चारणं युवकर्तृकं तदाश्रयं सपत्नीविषयं गोत्रस्खलितं वा अभ्यासात्तन्नाम
कथनं वा न सहेत नायकव्यलीकं च नायकस्यात्र सुभ्रंशे कलहः तत्र तदा सुभ्रंशे सुकुमन्दुभ्रंशे च कलहः कार्यः तमेवाह रुदितमायासः शिरोरु
हाणामवक्षोदनं प्रहणनमासनात् च्युतनाच्च्युतनात् भूमौ शय्याप्रपतनं माल्यभूषणावमोक्षो भूमौ शय्या च आयासः प्रतिनिश्वासः अवक्षोदनं प्रकिरणं
प्रहणनं उरसः नायकः कृत्यमाह तत्र युक्तरूपेण साम्ना पादपतनेन वा प्रसन्नायां सानुनयमुपक्रम्य शयनमारोहयेत् तत्र तदा युक्तरूपेण तत्कालो
चितेन साम्ना प्रियवचनेन उपक्रम्य उद्धृत्य शयनं शय्यां तस्य च वचनमुत्तरीयेण योजयन्ती विरुद्धक्रोधा सकचग्रहणमस्यास्यमुन्नमय्य पादेन वाहौ शिर
सि वक्षसि पृष्ठे वा सकृद्बहिरवहत्य यावद् द्वारदेशं गच्छेत् ततोऽत्रोपविश्याश्रुकरणं अतिक्रुद्धापि द्वारदेशान्न योगाच्छेत् दोषवत्वादिति दत्तकः उ
त्तरीयेण तदीयेन तत्र युक्तितोऽनुनीयमाना प्रसादमाकांक्षेत् तत्र तदा युक्तितउपायेन आकांक्षेत् कुर्यात् प्रसन्नापि तु सकषायैरेव वाक्यैरेनं नुदेत्
सकषायैर्वसेर्ष्यैरप्रसन्नेव रतिकांक्षिणीं परिरम्भेत् तदुक्तोऽसो दृष्ट्वा प्रसादितां परिरम्भेत् संश्लिष्य शय्यां प्रापयेत् स्वभवनस्थानुमितिनि तात्कलहिता
तथाविधचेष्टा नायकमभिगच्छेत् अथवा निमित्तात् उत्कान्त कलहितात् तथाविधचेष्टेव विकोलकेशादिः सैव स्वभवनस्थाल्लवासगृहान्तरस्था सती नाय

वा॰सू॰ कं नाभिगच्छेत् तत्र पीठमर्दविटविदूषकैर्नायकप्रयुक्तैरुपशमितरोषा तैरेवानुनीता तेनैव सह तद्भवनमभिगच्छेत् तत्र स्वगृहे नायकप्रयुक्तैः तैः प्रेषितैः
५९ पीठमर्दादिभिः पूर्वोक्तलक्षणैः प्रशमितरोषा तेन नायकेन च अनुनीता तेनैव सह तत् भर्तृगृहं नायकगृहं तत्रैव वस्तव्यं वसेदिति प्रणयकलहः तत्रैव नायकगृहए
व वसेत् निवसेत् पीठमर्दादीनां कलहप्रशमनप्रागल्भ्यं सूचयन् तद्धेतु चतुःषष्टिविद्याभ्यन्वयव्यतिरेकाभ्यां स्तौति एवमित्यादिना एवमेतां चतुःषष्टिं वा
भ्रव्येण प्रकीर्तितां प्रयुंजानो वरस्त्रीषु सिद्धिं गच्छति नायकः ब्रुवन्नप्यन्यशास्त्राणि चतुःषष्टिविवर्जितः विद्वत्संसदि नात्यर्थं कथासु परिपूज्यते वर्जितोऽप्यन्यविद्या
भिरनया यस्त्वलंकृतः स गोष्ठ्यां नरनारीणां कथास्वग्रं विगाहते विद्वद्भिः पूजितामेनां खलैरपि सुपूजितां पूजितां गणिकासंघैर्नंदिनीं को न पूजयेत् नंदिनी
सुभगा सिद्धा सुभगंकरणीति च नारीप्रियेति चाचार्यैः शास्त्रेष्वेषा निरुच्यते कन्याभिः परयोषिद्भिर्गणिकाभिश्च भावतः वीक्ष्यते बहुमानेन चतुःषष्टिविचक्षणः
एतां पूर्वोक्तां अन्यानि शास्त्राणि तरणि प्रसंगे ग्रेष्यं नंदिनी प्रयोक्तुरानंदिनी सुभगा स्यात् तु मेनोरमा सिद्धा अप्रयोजितवश्यहेतुः सुभगंकरणी इति श्रीकविपरखाका
मानतल्लन्नकाशीपतासिमारकरनरसिंहशास्त्रिविरचितवात्स्यायनसूत्रवृत्तौ द्वितीयेऽधिकरणे दशमोऽध्यायः १० समाप्तं चेदं सांप्रयोगिकं द्वितीयमधिकरणं
एवं त्वारख्यसुखानुभेदूत्वांरत्नं सप्रपंचं निरूप्य तत्कारणभूतं कन्याविभावाख्यं सप्रपंचं निरूपयिष्यन् तत्रापि पुत्राद्यानुषंगिकानेकफलहेतुतया अभ्यर्हिततमं
पत्न्याख्यविभावं निरूपयामीति सूचयितुं तस्य पुत्राद्यनेकफलहेतुत्वं पूर्वोक्तमनुवदति सवर्णायामनन्यपूर्वायां शास्त्रतोऽधिगतायां धर्मोऽर्थः पुत्राः संबं ५९

धः पक्षवृद्धिरनुपस्कृता रतिश्च सवर्णायां सजातीयायां अनन्यपूर्वां अन्यापरिगृहीतायां शास्त्रतः विवाहसंस्कारेणाधिगतायां लब्धायां संप्रयोगः कृ
तश्चेत् धर्मोऽपत्यपायः यत्तादि वीजप्रपूः यशः संबंधः सजातीयानुबंधः पक्षवृद्धिः वंशाभिवृद्धिः अनुपस्कृता वलवदनिष्टाननुवद्धा रतिरानंदानुभवः
चाहु द्रूपकारः भवति तस्मात्कन्यामभिजनोपेतां मातापितृमतीं त्रिवर्षात्प्रभृति न्यूनवयसं श्लाघ्याचारे धनवति पक्षवति संबंधिप्रिये संबंधिभिराकुले कु
ले प्रसूतां प्रभूतपितृपक्षां रूपशीलक्षणसंपन्नामन्यूनाधिकाविनष्टदंतनखकर्णकेशाक्षिस्तनीमरोगप्रकृतिशरीरां तथाविध एव श्रुतवान् शी
लयेत् अभिजनोपेतां सुप्रसिद्धकुलीनां त्रिवर्षात्प्रभृति दशवर्षाधिन्यूनवयसं स्वस्मात् श्लाघ्याचारे वैदिकाचारसंपन्ने पक्षवति पुत्रपौत्रसंपन्ने संबंधिप्रि
ये संबंधिषु पुत्रदुहित्रादिषु रागवति संबंधिभिः सात्विभिः आकुले विततप्रभूतपितृपक्षां प्रवृद्धपितृवंशां रूपसौंदर्यशीलसद्वृत्तिः लक्षणविपुलनेत्रादिश्रुत
वान् चतुःषष्टिविद्यासंपन्नः शीलयेत् परिणयेत् यागशीलाकृतिनमात्मानं मन्येत यस्यां प्रीतिस्तां वृणीतेति पूर्वेणान्वयः न च संयुक्तामन्यैर्नियात तस्यां प्रवृत्ति
रिति घोटकमुखः अन्यैः पूर्वं संयुक्तां परिगृहीतां न च शीलयेत् कुतः तस्यां परगृहीतायां तस्या वरणे माता पितरौ संबंधिनश्च प्रयतेरन् तस्याः स्वप्रीतिवि
षयायाः वरणे कन्याप्रयोगयाश्च न विषये मित्राणि च गृहीत्वा वाक्यानुभयसंबद्धानि तान्यन्येषां वरयितृणां दोषान्प्रसक्तानागामिकान् सुलक्षणं श्रावयेयुः गृहीतवाक्या
नि विश्वसनीयवचनानि उभयसंबद्धानि कन्यावरसंबंधिनिमित्राणि वरस्य अन्येषां वाभिमतानपि वृणां पित्रादीनां आगामिकान् सुलक्षणांश्च दुःखंचनानि

का॰सू॰
६०
नाधिकमातापित्रादीन्प्राप्य कौलान्पुरुषानभिप्रायसंवर्धनान्नौश्च नायकगुणान्विशेषतश्च कन्यामातुरनुकूलांस्तदाप्तायतियुक्तान्दर्शयेयुः कौलानुरूपं
शापरं परासिद्धां पौरुषान्विद्याविनयादीन् अभिप्रायसंवर्धनान् वध्रूमात्रादेर्वेत्तानुगुणावर्धकान् नायकगुणान्विद्याविनयरूपशीलादीन् अनुकूलादीन्
धनकुशलतादीन् तदाप्तायतियुक्तान् तात्कालिकानाविसंवादसत्यकाम प्राप्तियुक्तान् नायकगुणान् तद्गुणबोधकवाक्यानि दर्शयेयुः ब्रूयुः दैवचिंतकरूप
श्च शकुननिमित्तमहाबललग्नतत्रलक्षणदर्शनेनोयकस्यभविष्यंतमर्थसंयोगं कल्याणमनुवर्तयेत् दैवचिंतकरूपः ज्योतिःशास्त्रज्ञः शकुनंमा
विसखसरूवकविप्रयुग्मादिदर्शनं निमित्तं तत्सचकदक्षिणाक्षिस्फुरणादि महाबललग्नं केंद्रकोणादिस्थितगुरोर्दिमल्लग्नोसततिनसत्रमदित्याद्या
युसलिलक्षणं विशालाक्षित्वादि एतेषां दर्शनैः पर्यालोचनेन अर्थसंयोगं धनसंपत्तिं कल्याणं पुत्रपौत्रादिसमृद्धिं अनुवर्तयेत् वधूमातापितृनिकटे ब्रू
यात् अपरे पुनरस्यान्यतो विशिष्टेन कन्यालाभेन कन्यामातरमुन्मादयेयुः अपरे वरसंबंधिनः विशिष्टेन शीलसंपत्तादिगुणवतः अन्यतः अस्मादन्यकु
लात् अस्य वरस्य कन्यालाभेन कन्या लभ्यत इति कथनेन उन्मादयेयुः शीघ्रप्रदाने प्रोत्साहयेयुः दैवनिमित्तशकुनोपश्रुतीनामानुलोम्येन कन्यां वरयेद्द्द
द्याच्च एवं बंधुभिः परस्परानुकूल्ये संपादिते उभयोर्मातापितृभिः दैवं नक्षत्रगणादि निमित्तं मनःप्रसादादि शकुनं परस्परगृहगमनकाले सजलकुंभस ६०
वासिनीयुग्मदर्शनादि उपश्रुतिः तात्कालिकश्रुतवाक्यश्रवणादिः एतेषामानुलोम्येन अनुसारेदद्यात् दातुं निश्चिनुयात् न यदृच्छया केवलमा

त्मात्रोपयमेदितिघोटकमुखः यदृच्छयास्वेच्छया केवलं कुनादिकं विना अत्र विवाहादौ आत्मा वधूवरपित्रादिः नोपयमेत परिणये तु नयते न कन्यादो
षानाह सुप्तामित्यादि नाससुप्तां रुदतीं निष्क्रांतां वरे परिवर्जयेत् अप्रशस्तनामधेयां च दत्तां गुप्तां घोणां पृषतां ऋषभां विनतां विकटां मुंडां शुचिदूषितां
सांकरिकीं राकां फलिनीं पालीं गुल्मिनीं व्यंगां मित्रां अनुजां वर्षीयसीं वर्जयेत् नक्षत्राख्यां नदीनाम्नीं वृक्षनाम्नीं च गर्हितां लकाररेफोपांत्यां च वर
रोपरिवर्जयेत् निष्क्रांतां वरणात्स्वयं गृहात् निर्गतां अप्रशस्तनामधेयां घासश्ल्यादिनाम्नीं दत्तां पुनर्भूं गुप्तां अन्यो हेतो नरक्षितां घोणां चिपिटनासिकां पृषतां वि
न्दुभिः पृषतं ऋषभां पुंस्कंधां विनतां अतिनम्रां विकटां वक्रां मुंडां शिरोरुहस्वल्पां शुचिदूषितां अमंगलप्रायां सांकरिकीं स्त्रीयद्दृत्य परांशां राकिकां रजप
ली एकां चेटीं गुल्मिनीं गुल्मरोगवतीं व्यंगां स्फुटाधिकांगीं मित्रां वयस्यां अनुजां सपिंडां फलिनीं अभिव्यक्तस्तनीं पालीं शारवंतीं गर्हितां निंदितगुणां लकाररे
फोपांत्यां तदुपांत्यनाम्नीं यस्यां नायकस्य मनश्चक्षुषोर्निबंधस्तस्यामृद्धिर्नेतरामाद्रियेतेत्येके निबंधः रागपूर्वकसंबंधः नाद्रियेत न गृह्णीयात् एके आप
स्तंबादयः तस्मात्प्रदानकाले कन्यामुदारवेषां दर्शनविषये स्थापयेयुः तस्मात् स्थापयेदिमतीनो निषिद्धत्वात् प्रदानकाले वरणकाले उदारवेषां अलंकृतां
दर्शनविषये नेपथ्यप्रदेशे आपराह्णिकं नित्यप्रसाधितायाः सखीभिः सहक्रीडायज्ञविवाहादिषु जनसमवायेषु प्रायत्निकं दर्शनं नित्यप्रसाधिता
याः अपराह्णे नित्यमलंकृतायाः क्रीडा क्रीडाकाले आपराह्णिकं तात्कालिकं यज्ञविवाहादिषु जनसमुदायेषु चांसाना प्रायत्निकं यत्नपूर्वकं दर्शनं

वा॰सू॰ कार्येत पोत्सवेषु च उत्सवेषु देवतानां तथा दर्शनं कार्यं कुतः पण्यसधर्मत्वात्कन्यानां पण्यं पत्रक्रय्यं तत्सधर्मत्वात् तत्तुल्यत्वात् तथैव परीक्ष्यमाणत्वादिति यावत्
६१ वरणार्थमुपागतांश्च भद्रदर्शनान्प्रदक्षिणवाचश्च तत्संबंधिसंगतान्कुलपुरुषान्मंगलैः प्रतिगृह्णीयुः कन्यां चैषामलंकृतामन्यापदेशेन दर्शयेयुः दै
वं परीक्षमाणावधिं स्थापयेयुः अप्रदाननिश्चयात् वरणार्थं कन्याप्रार्थयितुं उपागतान् स्वम् हे भद्रदर्शनान् सौम्यदृष्टीन् प्रदक्षिणवाचः कल्याणवक्तॄन्
तत्संबंधिसंगतान् सुहृद्भिः संबंधिभिः बंधुभिश्च सहागतान् कुलपुरुषान् वरपित्रादीन् मंगलैर्गंधताम्बूलादिभिः प्रतिगृह्णीयुः पूजयेयुः अन्यापदे
शेन कार्यांतरव्याजेन तैर्दृष्टा यां तस्याः पित्रादयः अप्रदाननिश्चयात् निश्चितदानसिद्धिपर्यंतं दैवं वेश्वारं परीक्षणाद् इच्छामात्रत्वाद्दृष्टः अवधिं नियामकं स्था
पयेयुः ब्रूयुः स्नानादिषु च नियुज्यमाना वरयितारं सर्वं भविष्यतीत्युक्त्वा तदहरेवाभ्युपगच्छेयुः दैवप्रवृत्तिसाध्याहि वरयितारः कन्यावरणार्थाः स्नानादि
षु वरस्य स्नानकर्मोदानादिकर्तव्येषु विषये नियुज्यमानाः वधूपित्रादित्तापिताः संतः अभ्युपगच्छेयुः स्वगृह्योक्ताभ्युदयिकं कर्म कुर्युः देशप्रवृत्तिर्दे
शाचारः स्वाल्पसत्कुलाचारः सर्वथा वा कुर्यात् ब्राह्मप्राजापत्यार्षदैवानामन्यतमेन विवाहेन शास्त्रतः स्वगृह्योक्तप्रकारेण परिणयेत् स्त्रीकुर्यात् वरणावि
धानं वरणविवाहोभयप्रकारस्ततः सदृशैरेव कार्याणि अनेन लम्भे नीपित्वाधमैः सम्पन्नैः सहक्रीडाविवाहमंगलानि च समस्याद्याः अन्यैकदेशकथन ६१
तस्वरणाद्याः विवाहमंगलानि विवाहादिशुभकर्माणि सदृशैः सहजातिशीलविद्याधार्यादिभिः समानैरेव कार्याणि उत्तमाधमादिसंबंधाने वाभियु

क्तो तथा विशदयति कन्यां गृहीत्वा वर्तेत प्रेष्यवद्यत्र नायकः तं विद्यादुच्चसंबंधं परित्यक्तं मनीषिभिः प्रेष्यवत् दासवत् यत्र कन्यां गृहे उच्चैः संबंध उच्चैः कृ
द्भिः परित्यक्तं परित्याज्यं स्वामिवद्विचरेद्यत्र बांधवैः स्वैः पुरस्कृतः अश्लाघ्यो हीनसंबंधः सोपि सद्भिर्निंद्यते बांधवैः श्वशुरादिभिः पुरस्कृतः सेवितः सन्
स्वामिवत् राजेव यत्र संबंधे हीनैः संबंधः विवाहः परस्परसुखास्वादा क्रीडा यत्र प्रयुज्यते विशेषयंति चान्योन्यं संबंधः स विधीयते परस्परसुखास्वादा अन्योन्यनि
रपेक्ष सुखानुभवसंबंधिनी क्रीडा परस्परदानप्रतिग्रहादिलीला यत्र विवाहे अन्योन्यं वधूवरसंबंधिनः विशेषयंति सन्मानयंति संबंधः समसंबंधः आगता
वाह कृत्वापि चोच्चसंबंधं पश्चाद्बंधुषु सन्नमेत् न त्वेव हीनसंबंधं कुर्यात् सद्भिर्विगर्हितं उच्चैः उत्तमेन बंधुषु श्वशुरादिषु सन्नमेत् विनीतो भवेत् भार्यालाभ
हेतुत्वमिति शेषः नीचैः कुलाचारहीनैः इति श्रीकविपदवाक्यमानतत्वज्ञकाशीपुरनिवसनिवासि भास्करनरसिंहशास्त्रिकृतवात्स्यायनसूत्रवृत्तौ कन्यासंप्रयु
क्तके तृतीयाधिकरणे प्रथमोध्यायः १ एवं विवाहमुक्त्वा उपजीवकत्वसंगत्यात्ततः कर्तव्यमाह संगतयोस्त्रिरात्रमधःशय्या ब्रह्मचर्यमक्षाराभवणमाहार
स्तथा स्नानं सप्ताहं सतूर्यमंगलस्नानं प्रसाधनं सहभोजनं प्रेक्षासंबंधिनां च पूजनं संगतयोः विवाहसंबद्धयोः कार्यः आसप्ताहमिति छेदः मंगलस्नानं मंगलहे
तुभ्युक्षणपूर्वकं प्रेक्षासंबंधिनां विवाहद्रष्टृबंधुवर्गस्य इति सार्ववर्णिकं इति एतत्सार्ववर्णिकं सर्ववर्णसाधारणं तस्मिन्निशि विजने मृदुभिरुपायैरुप
क्रमेत् तस्मिन्विवाहदिन एव उपायैः मुखनिरीक्षणादिभिः उपक्रमेत् तां वशयितुं त्रिरात्रमवचनमित्याचार्याः त्रिरात्रं विवाहदिनमारभ्य रात्रित्रयावधि।

अवचनेनतूष्णींभाषणारंहोह्यस्मादिवर्जेत्स्थेयमितिकेचिदाचार्याः त्रिरात्रमवचनेहिस्तंभमिवविमनानायकंपश्यंतीकन्यानिर्विद्येद्धोनापरिभवेच्चतृतीयामिवप्रकृ॰
तिमितिबाभ्रवीयाः त्रिरात्रेनस्थेयेतंअवचनेरहसिसंभाषणारहितंनायकस्तंभमिवपश्यंतीअतएवविमनाःनिर्विद्येतूनांसनोत्कृष्टवेशसतीतृतीयाप्रकृ
तिमिवएनंपरिभवेत् अवमंस्यत अतोनोदासितव्यमितिदूषयंति कुतः उपक्रमेद्धिसंभ्येयेवनतु अत्यावर्तसमर्त्तिनैनैतिवात्स्यायनः उपक्रमेत विवाहदिन
एवरहःसंभाषणादिकमारभेत विस्रंभयेत तस्मिन्तु नोविस्रब्धांकुर्यात अस्यवर्चसंचत्न्नचर्ये उपक्रममाणश्चनप्रसह्यकिंचिदाचरेत प्रसह्यबलात्कारे
णकिंचिन्नकिंचिदपिचुंबनादिकुतः कुसुमधर्माणोहियोषितः सुकुमारोपक्रमास्ताह्यनधिगतविश्वासैःप्रसभमुपक्रम्यमाणाः सद्यःसंप्रयोगद्वेषिण्यो
भवंतिपुरुषद्वेषिण्योवातस्मात्साम्नैवोपक्रमेत कुसुमसधर्माणः अतिकोमलचित्ताः अतःसुकुमारोपक्रमाः मंदमंदमनुरंजनीयाः अनधिगतविश्वा
सैः अप्राप्तदृढानुरागैःपुरुषैःप्रसभःवलात् उपक्रम्यमाणाःचुंबनादिषुव्यापार्यमाणाःसद्यःपुरुषद्वेषिण्यःएतादृशनायकविरक्ताः कालांतरेपिसंप्र
योगद्वेषिण्योवाभवेयुः साम्नैवशनैस्तन्मनस्यनुसारेणैवउपक्रमेत अंगनांगालिंगनादौतदेवविशदयतियुक्तयापितुयतः प्रसरमुपलभेततेनैवानुप्रविशे
त् यतःयथायुक्तयाउपायेनप्रसरमवकाशंउपलभेतपामुयात् तेनैवोपायेनअनुप्रविशेत्अनुरंजयेत्तत्प्रियेणवालिंगनेनानतिकालत्वात् तत्प्रिये ६२
णवानायिकाप्रियेणापिआलिंगनेनस्वल्पकालेमदुत्तोयोजयेत् कुतःअचलितकालत्वात्प्रीतेः पूर्वकायेनचोपक्रमोविषह्यत्वात् पूर्वकायेनचमुखे

नैवउपक्रमःपरीरंभस्यकुतःअविषह्यत्वात् सर्वांगालिंगनस्यदीपालोकेविगाढयौवनायांपूर्वसंयुक्ताश्चदीपालोकेदीपयतिमनोअवमितिदीपोयौव
नेनस्यालोकेनरतमभावपरीक्षणायनमानः तस्यांप्रवृद्धयौवनायांसत्यांपूर्वसंयुक्ताःपूर्वोक्तगाढालिंगनादयोभवेयुःनेदानीमितस्यर्थः अंगीकृतप
रिष्वंगायाश्चवदनेनतांबूलदानेतदप्रतिपद्यमानांसांत्वनवाक्यैःशपथैःप्रतियाचितैःपादपतनैश्चग्राहयेत् अंगीकृतपरिष्वंगायाःस्वीकृतोर्ध्वका
यमृदुलाश्लेषायाःसत्याःतांबूलदानेचर्वितैकदेशवीटीप्रदानेअप्रतिपद्यमानांअनंगीकुर्वंतींसांत्ववचनैः मधुरवचनैःशपथैः त्वदधीनत्वप्रतिज्ञानै
श्चसंप्रार्थितप्रतिग्राहयेत् व्रीडायुक्तापियोषिदत्यंतक्रुद्धापिनपादपतनमतिवर्ततइतिसार्वत्रिकं पादपतनंनायकस्यनातिवर्ततेनोल्लंघयेत् तां
बूलदानप्रसंगेनचमृदुविशदमकाहलमास्यचुंबनेविशदंउच्चितंअकाहलंअनतिशब्दंतदालापश्रवणार्थं यत्किंचिदल्पाक्षराभिधेयमजानन्निव
पृच्छेत् अल्पाक्षराभिधेयंस्वल्पपदालपनीयं तत्रनिःप्रतिपत्तिमनुद्वेजयन्सांत्वनायुक्तंवहुशएवपृच्छेत् तत्रतस्यानिष्प्रतिपत्तिंनिरुत्तरां अनुद्वेजयन्
अनिर्भर्त्सयन् तत्राप्यवदंतींनिर्वध्नीयात् तत्रापिभूयःप्रयत्नेपिनिर्वध्नीयात्पादपतनादिनाभूयःप्रार्थयेतसर्वाअपिहिकन्याःपुरुषेणप्रयुज्यमानंवच
नंविषहंतेनतुलघुमिश्रामपिवाचंवदंतीतिघोटकमुखःविषहंतेगृह्णंतिलघुमिश्रांलब्धप्रसरांनवदंतीतिहि निर्वध्यमानातुशिरःकंपेनप्रतिवचनंयोज
येत्निर्वध्यमानापुरुषेणयोजयेत् सूचयेत् कलहेतुनशिरःकंपयेत् कलहेप्राग्नहेत्कलितुकंचित्कालंशिरः तदपिहस्तिकृतिसिमांनिस्तुसितवाकिंतेहंरुचितो

वा॰सू॰ ऽरुचितो वेति पृच्छ्यचिरं स्थित्वा निर्वेध्यमाना तदानुकूल्येन शिरःकंपयेत् इच्छसि दूरानीह चितः दृष्टः स्थित्वा तत्संभीनिर्वेध्यमाना प्रतिवल्लात्कृत्वा नद्यानुकूल्येन
६३ नायकमत्यन्तसारेण प्रपंच्यमाना नानुविवदेत प्रपंच्यमाना नानुविवदेत प्रपंच्यमाना प्रतिसंभाषनिर्वेध्यमाना विवदेत कुप्येत संस्तुता चेत्सखी चानुकूला
मुभयतो विश्रंभामंतरा कृत्वा कथायोजनं तस्मिन्नधोमुखी विहसेत्तांश्चातिवादिनीमधिक्षिपेद्विवदेच्च संस्तुता परिचिता चेत् उभयत उभयोरपि विश्वस्तां
अनुकूलां गोष्ठीचतुरां सखीमंतरा कृत्वा मध्ये नियोज्य कथायोजनं गोष्ठीप्रवर्तनं कुर्यात् तस्मिंश्च कथाप्रसंगे साख्यायिकया माणे नायिका अधोमुखी वि
हसेत् तां सखीमतिवादिनीं प्रियानुरक्त बहुप्रलापिनीमधिक्षिपेत् निराकुर्यात् विवदेत् सा नु परिहासात् सर्वमिदमनयोक्तमित्यनुक्तमपि ब्रूयात् सा
सखी अनुक्तमपि तया नायकं प्रति तत्समसं ब्रूयात् तत्र नाम परिहध्यमानात् स्त्रीमासीत निर्वेध्यमानात् नाहमेवं ब्रवीमीत्यव्यक्तमस्पष्टमन वसितार्थवचनं
ब्रूयात् नायिका च तत्र गोष्ठीविषये अवरुध्यमाना मुखपिधानेन निरुंधंती निर्वेध्यमानात् हि त्वया विमुक्तमिति नायकेन भूयो भूयः पृच्छ्यमाना अनवसि
तार्थं अनिश्चितार्थं ब्रूयात् शनैः नायकं च विहसंती कदाचित्कटाक्षैः प्रेक्षेत सा लापयोजनं तदा कचित्सकृत् कटाक्षैः रागमसृणतिर्यगक्ष्णोः प्रेक्षेत
तं आलापयोजनं नायिकालापयितृव्यापारः जातपरिचया निर्वदंती तत्समीपे याचितं तांबूलं स्रजं विलेपनमिति निदध्यादुत्तरीये वास्य वध्नीयात् ततः ६३
यत्किंचित् जातपरिचया उत्पन्नविश्वासा निर्वदंती अनालपंती सती याचितं तेन इति इत्यादिकं तत्समीपे नायकसमीपे चोवार्थः तथायुक्तामाच्छुरितके

नात्तनमुकुलयोः परिस्पर्शयेत् वार्यमाणश्च त्वमपि मां परिष्वजस्व ततो नैवमाचरिष्यामीति स्थित्वा परिष्वंजयेत् परिष्वजमानः स्वहस्तमानाभि
प्रदेशात्प्रसार्य निवर्तयेत् नायकश्च तथायुक्तां तांबूलादिस्थापनव्यग्रां आच्छुरितकेन नखक्षतविशेषेण स्पर्शयेत् किंचिद्दत्त्वा वार्यमाणः कर
कमलेन तत्कर्मणि निरुध्यमानः सन् परिष्वजस्व सर्वांगेन ततः तदा एवं उत्क्षतं स्थित्वाशयेन परिष्वंजयेत् स्वत एव सर्वांगालिंगन प्रवृत्तां कुर्या
त् परिष्वजमानायाः परिष्वंगव्यग्रायाः आनाभिप्रदेशात् नाभिप्रदेशपर्यंतमेव निर्वर्तयेत् विरमेत् क्रमेणाचैनामुत्संगमारोप्याधिकमधिकमुपक्रमेत्
अप्रतिपद्यमानां च भीषयेत् क्रमेण उत्केन उत्संगं त्वस्य अप्रतिपद्यमानां अधिकमनिच्छंतीमिव स्थितां अहं तावत्खलु दशनपदान्यधरे करिष्यामि स्त
नपृष्ठे च नखदंतपदमात्मनश्च स्वयं कृत्वा त्वया कृतमिति सखीजनस्यैव दर्शयिष्यामि कोमले अधरे स्तनपृष्ठे च दशनपदानि रदनन खांकान् आत्मनश्च
मुखादौ पदं क्षतं स्वयं स्वनखदंतैः कृतं मम मुखादौ सा त्वं किमत्र प्रतिपत्स्यस इति बालविभीषितैर्बालप्रसादनैश्च शनैरेनां प्रतारयेत् अत्र एतादृ
शं वाक्सामन्यतिकृत्वा किं प्रतिपत्स्यसे किं वक्ष्यसि बालविभीषितैः बालमिव भीषणवाक्यैः बालप्रसादनैश्च तमिव लालनवचनैः प्रतारयेत् द्वि
तीयस्यां तृतीयस्यां च किंचिदधिकं विस्रंभितां हस्तेन योजयेत् सार्वांगिकं च चुंबनमुपक्रमेत् द्वितीयस्यां च रात्रौ किंचित्किंचित् विस्रब्धां
अनुकूलितां हस्तेन हस्ताभ्यां योजयेत् सर्वांगस्पर्शेन सार्वांगिकं सर्वांगभवं यथा तथा उपक्रमेत् कुर्यात् ऊर्वोश्चोपरि विन्यस्तपाणिः संवाहनक्रियायां

सिद्धायां क्रमेणोरुमूलमपि संवाहयेत् ऊर्वोः तस्याः संवाहनक्रियायां पादसंमर्दनाद्यैः सिद्धायां स्वेन हस्तायां निवारिते संवारिते संवाहने को दोष इत्याकुलयेदेनां तच्चास्थि
री कुर्यात् निवारिते तया अनुकूलयेत् अंगीकारयेत् तच्च तत्र कर्मणि स्थिरीकुर्यात् निश्चलीकुर्यात् ततः क्रमेण ऊरुमपि तस्याः तत्र सिद्धायां गुह्यदेशाभिमर्श
नं रशनावियोजनं नीवीविमोचनमूरुमूलसंवाहनं तत्र ऊरुमूलसंवाहने सिद्धायां स्थिरीभूतायां ससंपरिवर्तनं विमोचनं संवाहनं पुनः कार्यं ते चास्यान्यापदे
शात् ते उरुचुंबनादयः चाद्यन्येपि त्वाभिमतव्यापाराः अस्य नायकस्य अन्यापदेशात् अन्यत्र कालांतरे परस्पररागाभिवर्धन ह्यपदेशात् अभ्यासाय भवं
ति न त्वकाले युक्तयंत्रारं जयेत् न तु युक्तयंत्रीं अप्रौढां अत एवायोग्यकाले न रंजयेत् न प्रयुंज्यात् रतद्वेषापत्तेः शास्त्रविरोधाच्चेति भावः किंतु अनुशिष्या
च्च गता मुत्तरकालोपयोगितया शिक्षयेत् चात् अनुरागवतीं कुर्यात् आत्मानुरागं दर्शयेत् आत्मानुरागं आत्मनस्तस्यामनुरागं प्रदर्शयेत् प्रकटयेत् म
नोरथांश्च पूर्वकाननुवर्णयेत् पूर्वकान् परिणयपूर्वकालिकान् मनोरथान् परस्परखेलनवांछाः अनुवर्णयेत् तां प्रतिब्रूयात् आयत्यां च तदानुकू
ल्येन प्रवृत्तिं प्रतिजानीयात् सपत्नीभ्यश्च साध्वसमवछिंद्यात् क्रमेण विमुक्तकन्याभावामनुद्वेजयन्नुपक्रमेत् इति कन्याविस्रंभणं आयत्यां उत्तरकाले
तदानुकूल्येन तस्यावश्या आनुकूल्येन चित्तानुसारेण प्रवृत्तिं स्वस्थितिं प्रतिजानीयात् शपेत् साध्वसं भाविभयं अवछिंद्यात् न भविष्यतीति प्रतिजा— ६४
नीयात् क्रमेण एवं मासवर्षक्रमेण विमुक्तकन्याभावां वर्धमानवयोवशादभिव्यक्तस्तनजघनलावण्यादिमतीं अनुद्वेजयन् अनतिपीडयन् उप

क्रमेत् तत्कालानुसारेण विलासेषु यतेत विस्रंभणं विश्वासनप्रक्रिया उक्तं द्रढयितुमाचार्योक्तिमाह एवमित्यादिना एवं चित्तानुगो बालामुपायेन प्रसाधयेत् तथास्य सानुरागा च विस्रब्धा चैव जायते चित्तानुगः तच्चित्तानुसारेण प्रवर्तमानः उपायेन उक्तोपायैः प्रसाधयेत् कालक्रमेण व
शं नयेत् तदा चित्तानुवर्तनेन सानुरागा वर्धमानप्रीतिमती विस्रब्धा अन्यानुरक्ता चात् चुंबनादिकुशलापि नात्यंतमानुलोम्येन न चातिप्रातिलोम
तः सिद्धिं गच्छति कन्यास्तस्मान्मध्येन साधयेत् आनुलोम्येन मत्यनुवर्तनेन प्रतिलोमतः भीषणेन सिद्धिं वश्यतां मध्येन उभाभ्यां आत्मनः प्रीतिज
ननं योषितां मानवर्धनं कन्याविस्रंभणं वेत्ति यः स तासां प्रियो भवेत् प्रीतिः सुखं जनयतीति जननं योषितां कर्तरि षष्ठी मानं पूजा कन्याविस्रंभणं
कन्याविश्वासनपद्धतिं अतिलज्जान्वितेत्येवं यस्तु कन्यामुपेक्षते सोनभिप्रायवेदीति पशुवत्परिभूयते अतिलज्जान्विता सुमुखच्छाया निरीक्षणेप्य
तिह्रीमती कन्या बाला अनभिप्रायवेदी मतासयानभिज्ञः पशुवत् अचतुर इति परिभूयते ताभिः सहसा वाप्युपक्रांता कन्याचित्तमविंदता भयं चित्तां समु
द्वेगं स घो द्वेषं च गच्छति चित्तं तच्चित्तं अविंदता अजानता पूर्ता सहसा प्रौढकार्येण उपक्रांता पि विषयीकृता पि चिंतां दुःखं समुद्वेगं चित्तचांचल्यं गच्छ
ति तद्विषये सा प्रीतियोगमप्राप्य तेनोद्वेगेन दूषिता पुरुषद्वेषिणी वा स्याद्विद्विष्टा वा ततोन्यगा प्रीतियोगं नायके प्रीतिलेशमपि तेन भयादिसहिते
न दूषिता कलुषिता पुरुषद्वेषिणी पुरुषसामान्यद्वेषिणी विद्विष्टा स्वनायकमात्रद्वेषवती सती अन्यगा चतुरपुरुषांतरानुरक्ता वा भवेदिति शेषः इति

वा०सू० श्रीकविपदवाक्यमानतत्त्वज्ञकाशीपुरिनिवासिभास्करनरसिंहशास्त्रिविरचितवात्स्यायनसूत्रवृत्तौ तृतीयाधिकरणे द्वितीयोध्यायः २ एवं धनिक
६५. स्य गुणवतः कन्यावेधद्वारा कन्यावरणं विवाहानंतरं वृत्तौ द्वारा स्वयं वा तदनुरंजने चोक्ता इदानीं धनहीनस्य गुणहीनस्य च स्वत एव बाल्यप्रभृति मातृ
सुतादानुरंजनप्रकारमाह धनहीनस्तु गुणयुक्तोपि मध्यमगुणो हीनापदेशो वा प्रातिवेश्यः मातृपितृभ्रातृषु च परतंत्रो वा बालवृत्तिरुचितप्रवेशो
वा कन्यामलभ्यत्वान्न वरयेत् गुणयुक्तोपि चतुःषष्टिविद्याकुशलोपि धनहीनः धनवानपि मध्यमगुणः यत्किंचित्कलाभिज्ञः गुणहीनो वा प्रातिवे-
श्यः समीपगृहवासी भ्रातृषु बालवृत्तिः क्रीडनपरः अत एव उचितप्रवेशः परगृहेषु निःशंकप्रवेश्यः अलभ्यत्वात् धनादिहीनतया दुर्लभत्वात् कन्या
याः कन्यां वरयेत् अन्यद्वारा गुणवर्णनीत्वा तामनुरंजयामीति न यत्नेत किंतु बाल्यात्प्रभृति स्नेहात्स्वयमेवानुरंजयेत् एनां प्रातिवेश्यां तथायुक्तश्च मा
तुलानुवर्ती दक्षिणपथे बाल एव मात्रा पित्रा च वियुक्तः परिभूतकल्पो वा धनोत्कर्षादलभ्यां मातुलदुहितरमन्यस्मै वा पूर्वदत्तां साधयेत् अन्यामपि वा
सांस्पृहयेत् मातुलानुवर्ती तदाज्ञाकारी दक्षिणपथे स्वकार्ये सिध्युपयोगिमार्गे युक्तः स्थितः चात्र मात्रा च वियुक्तः रहितः अपनत्तिधनः अत एव परीभूतक
ल्पः सर्वैर्नीतिमानितः गुणी वा स्तः धनोत्कर्षात् स्वापेक्षया धनाधिक्यात् अलभ्यां प्रयत्नं विना दुष्प्राप्यां पूर्वदत्तां पूर्वसंकल्पितामपि साधयेत् वशाये ६५
त् अन्यां मातुलसुतादिभिन्नां बाह्यामनुकूलां बाल्यायामेवं सति धर्माधिगमे संवननं श्लाघ्यमिति घोटकमुखः बालायां परस्परबाल्यावस्थायां एवं व

र्त्यमाणायां धर्माधिगमे क्रीडनलाभे सति संवननं वशक्रिया वशीक्रिया संवननमिति अमरः श्लाघ्यं अप्रयत्नसाध्यं भवति तया पुष्पापचयं ग्रथनं गृहकं दुक
पुत्रिकाक्रीडायोजनं भक्तपाककरणमिति कुर्वीत परिचयस्य वयसश्चानुरूप्यात् तया बालया सह पुष्पापचयं कुसुमलवनक्रीडा ग्रथनं पुष्पाणां मा
लाकरणं गृहकं दुकपुत्रिकाक्रीडायोजनं गृहादिभिः क्रीडाकरणं भक्तभोजनं इति एतत् चास्य संबंधस्य आकर्षक्रीडां पंजिकाक्रीडां मुष्टिकानि मध्यमांगु
लीग्रहणं षट्पाषाणकादीनि च देश्यानि च आकर्षक्रीडा परस्परं द्वंगुल्याद्याकर्षेण पूर्वकभ्रमणं पट्टिकाक्रीडा चित्रपटखेलनं मुष्टिकं मुष्टिपिहितव
स्तुप्रश्नद्युतरूपखेलनं षट्पाषाणकं वर्तुलप्रहरणानतिस्थूलोपक्रीडनं आदिना यष्टिक्रीडा देश्यानि तत्तद्देशप्रसिद्धक्रीडनानि तत्सात्म्यात् कन्यास्वभा
वानुसारात् कार्याणि तदाप्तदासचेटिकाभिस्तया च सहानुक्रीडेत चेटिकाप्रेष्या अनुक्रीडेत अनु किंचित्कालानंतरं उदकक्ष्वेडितकानि च उदकक्ष्वेडि
तकानि जलक्रीडा चादुभयाभिमतानि सुनिमीलितकं सुनिमीलितकं नेत्रपिधानक्रीडा मानसिकं परस्पराभिप्रायकथनं लवणवीथिकं बालखेलनविशे
षः अनिलताडितकं परस्परांगफूत्करणं गोधूमपुंजिकाः गोधूमैः पद्मस्वस्तिकादिरचनं अन्यानि च देश्यानि अन्यानि वराटिकाखेलनादीनि पांचवि-
श्वास्यामन्यैस्तया सह निरंतरां प्रीतिं कुर्यात् विश्वास्यां विश्वसितुं योग्यां परिचयांश्च बुध्येत परिचयान् स्नेहोपायान् बुध्येत कुर्यात् धात्रेयिकां चास्याः प्रि
यहिताभ्यामधिकमुपगृह्णीयात् धात्रेयिकां उपमातरं चात्मांतरंच प्रियहिताभ्यां प्रियं तत्कालेष्टं हितं भाविसुखहेतु अधिकं अस्या उपगृह्णीयात् उपकु

यात्. सा हि प्रियमाणा विदिताकारापि प्रसादिशं तां नतुतां चेयाजयितुं शक्नुयात्. सा धात्रेयी प्रियामाणा अनुकूला विदिताकारा नायकनात्यदीभिरापि अप्रसादिशं
तीत्र अनिवारयंती तां तामभिमतांयोजयितुं घटयितुं अनभिहितापिवाप्रतावायैकं नायकस्याविदिताकारापिहि गुणानेवानुरागात्प्रकाशयेत्. अनभिहिता अप्रेरिता
विदिताकारानायकतास्यथीनभिज्ञा आचार्यकं प्रतिनायिकापि आदिकं प्रतिनायकस्य गुणान्. यथाप्रयोज्यानुरज्येत प्रयोज्यानियुक्ता यथानुरज्येत तथैव प्रकाशये
दिति पूर्वेणान्वयः यत्रयत्र वा कौतुकं प्रयोज्याना जदनुप्रविश्य साधयेत्. यत्र यस्मिन्वस्तुनि प्रयोज्याया बालायाः कौतुकं इच्छाभिर तत्कृत्रिमपुत्रिकादिकं अनु
प्रविश्य यत्नं कृत्वा साधयेत् संपादयेत् स्पृहयात्. तान्येवाह क्रीडनकद्रव्याणि वा. पूर्वोक्तियान्यन्यासां क्वचिद्दुर्लभशोभितोरल. तान्यस्याः प्रयत्नेन संपादयेत् क्रीड
नकद्रव्याणि शारादीनि अपूर्वाणि अतिरम्याणि अन्यासां राजमहिष्यादीनां तत्रापि क्वचित्. कंदुकमनेकभक्तिचित्रमल्पकालांतरितमन्यदन्यच्च प्रदर्शयेत्. अने
कभक्तिनानारचनावत् चित्रं विविधवर्णवत् अल्पकालांतरितं अभिनवं अन्यत् अमरकादि तथा सूत्रदारुगवलगजदंतमयीदुहितृकां मधूच्छिष्टपिष्टमृण्मयी
श्च सूत्रं पट्टादि दारुवल्कलादि तन्मयीं गवलो मृगविशेषः गजः प्रसिद्धः तद्दंतमयीं दुहितृकां क्रीडापुत्रिकां प्रदर्शयेत्. भक्तपाकार्थस्य महानसस्य प्रदर्शनं अ
तस्य भोज्यादिकाष्ठसंप्रयुक्तयोर्मेषयोश्च तथैवाजैडकानां देवकुलगृहकाणां मृद्वेदलकाष्ठनिर्मितानां शुकपरभृतमदनशारिकालावककुक्कुटतित्तिरिपंज
रकाणां विचित्राणां चाकृतियुक्तानां जलभजनानां च यंत्रकाणां वीणिकानां पिंडोलिकानां कंडोलिकानां पेलिकानाम् अलक्तकमनःशिलाहरितालहिंगुलकश्या

मकादीनां चंदनकुंकुमयोः पूगफलानां तांबूलपत्राणाम् इति कालयुक्तानां शक्तिविषये प्रच्छन्नेदानं प्रकाशद्रव्याणां तु प्रकाशं यथा च सर्वाभिप्राय संवर्धकं मन्ये
मन्येत काष्ठसंप्रयुक्तयोः चंदनादिदारुनिर्मितान्योन्यसंश्लिष्टयोः मेषयोः मेषीमेषयोः प्रदर्शनं तथा काष्ठमयानां संश्लिष्टानां अजैडकानां तन्मिथुनानां च देव
कुलगृहकाणां काष्ठादिरचितानां स्वीयदेवताग्रहवालकुलखेलनगृहकाणां च मृद्वेदलवंशादिः शुकादयः पक्षिविशेषाः पंजरिकाणां निवासगृहाणां विचि
त्राणां चाकृतियुक्तानां विचित्राकारयुक्तानां जलभजनकानां यंत्राणां धारायंत्राणां वीणिकानां विपंचिकानां कंडोलिकापिंडोलिके कच्चसजीकरण्या धनविशेषौ
पेलिकानां स्थापनमंजूषा अलक्तकेलासाधमनः शिलागैरिकादिधातुः हरितालं पीतद्रव्यविशेषः हिंगुलमतिरक्तद्रव्यविशेषः श्यामलकं कज्जलं आदिना हरिद्रा
सुगंधिद्रव्यपरिग्रहः कालयुक्तानां तत्कालिकपुष्पफलादीनां शक्तिविषये यथाशक्ति. तत्राप्यतिप्रीतिहेतुनामलक्तकादीनां प्रच्छन्नं रहसिदानं प्रकाशद्रव्या
णां प्रकटप्रदानयोग्यानां कंदुकादीनां प्रकाशे अन्यसन्निधौ दानं कार्यं सा बाला सर्वाभिप्रायवर्धकं सर्वस्याभीष्टपूरणक्षमं एनं स्वयथामन्येत तथा कुर्यादिति
शेषः वीक्षणे च प्रच्छन्नमर्थयेत्. वीक्षणे लक्तकस्य मुखनिरीक्षणे सति प्रच्छन्नं परैरदृष्टं यथा तथा अर्थयेत् दृष्ट्वेव प्रार्थयेत्. तथा कथायोजनं कथायोज
नं प्राचीननायकवरणादिकथनं प्रच्छन्नदानस्य तु कारणमात्मनो गुरुजनाद्भयं ख्यापयेत्. गुरुजनात् तस्या मात्रादेः देयस्य चान्येन स्पृहणीयत्वं देयस्य त्वद्दत्तकंदु
कादेः अन्येन कन्याजनेन स्पृहणीयत्वं ख्यापयेत्. इति वर्धमानानुरागां चाख्यानके मनः कुर्वतीमन्वर्थाभिः कथाभिश्चित्तहारिणीभिश्च रंजयेत्. आख्यानके

वा॰सू॰ प्राचीनान्नायकवृत्तांतश्चवर्णेऽप्यन्वर्थाभिः स्वकार्योपयुक्ताभिः इति वर्धमानानुरागां उक्तरूपादिनां कुमितानुरागां विस्मयेषु प्रयुज्यमानामिंद्रजालैर्योगैर्विस्मापयेत्
६७ विस्मयेषु प्रयुज्यमानास्तु तगोष्ठ्यप्यवहेनाश्चर्यकर्तैरिंद्रजालिकैः हस्तलाघवादिभिर्विस्मापयेत् अतिशयेन कलासु कौतुकिनी तत्कौशलेन गीतप्रियांश्रुति
हरैर्गीतैरश्वयुज्यामष्टमीचंद्रकैः कौमुद्यामुत्सवेषु यात्रायां ग्रहणेऽप्युत्साहेवा विचित्रापीडैः कर्णपत्रभंगैः सिक्थकप्रधानैरंगुलीयकभूषणदानैश्च नचेद्दोष-
करणामिमन्येत कलासु चतुःषष्टिविद्याप्रयोगेषु कौतुकिनी उत्सुकां तत्कौशलकेन स्वकलाकौशल्यप्रकटनेन गीतैः गानप्रयोगैः कौमुद्यां चंद्रिकासेवायां कु
तुकिनी आश्वयुज्यां अष्टमीचंद्रकैः आश्वयुजे मासि या अष्टमी तस्यां ये चंद्रकराः प्रसृतचंद्रकलाः तंसेवनैः उत्सवेषु विवाहादुत्सवेषु यात्रायां देवतोत्सवगमन
कालेग्रहणे मार्यादिव्रतस्वीकारसमये प्रहाचारेकुलदेवतापूजादौ आपीडैः कुसुमशेखरैः सिक्थकप्रधानैः सीमंतभूषणप्रमुखैः कर्णभूषाविशेषैः दोषक
राणि असमीचीनानि एतानि भूषणानीति यथा चन्मन्येत तथा पैर्नालापयेदिति शेषः अन्यपुरुषविशेषाभिज्ञां धात्रेयिकां चास्याः पुरुषप्रवृत्तौ चातुःषष्टिकान्यो
गान् ग्राहयेत् अभिज्ञांकलाभिज्ञत्वेनमन्यमानां पुरुषप्रवृत्तौ पुरुषांतरेषु एवमन्यमानां अस्यावालाया धात्रेयिकामुपमातरं चयोगान् विद्याः तं द्रूहरणपदे
शेन च प्रयोज्यायां रतिकौशलमात्मनः प्रकाशयेत् तासां विद्यानां ग्रहणापदेशेन अध्यापनव्याजेन प्रयोज्यायां नायिकां प्रति आत्मनः स्वस्य रतिकौशलं सुखा ६७
धिक्यहेतुवाह्याभ्यंतररतचतुरां उदारवेषश्च स्वयमनुपहतदर्शनश्च स्यात् स्वयं च स्वयमपि उदारवेषः मनोरमवस्त्रालंकारवान् अनुपहतदर्शनः प्रसन्नदृ

ष्टिमान् स्यात् सर्वदा भावं च कुर्वीतेंगिताकारैः सूचयेत् भावं रागं इंगिताकारैः रागसूचकस्मितादिभिः सूचयेत् स्वभावं युवतयो हि संसृष्टमभीक्ष्णद
र्शनं च पुरुषमपीभृत तद्दर्शनं प्रथमं कामयंते कामयमाना अपि तु नाभियुंजीतेति प्रायो वादः यतः संसृष्टं सन्निहितं अभीक्ष्णदर्शनं पुनः पुनः स्वामेवानि
रीक्ष्यंते अपरिभूत वद्दर्शने मनोरमवेषसौम्यदृष्टिं कामयमाना अपि अंतर्गतरागा अपि नाभियुज्यंते ह्रडितिन संयुज्यंते हि अतउज्ज्वलवेषादिमता भाव्यमि
त्यर्थः तानिंगिताकारान् वक्ष्यामः तान् स्वीकर्तृकान् इंगिताकारान् भावसूचकाकारविशेषान् संमुखं न वीक्षते संमुखं अभिमुखं यथा न पश्यन् वीक्षते नायकं वीक्षि
ता व्रीडां दर्शयति वीक्षिता नायकेन तदात्मनोंगमन्यापदेशेन प्रकाशयति वत्तदंगं मुखकुचादिकं अन्यापदेशेन कार्यांतरव्यापृतिव्याजेन प्रयांतं प्रच्छन्नं वा
नायकमतिक्रांतमपीक्षते प्रच्छन्नं यवनिकाद्यंतरितं प्रयांतं गच्छंतं अतिक्रामंतं नयनपथातीतं पृष्टापि किंचित्सस्मितमव्यक्ताक्षरमनवसितार्थं मंदं मंदमन्य
तोमुखी कथयति पृष्टापि नायकेन अपि स्वयं न वदति अनवसितार्थं असम्यगनववुद्धार्थं अन्यतोमुखी वस्त्वंतरनिरीक्षणव्यग्रेव तत्समीपे चिरं स्थानमभिनं
दति तत्समीपेतस्यात्समीपे दूरे स्थिता पश्यतु मामिति मन्यमाना परिजनं सवदनविकारमाभाषते पश्यतु नायकः परिजनं स्वंवीस वदनविकारं सस्मितं
स्वविभ्रमवचने तं च देशं न मुंचति तं नायकदृष्टिगोचरदूरप्रवेशं न मुंचति कार्यांतरव्याजेन यत्किंचित् दृष्ट्वापि हसितं करोति दृष्ट्वा नेन हसितं मंदहासं तत्र कथा
मवस्थानार्थं चिरस्थितये कथां गोष्ठीं मंदं मंदं अनुबध्नाति करोति वालस्यांकगतस्यचुंबनमालिंगनं च करोति करोति नायकं निरीक्षंती परिचारिकाया

तिलकं रचयति वयति मखेनायकत्तापनार्थं परिजनेन सा वंशभावनां तां लीलां दर्शयति सा वंशं भासौंदर्योभिनिविशां लीलां अकिलासादिपरिजनेन तत्समीपे त
न्मित्रेषु विश्वसिति तस्य नायकस्य तद्वाहवचनैर्वा बहु मन्यते करोति च एषां तन्मित्राणां बहु मन्यते पूजयति तस्य परिचारकैः सह प्रीतिं संकथां द्यूतमिति च करो
ति तस्य परिचारकैः नायकसेवकैः संकथां संलापं स्वकर्मसु चैतान् प्रभविष्णुरिव नियुंके तेषु च नायककथामन्यस्य कथयत्सु वद्दिनाश्रुणोति स्वकर्मसु स्व-
स्याः पेठिकाकरण्डिकाद्यानयनकर्मसु एतान् नायकदासान् प्रभविष्णुरिवस्वामिनी वर्तेषु तद्वासेषु कथां कलाकुशलतादिगुणान् अन्यस्य समीपे कथय
त्सु सत्सु अवहिता एकाग्रचित्ता धात्रेयिकानोदिता नायकस्यावसितं प्रविशति नोदिता प्रेरिता तया सह उदवसितं गृहं तामंत्रणं कृत्वा तेन सह द्यूतक्री
डामाख्यायिकां च योजयितुमिच्छति तां पालिकां योजयितुं कर्तुं अनलंकृता दर्शनपथं परिहरति दर्शनपथं नायकस्य दृग्गोचरतां कर्णपत्रभंगलीयकं स्रजं
वा नायकेन याचिता सधीरमेव गात्राद्वमुच्य तस्या हस्ते ददाति सधीरं निर्विकारं यथा तथा सख्याः तस्य तेन दत्तं निसंधारयति दत्तं स्रगादिकं अन्यवर
संकथासु विषण्णा भवति अन्यवरसंकथासु वरांतरप्रशंसासु सत्सु विषण्णा पराङ्मुखी तत्पक्षैश्च न संसृज्यत इति तत्पक्षैः वरांतरपक्षपातिभिः न सं
सृज्यते न सह वसति इत्येवंप्रकारे अलंकृतान्यांनपश्यतीत्यादि दृष्ट्वा तान् भावसंयुक्तानाकारानिंगितानि च कन्यायाः संप्रयोगार्थं तांस्तान् योगान् विचिंतये ६८
त् भावसंयुक्तान् युवतय इति स्त्रीत्वानुरागयुक्तान् एतान् अनलंकृतेत्यादिनोक्तान् इंगितानि संमुखं न वीक्षत इत्यादिनोक्तानि संप्रयोगार्थं प्रतिवशा

करणार्थं तांस्तान् गरिष्ठान् योगानुपायान् स्वकलाकुशलताप्रकाशनरूपान् विचिंतयेत् कुर्यात् बालक्रीडनकैर्वा तां कलाभिर्यौवनेस्थितां वत्सलांत्वा
पि गृह्णीयाद्विश्वास्यजनसंग्रहात् बालक्रीडनकैः बालक्रीडाभिः कंदुकमहानसप्रदर्शनादिभिः कलादिभिः चतुःषष्टिकलाप्रयोगप्रदर्शनैः वत्स
लां धात्रेयीं विश्वास्यजनसंग्रहात् तदनुरक्तधात्रीजनप्रीतितः इति श्रीकविपदवाक्यमानतत्त्वज्ञकाशीपुरनिवासनिवासिभास्करनरसिंहशास्त्रिविर
चितवात्स्यायनसूत्रवृत्तौ तृतीयाधिकरणे तृतीयोध्यायः ३ एवं तृतीये सालभंजिकादिसमर्पणेन बालायाः रागोत्पादने उत्पन्नरागायाश्चेंगिताकारप्रद-
र्शने चोक्ते उपजीवकत्वसंगस्यात् ततः तत्संस्पर्शनसंश्लेषणादि वक्ष्यमाह दर्शितेंगिताकारां कन्यामुपायतोभियुंजीत उपायतः समीपं गतः सन् अभियुंजीत
संस्पर्शनाद्यर्थं यतेत द्यूतक्रीडनकेषु च विवदमानः साकारमस्याः पाणिमवलंबयेत् नायिकया सह द्यूते अक्षादिभिः प्रवृत्तक्रीडनकेषु कंदुकादीनां प्रवृत्तेषु वि
वदमानः यत्किंचिद्व्याजेन साकारं ससात्त्विकभावं अवलंबयेत् ॥ ८ ॥ ह्लूपात यथोक्तं स्पृष्टकादिमालिंगनविधिं विदध्यात् यथोक्तं पूर्वोक्तलक्षणं पत्रच्छेद्यक्रि
यायां स्वाभिप्रायसूचनं मिथुनमस्या दर्शयेत् पत्रच्छेद्यक्रियायां शब्दविशेषाय मुष्ट्यग्निकमलदलाभिहननक्रीडायां स्वाभिप्रायसूचनं तया सदृशं प्रयोगेच्छा
सूचकं मिथुनं पत्रांतरितं तदहस्तद्वयपोगं दर्शयेत् सहासनेऽपत्तयातस्ये प्रदर्शयेत् एवमन्यदन्यद्विरलशो दर्शयेत् एवं अन्यत् कंदुकादिक्रीडायां अन्यत् कं
दुकादिमर्दनादिना स्वाभिप्रायं विरलशः किंचित्किंचित् क्रीडायामवधानेन जलक्रीडायां दूरतोऽप्सु निमग्नः समीपमस्या गत्वा स्पृष्ट्वा चैनां तत्रैवोन्मज्जेत्

दूरतः अस्मात् दूरदेशे तत्रैव तत्प्रदेशे एव उन्मज्जेत् निमज्ज्य तस्या पश्येत् नवपत्रिकादिषु च सविशेषं भावनिवेदनं नवपत्रिकादिषु रसालपल्लवादिषु सविशे
षं सचानुर्यं भावनिवेदनस्वाभिमतलेखनं तत्प्रेषणं च कुर्यात् आत्मदुःखस्यानिर्वेदेन कथनं आत्मदुःखस्य कदाचित् नदनवलोकनजस्य अनिर्वेदेन अ
दैन्येन कथनं तस्यैव स्वप्नस्य च भावयुक्तस्य भावयुक्तस्य स्वाभिमतत द्विवाह्यादिविषयस्य कथनं तस्याः स्वप्नानुषज्यते अदेशेन प्रेक्षणकेस्वजनसमवाये
वा समीपोपवेशनं तत्रान्यापदिष्टस्पर्शनं प्रेक्षणके उत्सवादि प्रेक्षकजनतायां अन्यापदेशेव स्वं तररीक्षणव्याजेन समीपे तस्याः तत्र तत्समीपे अन्या
परिष्वङ्गवत्तरं प्रदत्तमुच्छ्र यकृतं स्पर्शनं कुर्यात् अपाश्रयणार्थे चरणेन चरणस्य पीडनं अपाश्रयणार्थे पुरो दृष्ट्वा प्रसङ्गपसर्पणमिषेण चरणे
स्य तस्याः ततः शनकैरेकैकमङ्गुलिमभिस्पृशेत् नखाग्रैः ह्लीयात् सर्वाः नखाग्राणि च घट्टयेत् तदभिमतैर्नखाग्राणि घट्टयेत् उन्मृद्यात् तत्र सिद्धौ प
दास्यरम भिकांक्षेत् तत्र उत्तरकर्मणि पदासदं उत्तरोत्तरकर्म प्रति अभिकांक्षेत् योजयेत् क्षान्त्यर्थं च तदेवाभ्यस्येत् क्षान्त्यर्थं उत्तरोत्तरकार्यसहनार्थं
तदेव रागहृदयेहृत्तमेव पुनः पुनः कुर्यात् पादशौचे पादाङ्गुलिसंदंशेन तदङ्गुलिसंपीडनं पादशौचे पादप्रक्षालनकर्मणि पादाङ्गुलिसंदंशेन नख
स्य द्रव्यस्य समर्पणे प्रतिग्रहे वा तद्गतो विकारः तद्गतः भावसूचकः विकारः नेत्रादेः आचमनार्थोदकेन निषेकः निषेकात् तद्रसोजादिषुनि ६९
षेचनं विजने तमसि च द्वंद्वमासीनः शान्तिं कुर्वीत समानदेशशय्यायां वा तत्र यथार्थमनुद्दिश्य तया भावनिवेदनं चाविकल्पे समानदेशे एकप्रदेशे शय्या

यां पर्यङ्के वा द्वंद्वमासीनः तया सह एकमुपविष्टः क्षान्तिकृतं क्षमस्वेति प्रार्थनां तत्र तदा यथार्थे तन्मनस्यनुसारेण अनुद्दिश्य तात तस्याः क्रोधाद् हनावा
कोनभावनिवेदनं पाण्यादिस्वावस्थं स्वजनं कुर्यात् विविक्ते च किंचिदस्ति कथयितव्यमित्युक्त्वा निर्वचनं भावं च तत्रोपलक्षयेत् यथा पारदारिकेव क्ष्या
मः विविक्तजनान्तररहिते तद्देशे चोवधार्यो उक्तास्वजन एव कदाचिदुदीर्य निर्वचनं विजने सादि पूर्वोक्तभावनिवेदनं तत्र स्वभावनिवेदनानन्तरं भावं च
स्वपरिणयविषयकतद्भिप्रायमपि उपलक्षयेत् मुखप्रसादादिवस्यमाणलक्षणमभिजानीयात् विदितभावजव्याधिमपदिश्यैनां नानातोगनहणार्थं
मुद्वसितमानाययेत् विदितभावः ज्ञाततदीयस्यानुरागः सन् व्याधिं तच्छ्र यमपदिश्य प्रकटयेत् आकारयेत् आगतायाः स्वशिरःपीडने नियोगः स्वशि
रःपीडने शिरोवेदनानिवर्तके तन्मर्दने नियोगो नियोजनं कार्यः पाणिमवलंब्य वास्याः साकारं नयनयोर्ललाटे च निदध्यात् अवलंब्य स्वपाणिना अस्याः
हीत्वा नयनयोः स्वस्य औषधापदेशार्थं चास्याः कर्म विनिर्दिशेत् अपदेशार्थं आनयकर्मगमनं तदेवाह इदं त्वया कर्तव्यं न खेलतीले कन्यायाः अन्येन
कार्यमिति इदं लघु कार्यं अन्येन अन्यया हि न कर्म न कार्यं हि न सामर्थ्ये हि इति निर्दिशेदिति पूर्वेण संबंधः गच्छन्तीं पुनरागमनानुबंधमेनां विसृजे
त् आगमनानुबंधं शीघ्रं आगच्छेरित्युक्ति पूर्वकं अस्य च योगस्य त्रिरात्रं त्रिसंध्यं च प्रयुक्तिः अस्य योगस्य कन्यानियोजनरूपकार्यस्य त्रिसंध्यं प्रतिदिनं
त्रिकालं अभीक्ष्णदर्शनार्थमागतायाश्च गोष्ठीं वर्धयेत् आगतायां सत्यां गोष्ठीं नवनवगाथां अन्यानिरपि सह विश्वासनार्थमधिकमधिकं चाभि

वा॰सू॰ युजीतनतुवाचानिवेदेत् ॰अन्याभिः तद्धात्रेयिकादिभिः सह विश्वासनार्थं स्वस्मिन्वालिकाया ॰अधिकविश्वासोत्पादनार्थं ॰अधिकमधिकं गोष्ठ्या
७० दिकं ॰अभियुंजीत कुर्यात् न निर्वेदेत् ताः प्रति स्वतात्पर्यं न वदेत् दूरगतभावोपि कन्या सननिर्वेदः सिध्यतीति घोटकमुखः दूरगतभावोपि कालांतरा
भिमतसंप्रयोगविषयोपि निर्वादः वं हेतोः कन्यास्वविषयेन सिध्यतिन सिद्धिहेतुः यदा च बहुसिद्धां मन्येत तदैवोपक्रमेत् बहुसिद्धां स्वस्मिन्नधिकानुरक्तां
उपक्रमेत् परिणयादौ सिद्धिकालमाह प्रदोषनिशितमसि च योषितो मंदसाध्वसाः सुरतव्यवसायिन्यो रागवत्यश्च भवंति न च पुरुषं प्रत्याचक्षते तस्मात्तत्का
लं प्रयोजयितव्या इति प्रायोवादः मंदसाध्वसाः ध्वस्तभयाः रागवत्यः उद्रिक्तरागाः तदा न प्रत्याचक्षते न निषेधयंतीति तत्कालं प्रदोषादौ प्रयोजयितव्याः व
शीकार्याः एवं मध्यमानां वशीकरणोपायमुक्त्वा प्रसंगान्मुग्धाप्रौढयोक्रमाह एकपुरुषाभियोगानां त्वसंभवे गृहीतार्थया धात्रेयिकया सख्या वा तस्यामवि
र्भ्रतया तमर्थमनिवेदंत्या सहैनामंकमारोपयेत् तत्पुरुषेणाभियुज्यंते कादिष्टपवेशयितुमभिमन्यंत इति पुरुषाभियोगाः एका ॰असहाया हस्ताश्च ताः तासामसंभवे ऽ
लाभे गृहीतार्थया स्वीकृतो लोको यया तस्यां कन्यायां ॰अविमृष्टे तया उद्रिक्तप्रीत्या तमर्थं स्वीकृतांकारोपणसंश्लेषणादिकं स्वं ॰अनिवेदंत्या वहिःप्रकटयंसा
धात्रेयिकया सख्या वा सह ॰अप्रयथोक्तमभियुंजीत ॰अप्रथमं ॰अंकारोपणानंतरं यथोक्तं कपोलचुंबनगोष्ठीकथनादि ॰अभियुंजीत कुर्यात् स्वां वा परिचारि ७०
कामास्यावेवास्याः सखीत्वेन प्रणिदध्यात् ॰आदौ बाल्यप्रभृति प्रणिदध्यात् योजयेत् यत्ते विवाहे यात्रायामुत्सवे व्यसने प्रेक्षाव्रत्ते जने तत्र तत्र दृष्टेंगिताका

रां परीक्षितभावामेकाकिनीमुपक्रमेत् उत्सवे कुलदेवतादेः व्यसने बालकामयादौ तत्र तत्र ॰आपणान याद्रिति रेजने इतरमेक्षाव्रते ॰अन्यावलोकन
व्यग्रे सति दृष्टेंगिताकारां ॰अत एव परीक्षितभावां ज्ञानतास यों कांचिदेकाकिनीं सतीं उपक्रमेत् स्पर्शनादौ न हि दृष्टभावा योषितो देशकाले न प्रयोज्यमा
ना ॰अपि व्यावर्तंते इति वात्स्यायनः द्वितथा हि दृष्टभावाः इंगिताकारैर्निश्चिततात्पर्याः देशे विविक्ते सतमसि वा प्रयोज्यमानाः संस्पृश्यमानाः ॰अपि नासंश्लि
ष्टाः न व्यावर्तंते न परावर्तंते एकपुरुषाभियोगाः इति पैवं कुलधनशीलविद्यावंध्वादिसंपन्न स्वतादृशकन्यापरिणयतदनुरंजनप्रकारं तदन्यत्वमही
नत्वमातुलादिसतप्राप्तिरेश्यादिवश्योपायान् कंदुकप्रदानादींश्चोक्तान् तदन्यत्वमहीनकन्यायाः पुरुषवशीकरणोपायानाह मंदापदेशा इत्यादिना
मंदापदेशा गुणवत्यपि कन्या धनहीना कुलीनापि समानैरयाच्यमाना मातापितृवियुक्ता वा ज्ञातिकुलवर्तिनी वा प्राप्तयौवना पाणिग्रहणं स्वयमभी
प्सेत गुणवत्यपि धनादिसंपन्नापि मंदापदेशा ॰अकुलीना वा कुलीनापि कुलशीलवत्यपि धनविद्याहीना ॰अत एव समानैः कुलीनैः ॰अयाच्यमाना ॰अ
वृत्ता वा ज्ञातिकुलवर्तिनी ॰अंतद्वेषपितृसंबंधिगृहवासिनी कुलीनापि सा यनुषज्पने प्राप्तयौवना सतीति त्रितयस्य विशेषणं सानुगुणवंतं शक्तं
सुदर्शनं बालप्रीत्याभियोजयेत् गुणवंतं विद्याकुशलं शक्तं पुष्टांगं सुदर्शनं सुरूपं बालप्रीत्या बालखेलनानुरागेणायुक्तं प्राप्तिविश्वयै तत्प्रत्येया
द्युवा न हावभावादिभिरनुरंजयेत् यं वा मन्येत माता पित्रोरसमीक्ष्यात्स्वयमप्यभिप्रवर्तते त्वां त्वयि प्रवर्तिष्यत इति प्रियहितोपचारैरभीक्ष्णा

वा॰सू॰ दर्शनेन्वतमावर्तयेत् स्वयंप्रवृत्तनायकः इंद्रियदौर्बल्यात् इंद्रियाधीनत्वात् मातापित्रोरसमीक्ष्यया प्रवश्यत्वाच्च स्वयमपि स्वव एवमद्यापत्तिं
७१ विनैवमपि प्रवर्तिष्यते अनुरज्यतइति यं वा मन्येत तं प्रियहितोपचारैः वस्त्रमेनोहितचंदनताम्बूलादिदानैः अभीक्ष्णदर्शनेन पुनःपुनः सविलासवि
लोकनेन च आवर्जयेत् वशं नयेत् वशंनयेत् माता चैनां सखीभिर्धात्रेयिकाभिश्च सह तदभिमुखां कुर्यात् माता कन्यायाः एनां अलंकृतां तदभि
मुखां नायकदृष्टिपथवर्तिनीं पुष्पगंधताम्बूलहस्ताया विजने विकाले च तदुपस्थापनं विकालप्रदोषादौ ताम्बूलहस्तायाः स्वपुत्र्याः कर्मणि षष्ठी
तदुपस्थापनं नायकसमीपप्रेषणं कुर्यात् कलाकौशलप्रकाशने वा संवाहने शिरसः कंडूयने पीडने वा चित्तसदर्शने कलाकौशलप्रकाशने कलासु
चतुःषष्टिविद्यासु कौशलप्रकाशनं स्वकुशलताप्रकटनं संवाहनं नायकपादादेः शिरसः तस्यैव पीडने व्यापारिवर्तकमृदुमर्दने औचित्यदर्शनं स्व
चातुर्यप्रदर्शनं प्रयोज्यस्य सात्म्ययुक्ताः कथायोगाः प्रयोज्यस्य सात्म्ययुक्ताः मनोरंजकाः कथायोगाः प्राचीननायकवृत्तांतकथनानि च कुर्यात् ता
न्वाल्यायामुपक्रमेषु च यथोक्तमाचरेत् बाल्यायां विषये उपक्रमेषु वशीकरणार्थं यथोक्तं नायकस्य पूर्वोक्तं यदुपायजातं तानुपायान् बालानायके-
नाचरेत् तदेवाहन त्वेवानुरागादपि पुरुषं स्वयमभियुंजीत नायिका अनुरागातिशयादपि नाभियुंजीत तं चुंबनालिंगनादौ प्रथमं न यतेत कुतः स्वयमभि ७१
योगिनी हि युवतिः सद्यः सौभाग्यं जहातीत्याचार्याः स्वयं नायकप्रवृत्तिं विना प्रथमतः स्वयमेवाभियोगिनी पुरुषेणासंयुक्ता सौभाग्यं जहाति वल्लभवाद्यम्यं

त्यजति तदीनाभवतीत्यर्थः हि हेतौ अतो नाभियुंजीतेति पूर्वेणान्वयः तत्प्रयुक्तानां त्वभियोगानामानुलोम्येन ग्रहणं परिष्वक्ता च न विकृतिं भजेत् श्ल
क्ष्णमाकारमजानतीव प्रतिगृह्णीयात् तत्प्रयुक्तानां नायककृतानां अभियोगानां स्पर्शनचुंबनादीनां आनुलोम्येन आनुकूल्येन ग्रहणं अनुमो-
दनं कुर्यात् परिष्वक्ता गाढालिंगिता अपि तासती विकृतिं असंसतां धीरतां न भजेत् प्राप्नुयात् किंतु आकारं परिष्वंगादिजन्यसुखं अतिशयेनानुभवंत्यपि
श्लक्ष्णं किंचिदप्यजानतीव अननुभवंतीव वदनग्रहणे बलात्कारः वदनग्रहणे अधरामृतपानार्थे तेन क्रियमाणे बलात्कारः किंचित् स्वयं प्रति
पद्यते न बलात्स्वीकरणं कारयेत् रतिभावनाम् अभ्यर्थ्यमानायाः कृच्छ्राद्गुह्यसंस्पर्शनं रतिभावनां दृतिः सुरतविशेषो भाव्यतेऽनयेति
रतिभावना सुरतक्रीडा तां प्रति अभ्यर्थ्यमानायाः नायकेन प्रार्थ्यमानाया युवत्याः कन्यायाः कृच्छ्रात् निर्बंधादिव गुह्यस्य संस्पर्शनं स्वभगसंस्पर्शनं
भवति अभ्यर्थितापि तु नातिविवृता स्वयं स्यादन्यत्रानिरतकालात् अप्रतिविवृता प्रकटितमदनसदनदेशा हृयेन स्यात् न भवेत् निरतकालात् सु
रतकालात् अन्यत्र कालान्तरे सत्यापचुंबनादौ अभ्यर्थितापि नायकेन अतिप्रार्थितापि यदा तु मन्येतानुरक्तोऽयं न व्यावर्तयिष्यत इति तदैवैनम-
भियुंजाना बालभावं विमोक्षेत् अयंपुवामपि अनुरक्तः अतिरागी न व्यावर्तिष्यते कदापि न त्यजतीति यदैनं मन्येत निश्चिनुयात् तदैवमभियुं
जाना रतये नियुज्यमाना सती तेन बालभावं कन्यात्वं विमोक्षेत् त्यजेत् तेन सह संयुज्यादित्यर्थः विमुक्तकन्याभावा च निभृतास्थिषु प्रकाशयेदिति

वा॰सू॰ स्थोपावर्तनेन विमुक्तकन्याभावा रहस्येन संयुक्ता सती क्रमेण विश्वास्येषु सखीधात्र्यादिषु प्रकाशयेत् अयं मन्द्ली अवलिति वदेत् इति स्थोपावर्तनेनास्व
७२ यंवरणप्रकारः एवं परस्परज्ञातयोर्विवाहः कार्य इति शेषः अत्र प्राचीनवचनान्याह कन्याभियुज्यमाना च यं मन्येताश्रयं सुखं अनुकूलं च वशं च त
स्य कुर्यात्परिग्रहं आश्रयं ध्रुवं सुखं तत्कारं परिग्रहं तत्पाणिग्रहणं कुर्यात् अन्यथा दोषमाह अनपेक्ष्य गुणान्यत्र रूपमौचित्यमेव च कुर्वीत धनलोभेन
पतिं सापत्नकेष्वपि यत्र पुरुषे रूपं सौन्दर्यं औचित्यं अनुकूलता चात्सुखहेतुत्वं इति गुणान् अनपेक्ष्य अनवेक्षन्ती सापत्नकेषु सपत्नीस्थानदोषे संभाव
नायां सत्यां धनलोभेन तं पतिं न वृणुयाच्चेत् स्वाभिमतेन लभनादिति शेषः तत्र युक्तगुणं वश्यं शक्तं बलवदर्थिनं उपायैः प्रयुञ्जीत कन्यां न प्रतिलोभयेत् त
त्र तस्मात् युक्तगुणं स्वाभिमतगुणं शक्तं स्वाभ्यवदाने बलवत् नीरोगिणं अर्थिनं रक्षापेक्षिणं युवानं उपायैः पूर्वोक्तताम्बूलदानाद्युपचारैः उपयुञ्जीत वशाये
त् न प्रतिलोभयेत् तत्प्रतिकूलं नाचरेत् आगतौ वरणीयमाह वरं वश्योऽदरिद्रोऽपि निर्गुणोऽप्यात्मवान्नरः गुणैर्युक्तोऽपि वश्यो नैव बहुसाधारणः पतिः ध
नहीनोऽपि अनतिधनोऽपि वश्यः अनुकूलश्चेत् वरं इष्टप्रियः निर्गुणः सौन्दर्यादिगुणहीनोऽपि आत्मवान् बलादिमान् वा गुणैः धनसौन्दर्यादिभिः बहुसा
धारणः बहुषु सक्तश्चेत् न वरं कुतः प्रायेण धनिनो दारा बहवो निरवग्रहाः बाह्येसत्युपभोगेऽपि निर्विस्रम्भा बहिःसुखाः धनिनां तस्मात् अबलीबहवः ७२
अनेके अत एव निरवग्रहाः अस्वाधीनपतिकाः अत एव बहिःसुखाः बहिः पत्युरस्मात् खेच्छवसंततः बाह्येव स्वालंकारादिरूपे उपभोगे तस्माद्धनेऽस

पि तस्मिन्न निर्विस्रंभाः निरनुरागा भवन्ति हि अतो नैतादृशो वरणीय इत्यर्थः नीचीयस्त्वभियुञ्जीत पुरुषः पलितोऽपि वा विदेशगतिशीलश्च न स संयो
गमर्हेति नीचः जात्यादिना पलितः वृद्धः विदेशगतिशीलः देशान्तरगमनस्वभावश्च यः पुरुषः अभियुञ्जीत स्वयमेव संयोगमिच्छेत्तथापि स संयोगं संयो
क्तुं नार्हेति यदृच्छयाभियुक्तो यो दैवद्यूताधिकोऽपि वा सपत्नीकश्च सापत्यो न स संयोगमर्हेति यदृच्छया दैवगत्या कदाचित् अभियुक्तो दैवद्यूताधिकः दैवा
धिकोऽतिक्रूरः द्यूताधिकः तदेकव्यसनः सपत्नीकः बहुभार्यः सापत्यः सपत्नीसंतानवान् एष संयोगं संप्रयोक्तुं अर्ह इति कर्तव्या तन्नियोजनं त्वाज्येति भा
वः गुणसाम्येऽभियोक्तॄणामेको वरयिता वरः तत्राभियोक्तृष्वेष मनुरागात्मको हि सः अभियोक्तॄणां वरणं ह्यपेक्षणीयं गुणसाम्ये कुलविद्यादिसाम्ये स
ति वरयितात्वयंप्रार्थयिता एक एव वरः वरणीयः कुतः तत्र स्वयं वरयितरि अभियोगार्हे पुरुषेष्वेषूत्कृष्टं सर्वगुणोत्तमं स्वयं वरणमस्ति सत्स्वयंवरणगुणः अ
नुरागात्मकः तद्धर्षको हि अतः स एव वरणीयः इति श्रीकविपदवाक्यप्रमाणतत्त्वज्ञदेतमतध्वांतभास्करनरसिंहशास्त्रिकृतवात्स्यायनसूत्रहेतौ तृती
याधिकरणे चतुर्थोऽध्यायः ४ पूर्वोध्यायमुख्यप्रतिपाद्यमनुवदति एकपुरुषाभियोगः अभियोगतश्च कन्यायाः प्रतिपत्तिः एवं कन्यावरयोः परस्परानुम
त्या साक्षाद्वरणप्रकारमुक्त्वा तदसंभवे धात्र्यादिद्वारकं वरणं साक्षात्परयावाप्तानामुपजीवकत्वसंगत्या परिणयभेदांश्चाह प्राचुर्येत्यादिना प्राचु
र्येण कन्याविविक्तदर्शनस्यालाभे धात्रेयिकामुपगृह्योपसर्पयेत् विविक्तदेशस्य विजनप्रदेशस्य नायकमात्रवतः प्राचुर्येण पुनः पुनः अलाभे स कन्याधा

का॰सू॰ त्रेयिकां प्रति उपगम्य स्वाभिप्रायमुक्त्वा उपसर्पयेत् नायकसमीपं प्रेषयेत् प्रेषिता च सती सा प्रेषितेव तत्समीपे नासिका कुलशीलसौन्दर्यैकलाकौ
७३ शल्योचितत्वानुरक्तत्वादिगुणान् गोष्ठीप्रसंगेनोक्तान् अनुरंजयेत् तदीयगुणांश्च ज्ञात्वा तेनापि प्रार्थिता एनामपि तदनुरक्तां कुर्यादित्याह सा चैव
नाम विदिता नाम नायकस्य भक्त्वा तद्गुणैरनुरंजयेत् सा धात्रेयी नायकस्याविदितनामा अज्ञाततद्गोत्रवत् प्रेषितेवेति यावत् एनां नायिकां तद्गुणैः नाय
कगुणैः कथाप्रसंगेन नायकगुणकीर्तनैः अनुरंजयेत् तस्मिन्ननुरक्तां कुर्यात् तत्प्रकारमेवाह तस्याश्च हृद्यान् नायकगुणान् भूयिष्ठं परिवर्णयेत् नाय
कगुणकीर्तनानन्तरं हृद्यान्तद्गुणांश्चश्रेयस्त्वानेन भूयिष्ठं सविस्तारं अन्यवरयितॄणां च दोषान् अभिप्रायविरुद्धान् प्रतिपादयेत् अन्यवरयितॄणां उक्तनाय
केतरसंभावितनायकानां दोषान् गुणानभिसत्त्वादीन् वक्ष्यमाणान् अभिप्रायविरुद्धान् अपि कानभिमतान् मातापित्रोश्च गुणानभिज्ञतां लुब्धतां चप
लतां बांधवानां च तथा मातापित्रोः अन्यवरपित्रोः चातल्पात्रादीनां गुणानभिज्ञतां गुणा अन्येषां चाल्पकुलपित्रादिपरिग्रहः अन्वयव्यतिरेकदृष्टान्ता
भ्यां लोकार्थे द्रढयेदित्याह पाश्चात्या अपि समानजातीयाः कन्याः शकुन्तलाद्याः भर्तारं प्राप्य संयुक्ता मोदंते स्म ताश्चास्या दर्शयेत् महाकुलेषु सापत्न
केर्बाध्यमाना विद्विष्टा दुःखिताः परित्यक्ताश्च दृश्यंते पाश्चात्याः प्राचीनाः समानजातीयाः नायकेन विश्वामित्रकन्या शकुन्तलाख्या एवाश्रमे रहसि सखी ७३
समक्षं स्वाभिमतं दुष्यन्तं राजानं वरयामास तेन भारतप्रसिद्धिः प्रदर्शयेत् प्रतिपादयेत् महाकुलेषु उत्पन्ना अपि स्वरुच्या परिणीता न सापत्नकैः

सपत्न्यादिदोषैः बाध्यमाना अत एव विद्विष्टा नायकेन अत एव परित्यक्ता दुःखिताश्च दृश्यन्ते इति तस्याः वैरिस्यानुपज्यते आयतिं चास्य वर्णये
त् सुखमनुपहतमेकचारितां वश्यतां नायकानुरागं च वर्णयेत् आयतिं शुभोदर्कं सुखं सुखित्वे एकचारितां एकपत्नीव्रतत्वे वश्यतां एतस्याः स
मनोरथायां वास्या मपायं साध्वसं व्रीडां च हेतुभिरवच्छिंद्यात् अस्यां नायिकायां समनोरथायां उक्तगुणश्रवणेन तत्संगाभिलाषायां ज्ञातायां सत्यां
अपायं तदलाभचिंतां साध्वसं लोकात् व्रीडां स्वयं नायकवरणहेतुभिः तदनुरागरहस्यस्थितलतागमननिदर्शनप्रदर्शनादिभिः दूतीकल्पं च सकल
माचरेत् एवं दूतीकल्पं कुर्वतीव धात्रेयी सकलं उक्तपरस्परानुसंधानप्रकारं कुर्यात् तथापि लज्जितां प्रत्याह त्वामजानतीं नाम नायको बलाद्ग्रहीष्यतीति
तथा सुपरिगृहीतं स्यादिति प्रयोजयेत् अजानतीं नाम रहसि कायीं तरव्याप्त तामि वल्स्थितां त्वां इति हेतोः सुपरिगृहीतां तदभिमतपरिग्रहस्यात् भ
वतीहि इति तथा तस्यापि प्रयोजयेत् वदेत् एवं त्रिनीया ध्यायमारभ्य वधूवरयोः साक्षात् धात्र्यादिद्वारा च परस्परवरणप्रकारमुक्त्वा विवाहभेदाना
ह प्रतिपन्नामभिप्रेतावकाशवर्तिनीं नायकः श्रोत्रियागारादग्निमानाय्य कुशानास्तीर्य यथास्मृति हुत्वा च त्रिः परिणयेत् ततो मातरि पितरि च
प्रकाशयेदिति प्रतिपन्नामनुकूलां अभिप्रेतावकाशवर्तिनीं परस्पराभिमतविजनदेशस्थां यथास्मृति गृह्योक्तप्रकारेण परिणयेत् नाति चरमीति
ब्रूयात् मातरि पितरि अन्योन्यमातापित्रोः इति प्रकाशयेत् अग्निसाक्षिकं गांधर्वेणप्रकारेण परिणीतामिति वदेत् अग्निसाक्षिका हि विवाहाना

निवर्तनस्याचार्यसमयः नाभिवर्ततेनान्यथा भवतीत्याचार्याणामायोगसमयः सिद्धः ततः अन्तो निर्णयं वदेदित्यर्थः दूषयित्वा विनाशनैः शनैः स्वजने प्रकाशयेत्
अथवा एनां वशीकृतां दूषयित्वा स्वभोगेनाप्यनुपयुक्तां कृत्वा स्वजने तन्मातृपित्रादिजने तद्बान्धवाश्च यथा कुलस्य भंगं परिहरंतो दैवभयात् तस्मै एवैनां दद्यु
स्तथा योजयेत् तद्बान्धवाः कन्यासंबंधिनः कुलस्य स्ववंशस्य भंगं अपयशः परिहरंतः अनिर्वृतः दैवभयाच्च महाराजात् तस्मै स्वसंयोजितनायकायैव य
थास्तु त्यापरयेत् धर्म्येयमिति शेषः अनंतरं च प्रीत्युपग्रहैरनुरागेण तान् बांधवान् प्रीणयेदिति अनंतरं विवाहानंतरं प्रीत्युपग्रहैः प्रीतिदानैः अ
नुरागेण क्षेत्राम्बुरवाक्यादिना तान् तदीयान् गांधर्वेण विवाहेन चेष्टयेत् एवं गांधर्वेण परस्परसंयोगानंतरमाविना चेष्टयेत् सेस्कुर्यात् पैशाचं
परिणयमाह अप्रतिपद्यमानायामंतश्चारिणीभिरन्यां कुलप्रमदां पूर्वसंसृष्टां प्रीयमाणां चोपगृह्य तया सह विषयसावकाशामेनामन्यकार्यापदेशेना
नाययेत् अप्रतिपद्यमानायां पूर्वोक्तोपायैरवशीकृतायामपि मातुलादिस्तनायां सख्याम् अंतश्चारिणीभिः पुनरन्येन तद्गृहगामिनीं कुलप्रमदां कुलपा
